# Shri Shiva Mahapuranam 4 Kotirudra Samhita

# શ્રીશિવમહાપુરાણમ્ ૪ કોટિરુદ્રસંહિતા

## Document Information

Text title : shivapurANam 4 koTirudrasaMhitA

File name : shivapurANam4koTirudrasaMhitA.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members Malati Shekar, Latha Murali, Meenakshi Premanand, Jayalakshmi, Gayathri, Uma Mahesh, Sripriya, Sornavalli

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૪ કોટિરુદ્રસંહિતા

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥ ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧. પ્રથમોઽધ્યાયઃ । જ્યોતિર્લિઙ્ગતદુપલિંઙ્ગમાહાત્મ્યવર્ણનમ્ ।

યો ધત્તે નિજમાયયૈવ ભુવનાકારં વિકારોજ્ઝિતો ।
યસ્યાહુઃ કરુણાકટાક્ષવિભવૌ સ્વર્ગાપવર્ગાભિધૌ ।
પ્રત્યગ્બોધસુખાદ્વયં હૃદિ સદા પશ્યન્તિ યં યોગિન-
સ્તસ્મૈ શૈલસુતાઞ્ચિતાર્ધવપુષે શશ્વન્નમસ્તેજસે ॥ ૧॥

કૃપાલલિતવીક્ષણં સ્મિતમનોજ્ઞવક્ત્રામ્બુજં
શશાઙ્કકલયોજ્જ્વલં શમિતઘોરતાપત્રયમ્ ।
કરોતુ કિમપિ સ્ફુરત્પરમસૌખ્યસચ્ચિદ્વપુ-
ર્ધરાધરસુતાભુજોદ્વલયિતં મહો મઙ્ગલમ્ ॥ ૨॥

ઋષય ઊચુઃ
સમ્યગુક્તં ત્વયા સૂત લોકાનાં હિતકામ્યયા ।
શિવાવતારમાહાત્મ્યં નાનાખ્યાનસમન્વિતમ્ ॥ ૩॥

પુનશ્ચ કથ્યતાં તાત શિવમાહાત્મ્યમુત્તમમ્ ।
લિઙ્ગસમ્બન્ધિ સુપ્રીત્યા ધન્યસ્ત્વં શૈવસત્તમ ॥ ૪॥

શૃણ્વન્તસ્ત્વન્મુખામ્ભોજાન્ન તૃપ્તાઃ સ્મો વયં પ્રભો ।
શૈવં યશોઽમૃતં રમ્યં તદેવ પુનરુચ્યતામ્ ॥ ૫॥

પૃથિવ્યાં યાનિ લિઙ્ગાનિ તીર્થે તીર્થે શુભાનિ હિ ।
અન્યત્ર વા સ્થલે યાનિ પ્રસિદ્ધાનિ સ્થિતાનિ વૈ ॥ ૬॥

તાનિ તાનિ ચ દિવ્યાનિ લિઙ્ગાનિ પરમેશિતુઃ ।

વ્યાસશિષ્ય સમાચક્ષ્વ લોકાનાં હિતકામ્યયા ॥ ૭॥

સૂત ઉવાચ ।
સાધુ પૃષ્ટમૃષિશ્રેષ્ઠા લોકાનાં હિતકામ્યયા ।
કથયામિ ભવત્સ્નેહાત્તાનિ સઙ્ક્ષેપતો દ્વિજાઃ ॥ ૮॥

સર્વેષાં શિવલિઙ્ગાનાં મુને સઙ્ખ્યા ન વિદ્યતે ।
સર્વા લિઙ્ગમયી ભૂમિઃ સર્વં લિઙ્ગમયં જગત્ ॥ ૯॥

લિઙ્ગયુક્તાનિ તીર્થાનિ સર્વં લિઙ્ગે પ્રતિષ્ઠિતમ્ ।
સઙ્ખ્યા ન વિદ્યતે તેષાં તાનિ કિઞ્ચિદ્બ્રવીમ્યહમ્ ॥ ૧૦॥

યત્કિઞ્ચિદ્ દૃશ્યતે દૃશ્યં વર્ણ્યતે સ્મર્યતે ચ યત્ ।
તત્સર્વં શિવરૂપં હિ નાન્યદસ્તીતિ કિઞ્ચન ॥ ૧૧॥

તથાપિ શ્રૂયતાં પ્રીત્યા કથયામિ યથાશ્રુતમ્ ।
લિઙ્ગાનિ ચ ઋષિશ્રેષ્ઠાઃ પૃથિવ્યાં યાનિ તાનિ હ ॥ ૧૨॥

પાતાલે ચાપિ વર્તન્તે સ્વર્ગે ચાપિ તથા ભુવિ ।
સર્વત્ર પૂજ્યતે શમ્ભુઃ સ દેવાસુરમાનુષૈઃ ॥ ૧૩॥

ત્રિજગચ્છમ્ભુના વ્યાપ્તં સદેવાસુરમાનુષમ્ ।
અનુગ્રહાય લોકાનાં લિઙ્ગરૂપેણ સત્તમાઃ ॥ ૧૪॥

અનુગ્રહાય લોકાનાં લિઙ્ગાનિ ચ મહેશ્વરઃ ।
દધાતિ વિવિધાન્યત્ર તીર્થે ચાન્યસ્થલે તથા ॥ ૧૫॥

યત્ર યત્ર યદા શમ્ભુર્ભક્ત્યા ભક્તૈશ્ચ સંસ્મૃતઃ ।
તત્ર તત્રાવતીર્યાથ કાર્યં કૃત્વા સ્થિતસ્તદા ॥ ૧૬॥

લોકાનામુપકારાર્થં સ્વલિઙ્ગં ચાપ્યકલ્પયત્ ।
તલ્લિઙ્ગં પૂજયિત્વા તુ સિદ્ધિં સમધિગચ્છતિ ॥ ૧૭॥

પૃથિવ્યાં યાનિ લિઙ્ગાનિ તેષાં સઙ્ખ્યા ન વિદ્યતે ।
તથાપિ ચ પ્રધાનાનિ કથ્યન્તે ચ મયા દ્વિજાઃ ॥ ૧૮॥

પ્રધાનેષુ ચ યાનીહ મુખ્યાનિ પ્રવદામ્યહમ્ ।
યચ્છ્રુત્વા સર્વપાપેભ્યો મુચ્યતે માનવઃ ક્ષણાત્ ॥ ૧૯॥

જ્યોતિર્લિઙ્ગાનિ યાનીહ મુખ્યમુખ્યાનિ સત્તમ ।
તાન્યહં કથયામ્યદ્ય શ્રુત્વા પાપં વ્યપોહતિ ॥ ૨૦॥

સૌરાષ્ટ્રે સોમનાથં ચ શ્રીશૈલે મલ્લિકાર્જુનમ્ ।
ઉજ્જયિન્યાં મહાકાલમોઙ્કારે પરમેશ્વરમ્ ॥ ૨૧॥

કેદારં હિમવત્પૃષ્ઠે ડાકિન્યાં ભીમશઙ્કરમ્ ।
વારાણસ્યાં ચ વિશ્વેશં ત્ર્યમ્બકં ગૌતમીતટે ॥ ૨૨॥

વૈદ્યનાથં ચિતાભૂમૌ નાગેશં દારુકાવને ।
સેતુબન્ધે ચ રામેશં ઘુશ્મેશં ચ શિવાલયે ॥ ૨૩॥

દ્વાદશૈતાનિ નામાનિ પ્રાતરુત્થાય યઃ પઠેત્ ।
સર્વપાપવિનિર્મુક્તઃ સર્વસિદ્ધિફલં લભેત્ ॥ ૨૪॥

યં યં કામમપેક્ષ્યૈવ પઠિષ્યન્તિ નરોત્તમાઃ ।
પ્રાપ્સ્યન્તિ કામં તં તં હિ પરત્રેહ મુનીશ્વરાઃ ॥ ૨૫॥

યે નિષ્કામતયા તાનિ પઠિષ્યન્તિ શુભાશયાઃ ।
તેષાં ચ જનનીગર્ભે વાસો નૈવ ભવિષ્યતિ ॥ ૨૬॥

એતેષાં પૂજનેનૈવ વર્ણાનાં દુઃખનાશનમ્ ।
ઇહલોકે પરત્રાપિ મુક્તિર્ભવતિ નિશ્ચિતમ્ ॥ ૨૭॥

ગ્રાહ્યમેષાં ચ નૈવેદ્યં ભોજનીયં પ્રયત્નતઃ ।
તત્કર્તુઃ સર્વપાપાનિ ભસ્મસાદ્યાન્તિ વૈ ક્ષણાત્ ॥ ૨૮॥

જ્યોતિષાં ચૈવ લિઙ્ગાનાં બ્રહ્માદિભિરલં દ્વિજાઃ ।
વિશેષતઃ ફલં વક્તું શક્યતે ન પરૈસ્તથા ॥ ૨૯॥

એકં ચ પૂજિતં યેન ષણ્માસં તન્નિરન્તરમ્ ।
તસ્ય દુઃખં ન જાયેત માતૃકુક્ષિસમુદ્ભવમ્ ॥ ૩૦॥

હીનયોનૌ યદા જાતો જ્યોતિર્લિઙ્ગં ચ પશ્યતિ ।
તસ્ય જન્મ ભવેત્તત્ર વિમલે સત્કુલે પુનઃ ॥ ૩૧॥

સત્કુલે જન્મ સમ્પ્રાપ્ય ધનાઢ્યો વેદપારગઃ ।
શુભકર્મ તદા કૃત્વા મુક્તિં યાત્યનપાયિનીમ્ ॥ ૩૨॥

મ્લેચ્છો વાપ્યન્ત્યજો વાપિ ષણ્ઢો વાપિ મુનીશ્વરાઃ ।
દ્વિજો ભૂત્વા ભવેન્મુક્તસ્તસ્માત્તદ્દર્શનં ચરેત્ ॥ ૩૩॥

જ્યોતિષાં ચૈવ લિઙ્ગાનાં કિઞ્ચિત્પ્રોક્તં ફલં મયા ।

જ્યોતિષાં ચોપલિઙ્ગાનિ શ્રૂયન્તામૃષિસત્તમાઃ ॥ ૩૪॥

સોમેશ્વરસ્ય યલ્લિઙ્ગમન્તકેશમુદાહૃતમ્ ।
મહ્યાઃ સાગરસંયોગે તલ્લિઙ્ગમુપલિઙ્ગકમ્ ॥ ૩૫॥

મલ્લિકાર્જુનસમ્ભૂતમુપલિઙ્ગમુદાહૃતમ્ ।
રુદ્રેશ્વરમિતિ ખ્યાતં ભૃગુકક્ષે સુખાવહમ્ ॥ ૩૬॥

મહાકાલભવં લિઙ્ગં દુગ્ધેશમિતિ વિશ્રુતમ્ ।
નર્મદાયાં પ્રસિદ્ધં તત્સર્વપાપહરં સ્મૃતમ્ ॥ ૩૭॥

ૐકારજં ચ યલ્લિઙ્ગં કર્દમેશમિતિ શ્રુતમ્ ।
પ્રસિદ્ધં બિન્દુસરસિ સર્વકામફલપ્રદમ્ ॥ ૩૮॥

કેદારેશ્વરસઞ્જાતં ભૂતેશં યમુનાતટે ।
મહાપાપહરં પ્રોક્તં પશ્યતામર્ચતાં તથા ॥ ૩૯॥

ભીમશઙ્કરસમ્ભૂતં ભીમેશ્વરમિતિ સ્મૃતમ્ ।
સહ્યાચલે પ્રસિદ્ધં તન્મહાબલવિવર્દ્ધનમ્ ॥ ૪૦॥

વિશ્વેશ્વરાચ્ચ યજ્જાતં શરણ્યેશ્વર વિશ્રુતમ્ ।
ત્ર્યમ્બકસ્ય ચ યત્પ્રોક્તં સિદ્ધેશ્વર ઇતિ શ્રુતમ્ ॥ ૪૧॥

વૈદ્યનાથાચ્ચ યજ્જાતં વૈજનાથ ઇતિ સ્મૃતમ્ ।
નાગેશ્વરસમુદ્ભૂતં ભૂતેશ્વરમુદાહૃતમ્ ॥ ૪૨॥

મલ્લિકાસરસ્વતીતીરે દર્શનાત્પાપહારકમ્ ।
રામેશ્વરાચ્ચ યજ્જાતં ગુપ્તેશ્વરમિતિ સ્મૃતમ્ ॥ ૪૩॥

ઘુશ્મેશાચ્ચૈવ યજ્જાતં વ્યાઘ્રેશ્વરમિતિ સ્મૃતમ્
જ્યોતિર્લિઙ્ગોપલિઙ્ગાનિ પ્રોક્તાનીહ મયા દ્વિજાઃ ॥ ૪૪॥

દર્શનાત્પાપહારીણિ સર્વકામપ્રદાનિ ચ ।
એતાનિ સુપ્રધાનાનિ મુખ્યતાં હિ ગતાનિ ચ ।
અન્યાનિ ચાપિ મુખ્યાનિ શ્રૂયન્તામૃષિસત્તમાઃ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં જ્યોતિર્લિઙ્ગતદુપલિંઙ્ગમાહાત્મ્યવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૪.૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨. દ્વિતીયોઽધ્યાયઃ । શિવલિઙ્ગમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
ગઙ્ગાતીરે સુપ્રસિદ્ધા કાશી ખલુ વિમુક્તિદા ।
સા હિ લિઙ્ગમયી જ્ઞેયા શિવવાસસ્થલી સ્મૃતા ॥ ૧॥

લિઙ્ગં તત્રૈવ મુખ્યં ચ સમ્પ્રોક્તમવિમુક્તકમ્ ।
કૃત્તિવાસેશ્વરઃ સાક્ષાત્તત્તુલ્યો વૃદ્ધકાલકઃ ॥ ૨॥

તિલભાણ્ડેશ્વરશ્ચૈવ દશાશ્વમેધ એવ ચ ।
ગઙ્ગાસાગરસંયોગે સઙ્ગમેશ ઇતિ સ્મૃતઃ ॥ ૩॥

ભૂતેશ્વરો યઃ સમ્પ્રોક્તો ભક્તસર્વાર્થદઃ સદા ।
નારીશ્વર ઇતિ ખ્યાતઃ કૌશિક્યાઃ સ સમીપગઃ ॥ ૪॥

વર્તતે ગણ્ડકીતીરે બટુકેશ્વર એવ સઃ ।
પૂરેશ્વર ઇતિ ખ્યાતઃ ફલ્ગુતીરે સુખપ્રદઃ ॥ ૫॥

સિદ્ધનાથેશ્વરશ્ચૈવ દર્શનાત્સિદ્ધિદો નૃણામ્ ।
દૂરેશ્વર ઇતિ ખ્યાતઃ પત્તને ચોત્તરે તથા ॥ ૬॥

શ‍ૃઙ્ગેશ્વરશ્ચ નામ્ના વૈ વૈદ્યનાથસ્તથૈવ ચ ।
જપ્યેશ્વરસ્તથા ખ્યાતો યો દધીચિરણસ્થલે ॥ ૭॥

ગોપેશ્વરઃ સમાખ્યાતો રઙ્ગેશ્વર ઇતિ સ્મૃતઃ ।
વામેશ્વરશ્ચ નાગેશઃ કામેશો વિમલેશ્વરઃ ॥ ૮॥

વ્યાસેશ્વરશ્ચ વિખ્યાતઃ સુકેશશ્ચ તથૈવ હિ ।
ભાણ્ડેશ્વરશ્ચ વિખ્યાતો હુઙ્કારેશસ્તથૈવ ચ ॥ ૯॥

સુરોચનશ્ચ વિખ્યાતો ભૂતેશ્વર ઇતિ સ્વયમ્ ।
સઙ્ગમેશસ્તથા પ્રોક્તો મહાપાતકનાશનઃ ॥ ૧૦॥

તતશ્ચ તપ્તકાતીરે કુમારેશ્વર એવ ચ ।
સિદ્ધેશ્વરશ્ચ વિખ્યાતઃ સેનેશશ્ચ તથા સ્મૃતઃ ॥ ૧૧॥

રામેશ્વર ઇતિ પ્રોક્તો કુમ્ભેશશ્ચ પરો મતઃ ।

નન્દીશ્વરશ્ચ પુઞ્જેશઃ પૂર્ણાયાં પૂર્ણકસ્તથા ॥ ૧૨॥

બ્રહ્મેશ્વરઃ પ્રયાગે ચ બ્રહ્મણા સ્થાપિતઃ પુરા ।
દશાશ્વમેધતીર્થે હિ ચતુર્વર્ગફલપ્રદઃ ॥ ૧૩॥

તથા સોમેશ્વરસ્તત્ર સર્વાપદ્વિનિવારકઃ ।
ભારદ્વાજેશ્વરશ્ચૈવ બ્રહ્મવર્ચઃપ્રવર્દ્ધકઃ ॥ ૧૪॥

શૂલટઙ્કેશ્વરઃ સાક્ષાત્કામનાપ્રદ ઈરિતઃ ।
માધવેશશ્ચ તત્રૈવ ભક્તરક્ષાવિધાયકઃ ॥ ૧૫॥

નાગેશાખ્યઃ પ્રસિદ્ધો હિ સાકેતનગરે દ્વિજાઃ ।
સૂર્યવંશોદ્ભવાનાં ચ વિશેષેણ સુખપ્રદઃ ॥ ૧૬॥

પુરુષોત્તમપુર્યાં તુ ભુવનેશઃ સુસિદ્ધિદઃ ।
લોકેશશ્ચ મહાલિઙ્ગઃ સર્વાનન્દપ્રદાયકઃ ॥ ૧૭॥

કામેશ્વરઃ શમ્ભુલિઙ્ગો ગઙ્ગેશઃ પરશુદ્ધિકૃત્ ।
શુક્રેશ્વરઃ શુક્રસિદ્ધો લોકાનાં હિતકામ્યયા ॥ ૧૮॥

તથા વટેશ્વરઃ ખ્યાતઃ સર્વકામફલપ્રદઃ ।
સિન્ધુતીરે કપાલેશો વક્ત્રેશઃ સર્વપાપહા ॥ ૧૯॥

ધૌતપાપેશ્વરઃ સાક્ષાદંશેન પરમેશ્વરઃ ।
ભીમેશ્વર ઇતિ પ્રોક્તઃ સૂર્યેશ્વર ઇતિ સ્મૃતઃ ॥ ૨૦॥

નન્દીશ્વરશ્ચ વિજ્ઞેયો જ્ઞાનદો લોકપૂજિતઃ ।
નાકેશ્વરો મહાપુણ્યસ્તથા રામેશ્વરઃ સ્મૃતઃ ॥ ૨૧॥

વિમલેશ્વરનામા વૈ કણ્ટકેશ્વર એવ ચ ।
પૂર્વસાગરસંયોગે ધર્તુકેશસ્તથૈવ ચ ॥ ૨૨॥

ચન્દ્રેશ્વરશ્ચ વિજ્ઞેયશ્ચન્દ્રકાન્તિફલપ્રદઃ ।
સર્વકામપ્રદશ્ચૈવ સિદ્ધેશ્વર ઇતિ સ્મૃતઃ ॥ ૨૩॥

બિલ્વેશ્વરશ્ચ વિખ્યાતશ્ચાન્ધકેશસ્તથૈવ ચ ।
યત્ર વા હ્યન્ધકો દૈત્યઃ શઙ્કરેણ હતઃ પુરા ॥ ૨૪॥

અયં સ્વરૂપમંશેન ધૃત્વા શમ્ભુઃ પુનઃ સ્થિતઃ ।
શરણેશ્વરવિખ્યાતો લોકાનાં સુખદઃ સદા ॥ ૨૫॥

કર્દમેશઃ પરઃ પ્રોક્તઃ કોટીશશ્ચાર્બુદાચલે ।
અચલેશશ્ચ વિખ્યાતો લોકાનાં સુખદઃ સદા ॥ ૨૬॥

નાગેશ્વરસ્તુ કૌશિક્યાસ્તીરે તિષ્ઠતિ નિત્યશઃ ।
અનન્તેશ્વરસંજ્ઞશ્ચ કલ્યાણશુભભાજનઃ ॥ ૨૭॥

યોગેશ્વરશ્ચ વિખ્યાતો વૈદ્યનાથેશ્વરસ્તથા ।
કોટીશ્વરશ્ચ વિજ્ઞેયઃ સપ્તેશ્વર ઇતિ સ્મૃતઃ ॥ ૨૮॥

ભદ્રેશ્વરશ્ચ વિખ્યાતો ભદ્રનામા હરઃ સ્વયમ્ ।
ચણ્ડીશ્વરસ્તથા પ્રોક્તઃ સઙ્ગમેશ્વર એવ ચ ॥ ૨૯॥

પૂર્વસ્યાં દિશિ જાતાનિ શિવલિઙ્ગાનિ યાનિ ચ ।
સામાન્યાન્યપિ ચાન્યાનિ તાનીહ કથિતાનિ તે ॥ ૩૦॥

દક્ષિણસ્યાં દિશિ તથા શિવલિઙ્ગાનિ યાનિ ચ ।
સઞ્જાતાનિ મુનિશ્રેષ્ઠ તાનિ તે કથયામ્યહમ્ ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં શિવલિઙ્ગમાહાત્મ્યવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૪.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩. તૃતીયોઽધ્યાયઃ । કોટિરુદ્રસંહિતાયામનસૂયાત્રિતપોવર્ણનમ્ ।

સૂત ઉવાચ ।
બ્રહ્મપુર્યાં ચિત્રકૂટે લિઙ્ગં મત્તગજેન્દ્રકમ્ ।
બ્રહ્મણા સ્થાપિતં પૂર્વં સર્વકામસમૃદ્ધિદમ્ ॥ ૧॥

તત્પૂર્વદિશિ કોટીશં લિઙ્ગં સર્વવરપ્રદમ્ ।
ગોદાવર્યાઃ પશ્ચિમે તલ્લિઙ્ગં પશુપતિનામકમ્ ॥ ૨॥

દક્ષિણસ્યાં દિશિ કશ્ચિદત્રીશ્વર ઇતિ સ્વયમ્ ।
લોકાનામુપકારાર્થમનસૂયાસુખાય ચ ॥ ૩॥

પ્રાદુર્ભૂતઃ સ્વયં દેવો હ્યનાવૃષ્ટ્યામજીવયત્ ।
સ એવ શઙ્કરઃ સાક્ષાદંશેન સ્વયમેવ હિ ॥ ૪॥

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ કથમત્રીશ્વરો હરઃ ।
ઉત્પન્નઃ પરમો દિવ્યસ્તત્ત્વં કથય સુવ્રત ॥ ૫॥

સૂત ઉવાચ ।
સાધુ પૃષ્ટમૃષિશ્રેષ્ઠાઃ કથયામિ કથાં શુભામ્ ।
યાં કથાં સતતં શ્રુત્વા પાતકૈર્મુચ્યતે ધ્રુવમ્ ॥ ૬॥

દક્ષિણસ્યાં દિશિ મહત્ કામદં નામ યદ્વનમ્ ।
ચિત્રકૂટસમીપેઽસ્તિ તપસાં હિતદં સતામ્ ॥ ૭॥

તત્ર ચ બ્રહ્મણઃ પુત્રો હ્યત્રિનામા ઋષિઃ સ્વયમ્ ।
તપસ્તેપેઽતિકઠિનમનસૂયાસમન્વિતઃ ॥ ૮॥

પૂર્વં કદાચિત્તત્રૈવ હ્યનાવૃષ્ટિરભૂન્મુને ।
દુઃખદા પ્રાણિનાં દૈવાદ્વિકટા શતવાર્ષિકી ॥ ૯॥

વૃક્ષાઃ શુષ્કાસ્તદા સર્વે પલ્લવાનિ ફલાનિ ચ ।
નિત્યાર્થં ન જલં ક્વાપિ દૃષ્ટમાસીન્મુનીશ્વરાઃ ॥ ૧૦॥

આર્દ્રીભાવો ન લભ્યેત ખરા વાતા દિશો દશ ।
હાહાકારો મહાનાસીત્પૃથિવ્યાં દુઃખદોઽતિ હિ ॥ ૧૧॥

સંવર્તં ચૈવ ભૂતાનાં દૃષ્ટ્વાત્રિગૃહિણી પ્રિયા ।
સાધ્વી ચૈવાબ્રવીદત્રિં મયા દુઃખં ન સહ્યતે ॥ ૧૨॥

સમાધૌ ચ વિલીનોઽભૂદાસને સંસ્થિતઃ સ્વયમ્ ।
પ્રાણાયામં ત્રિરાવૃત્ત્યા કૃત્વા મુનિવરસ્તદા ॥ ૧૩॥

ધ્યાયતિ સ્મ પરં જ્યોતિરાત્મસ્થમાત્મના ચ સઃ ।
અત્રિર્મુનિવરો જ્ઞાની શઙ્કરં નિર્વિકારકમ્ ॥ ૧૪॥

સ્વામિનિ ધ્યાનલીને ચ શિષ્યાસ્તે દૂરતો ગતાઃ ।
અન્નં વિના તદા તે તુ મુક્ત્વા તં સ્વગુરું મુનિમ્ ॥ ૧૫॥

એકાકિની તદા જાતા સાનસૂયા પતિવ્રતા ।
સિષેવે સા ચ સતતં તં મુદા મુનિસત્તમમ્ ॥ ૧૬॥

પાર્થિવં સુન્દરં કૃત્વા મન્ત્રેણ વિધિપૂર્વકમ્ ।
માનસૈરુપચારૈશ્ચ પૂજયામાસ શઙ્કરમ્ ॥ ૧૭॥

તુષ્ટાવ શઙ્કરં ભક્ત્યા સંસેવિત્વા મુહુર્મુહુઃ ।
બદ્ધાઞ્જલિપુટા ભૂત્વા પ્રક્રમ્ય સ્વામિનં શિવમ્ ॥ ૧૮॥

દણ્ડવત્પ્રણિપાતેન પ્રતિપ્રક્રમણં તદા ।
ચકાર સુચરિત્રા સાનસૂયા મુનિકામિની ॥ ૧૯॥

દૈત્યાશ્ચ દાનવાઃ સર્વે દૃષ્ટ્વા તુ સુન્દરીં તદા ।
વિહ્વલાશ્ચાભવઁસ્તત્ર તેજસા દૂરતઃ સ્થિતાઃ ॥ ૨૦॥

અગ્નિં દૃષ્ટ્વા યથા દૂરે વર્તન્તે તદ્વદેવ હિ ।
તથૈનાં ચ તદા દૃષ્ટ્વા નાયાન્તીહ સમીપગાઃ ॥ ૨૧॥

અત્રેશ્ચ તપસશ્ચૈવાનસૂયાશિવસેવનમ્ ।
વિશિષ્યતે સ્મ વિપ્રેન્દ્રા મનોવાક્કાયસંસ્કૃતમ્ ॥ ૨૨॥

તાવત્કાલં તુ સા દેવી પરિચર્યાં ચકાર હ ।
યાવત્કાલં મુનિવરઃ પ્રાણાયામપરાયણઃ ॥ ૨૩॥

તૌ દમ્પતી તદા તત્ર સ્વસ્વકાર્યપરાયણૌ ।
સંસ્થિતૌ મુનિશાર્દૂલ નાન્યઃ કશ્ચિત્પરઃ સ્થિતઃ ॥ ૨૪॥

એવં જાતે તદા કાલે હ્યત્રિશ્ચ ઋષિસત્તમઃ ।
ધ્યાને ચ પરમે લીનો ન વ્યબુધ્યત કિઞ્ચન ॥ ૨૫॥

અનસૂયાપિ સા સાધ્વી સ્વામિનં વૈ શિવં તથા ।
ભેજે નાન્યત્પરં કિઞ્ચિજ્જાનીતે સ્મ ચ સા સતી ॥ ૨૬॥

તસ્યૈવ તપસા સર્વે તસ્યાશ્ચ ભજનેન ચ ।
દેવાશ્ચ ઋષયશ્ચૈવ ગઙ્ગાદ્યાઃ સરિતસ્તથા ॥ ૨૭॥

દર્શનાર્થં તયોઃ સર્વાઃ પરપ્રીત્યા સમાયયુઃ ।
દૃષ્ટ્વા ચ તત્તપઃ સેવાં વિસ્મયં પરમં યયુઃ ॥ ૨૮॥

તયોસ્તદદ્ભુતં દૃષ્ટ્વા સમૂચુર્ભજનં વરમ્ ।
ઉભયોઃ કિં વિશિષ્ટં ચ તપસો ભજનસ્ય ચ ॥ ૨૯॥

અત્રેશ્ચૈવ તપઃપ્રોક્તમનસૂયાનુસેવનમ્ ।
તત્સર્વમુભયોર્દૃષ્ટ્વા સમૂચુર્ભજનં વરમ્ ॥ ૩૦॥

પૂર્વૈશ્ચ ઋષિભિશ્ચૈવ દુષ્કરં તુ તપઃ કૃતમ્ ।
એતાદૃશં તુ કેનાપિ ક્વ કૃતં નૈતદબ્રુવન્ ॥ ૩૧॥

ધન્યોઽયં ચ મુનિર્ધન્યા તથેયમનસૂયિકા ।
યદૈતાભ્યાં પરં પ્રીત્યા ક્રિયતે સુતપઃ પુનઃ ॥ ૩૨॥

એતાદૃશં શુભં ચૈતત્તપો દુષ્કરમુત્તમમ્ ।
ત્રિલોક્યાં ક્રિયતે કેન સામ્પ્રતં જ્ઞાયતે ન હિ ॥ ૩૩॥

તયોરેવ પ્રશંસાં ચ કૃત્વા તે તુ યથાગતમ્ ।
ગતાસ્તે ચ તદા તત્ર ગઙ્ગાઞ્ચ ગિરિશં વિના ॥ ૩૪॥

ગઙ્ગા મદ્ભજનપ્રીતા સાધ્વી ધર્મવિમોહિતા ।
કૃત્વોપકારમેતસ્યાગમિષ્યામીત્યુવાચ સા ॥ ૩૫॥

શિવોઽપિ ધ્યાનસમ્બદ્ધો મુનેરત્રેર્મુનીશ્વરાઃ ।
પૂર્ણાંશેન સ્થિતસ્તત્ર કૈલાસં ન જગામ હ ॥ ૩૬॥

પઞ્ચાશચ્ચ તથા ચાત્ર ચત્વારિ ઋષિસત્તમાઃ ।
વર્ષાણિ ચ ગતાન્યાસન્ વૃષ્ટિર્નૈવાભવત્તદા ॥ ૩૭॥

યાવચ્ચાપ્યત્રિણા હ્યેવં તપસા ધ્યાનમાશ્રિતમ્ ।
અનસૂયા તદા નૈવ ગૃહ્ણામીતીષણા કૃતા ॥ ૩૮॥

એવં ચ ક્રિયમાણે હિ મુનિના તપસિ સ્થિતે ।
અનસૂયાસુભજને યજ્જાતં શ્રૂયતામિતિ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયામનસૂયાત્રિતપોવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૪.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
કોટિરુદ્રસંહિતા

## ૪.૪. ચતુર્થોઽધ્યાયઃ । અત્રીશ્વરમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
કદાચિત્સ ઋષિશ્રેષ્ઠો હ્યત્રિર્બ્રહ્મવિદાં વરઃ ।
જાગૃતશ્ચ જલં દેહિ પ્રત્યુવાચ પ્રિયામિતિ ॥ ૧॥

સાપિ સાધ્વી ત્વવશ્યં ચ ગૃહીત્વાથ કમણ્ડલુમ્ ।

જગામ વિપિને તત્ર જલં મે નીયતે કુતઃ ॥ ૨॥

કિં કરોમિ ક્વ ગચ્છામિ કુતો નીયેત વૈ જલમ્ ।
ઇતિ વિસ્મયમાપન્ના તાં ગઙ્ગાં હિ દદર્શ સા ॥ ૩॥

તામનુવ્રજતી યાવત્ સાબ્રવીચ્ચ તદા હિ તામ્ ।
ગઙ્ગા સરિદ્વરા દેવી બિભ્રતી સુન્દરાં તનુમ્ ॥ ૪॥

ગઙ્ગોવાચ ।
પ્રસન્નાસ્મિ ચ તે દેવિ કુત્ર યાસિ વદાધુના ।
ધન્યા ત્વં સુભગે સત્યં તવાજ્ઞાં ચ કરોમ્યહમ્ ॥ ૫॥

સૂત ઉવાચ ।
તદ્વચશ્ચ તદા શ્રુત્વા ઋષિપત્ની તપસ્વિની ।
પ્રત્યુવાચ વચઃ પ્રીત્યા સ્વયં સુચકિતા દ્વિજાઃ ॥ ૬॥

અનસૂયોવાચ ।
કા ત્વં કમલપત્રાક્ષિ કુતો વા ત્વં સમાગતા ।
તથ્યં બ્રૂહિ કૃપાં કૃત્વા સાધ્વી સુપ્રવદા સતી ॥ ૭॥

સૂત ઉવાચ ।
ઇત્યુક્તે ચ તયા તત્ર મુનિપત્ન્યા મુનીશ્વરાઃ ।
સરિદ્વરા દિવ્યરૂપા ગઙ્ગા વાક્યમથાબ્રવીત્ ॥ ૮॥

ગઙ્ગોવાચ ।
સ્વામિનઃ સેવનં દૃષ્ટ્વા શિવસ્ય ચ પરાત્મનઃ ।
સાધ્વિ ધર્મં ચ તે દૃષ્ટ્વા સ્થિતાસ્મિ તવ સન્નિધૌ ॥ ૯॥

અહં ગઙ્ગા સમાયાતા ભજનાત્તે શુચિસ્મિતે ।
વશીભૂતા હ્યહં જાતા યદિચ્છસિ વૃણીષ્વ તત્ ॥ ૧૦॥

સૂત ઉવાચ ।
ઇત્યુક્તે ગઙ્ગયા સાધ્વી નમસ્કૃત્ય પુરઃ સ્થિતા ।
ઉવાચેતિ જલં દેહિ ચેત્પ્રસન્ના મમાધુના ॥ ૧૧॥

ઇત્યેતદ્વચનં શ્રુત્વા ગર્તં કુર્વિતિ સાબ્રવીત્ ।
શીઘ્રં ચાયાચ્ચ તત્કૃત્વા સ્થિતા તત્ક્ષણમાત્રતઃ ॥ ૧૨॥

તત્ર સા ચ પ્રવિષ્ટા ચ જલરૂપમભૂત્તદા ।

આશ્ચર્યં પરમં ગત્વા ગૃહીતં ચ જલં તયા ॥ ૧૩॥

ઉવાચ વચનં ચૈતલ્લોકાનાં સુખહેતવે ।
અનસૂયા મુનેઃ પત્ની દિવ્યરૂપાં સરિદ્વરામ્ ॥ ૧૪॥

અનસૂયોવાચ ।
યદિ ત્વં સુપ્રસન્ના મે વર્તસે ચ કૃપા મયિ ।
સ્થાતવ્યં ચ ત્વયા તાવત્ મત્સ્વામી યાવદાવ્રજેત્ ॥ ૧૫॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વાનસૂયાયા વચનં સુખદં સતામ્ ।
ગઙ્ગોવાચ પ્રસન્નાતિ હ્યત્રેર્દાસ્યસિ મેઽનઘે ॥ ૧૬॥

ઇત્યુક્તે ચ તયા તત્ર હ્યનયાપિ કૃતં તથા ।
સ્વામિને તજ્જલં દિવ્યં દત્ત્વા તત્પુરતઃ સ્થિતા ॥ ૧૭॥

સ ઋષિશ્ચાપિ સુપ્રીત્યા સ્વાચમ્ય વિધિપૂર્વકમ્ ।
પપૌ દિવ્યં જલં તચ્ચ પીત્વા સુખમવાપ હ ॥ ૧૮॥

અહો નિત્યં જલં યચ્ચ પીયતે તજ્જલં ન હિ ।
વિચાર્યેતિ ચ તેનાશુ પરિતશ્ચાવલોકિતમ્ ॥ ૧૯॥

શુષ્કાન્વૃક્ષાન્સમાલોક્ય દિશો રૂક્ષતરાસ્તથા ।
ઉવાચ તામૃષિશ્રેષ્ઠો ન જાતં વર્ષણં પુનઃ ॥ ૨૦॥

તદુક્તં તત્ સમાકર્ણ્ય નેતિ નેતિ પ્રિયાં તદા ।
તામુવાચ પુનઃ સોઽપિ જલં નીતં કુતસ્ત્વયા ॥ ૨૧॥

ઇત્યુક્તે તુ તદા તેન વિસ્મયં પરમં ગતા ।
અનસૂયા સ્વમનસિ સચિન્તા તુ મુનીશ્વરાઃ ॥ ૨૨॥

નિવેદ્યતે મયા ચેદ્વૈ તદોત્કર્ષો ભવેન્મમ ।
નિવેદ્યતે યદા નૈવ વ્રતભઙ્ગો ભવેન્મમ ॥ ૨૩॥

નોભયં ચ તથા સ્યાદ્વૈ નિવેદ્યં તત્તથા મમ ।
ઇતિ યાવદ્વિચાર્યેત તાવત્પૃષ્ટા પુનઃ પુનઃ ॥ ૨૪॥

અથાનુગ્રહતઃ શમ્ભોઃ પ્રાપ્તબુદ્ધિઃ પતિવ્રતા ।
ઉવાચ શ્રૂયતાં સ્વામિન્યજ્જાતં કથયામિ તે ॥ ૨૫॥

અનસૂયોવાચ ।

શઙ્કરસ્ય પ્રતાપાચ્ચ તવૈવ સુકૃતૈસ્તથા ।
ગઙ્ગા સમાગતાત્રૈવ તદીયં સલિલં ત્વિદમ્ ॥ ૨૬॥

સૂત ઉવાચ ।
એવં વચસ્તદા શ્રુત્વા મુનિર્વિસ્મયમાનસઃ ।
પ્રિયામુવાચ સુપ્રીત્યા શઙ્કરં મનસા સ્મરન્ ॥ ૭॥

અત્રિરુવાચ ।
પ્રિયે સુન્દરિ ત્વં સત્યમથ વાચં વ્યલીકકામ્ ।
બ્રવીષિ ચ યથાર્થં ત્વં ન મન્યે દુર્લભં ત્વિદમ્ ॥ ૨૮॥

અસાધ્યં યોગિભિર્યચ્ચ દેવૈરપિ સદા શુભે ।
તચ્ચૈવાદ્ય કથં જાતં વિસ્મયઃ પરમો મમ ॥ ૨૯॥

યદ્યેવં દૃશ્યતે ચેદ્વૈ તન્મન્યેઽહં ન ચાન્યથા ।
ઇતિ તદ્વચનં શ્રુત્વા પ્રત્યુવાચ પતિં પ્રિયા ॥ ૩૦॥

અનસૂયોવાચ ।
આગમ્યતાં મયા સાર્ધં ત્વયા નાથ મહામુને ।
સરિદ્વરાયા ગઙ્ગાયા દ્રષ્ટુમિચ્છા ભવેદ્યદિ ॥ ૩૧॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા તુ સમાદાય પતિં તં સા પતિવ્રતા ।
ગતા દ્રુતં શિવં સ્મૃત્વા યત્ર ગઙ્ગા સરિદ્વરા ॥ ૩૨॥

દર્શયામાસ તાં તત્ર ગઙ્ગાં પત્યે પતિવ્રતા ।
ગર્તે ચ સંસ્થિતાં તત્ર સ્વયં દિવ્યસ્વરૂપિણીમ્ ॥ ૩૩॥

તત્ર ગત્વા ઋષિશ્રેષ્ઠો ગર્તં ચ જલપૂરિતમ્ ।
આકણ્ઠં સુન્દરં દૃષ્ટ્વા ધન્યેયમિતિ ચાબ્રવીત્ ॥ ૩૪॥

કિં મદીયં તપશ્ચૈવ કિમન્યેષાં પુનસ્તદા ।
ઇત્યુક્ત્વા મુનિશાર્દૂલો ભક્ત્યા તુષ્ટાવ તાં તદા ॥ ૩૫॥

તતો હિ સ મુનિસ્તત્ર સુસ્નાતઃ સુભગે જલે ।
આચમ્ય પુનરેવાત્ર સ્તુતિં ચક્રે પુનઃ પુનઃ ॥ ૩૬॥

અનસૂયાપિ સંસ્નાતા સુન્દરે તજ્જલે તદા ।
નિત્યં ચક્રે મુનિઃ કર્મ સાનસૂયાપિ સુવ્રતા ॥ ૩૭॥

તતઃ સોવાચ તાં ગઙ્ગા ગમ્યતે સ્વસ્થલં મયા ।
ઇત્યુક્તે ચ પુનઃ સાધ્વી તામુવાચ સરિદ્વરામ્ ॥ ૩૮॥

અનસૂયોવાચ ।
યદિ પ્રસન્ના દેવેશિ યદ્યસ્તિ ચ કૃપા મયિ ।
ત્વયા સ્થેયં નિશ્ચલત્વાદસ્મિન્દેવિ તપોવને ॥ ૩૯॥

મહતાં ચ સ્વભાવશ્ચ નાઙ્ગીકૃત્ય પરિત્યજેત્ ।
ઇત્યુક્ત્વા ચ કરૌ બદ્ધ્વા તાં તુષ્ટાવ પુનઃ પુનઃ ॥ ૪૦॥

ઋષિશ્ચાપિ તથોવાચ ત્વયા સ્થેયં સરિદ્વરે ।
સાનુકૂલા ભવ ત્વં હિ સનાથાન્દેવિ નઃ કુરુ ॥ ૪૧॥

તદીયં તદ્વચઃ શ્રુત્વા રમ્યં ગઙ્ગા સરિદ્વરા ।
પ્રસન્નમાનસા ગઙ્ગાનસૂયાં વાક્યમબ્રવીત્ ॥ ૪૨॥

ગઙ્ગોવાચ ।
શઙ્કરાર્ચનસમ્ભૂતફલં વર્ષસ્ય યચ્છસિ ।
સ્વામિનશ્ચ તદા સ્થાસ્યે દેવાનામુપકારણાત્ ॥ ૪૩॥

તથા દાનૈર્ન મે તુષ્ટિસ્તીર્થસ્નાનૈસ્તથા ચ વૈ ।
યજ્ઞૈસ્તથાથવા યોગૈર્યથા પાતિવ્રતેન ચ ॥ ૪૪॥

પતિવ્રતાં યથા દૃષ્ટ્વા મનસઃ પ્રીણનં ભવેત્ ।
તથા નાન્યૈરુપાયૈશ્ચ સત્યં મે વ્યાહૃતં સતિ ॥ ૪૫॥

પતિવ્રતાં સ્ત્રિયં દૃષ્ટ્વા પાપનાશો ભવેન્મમ ।
શુદ્ધા જાતા વિશેષેણ ગૌરીતુલ્યા પતિવ્રતા ॥ ૪૬॥

તસ્માચ્ચ યદિ લોકસ્ય હિતાય તત્પ્રયચ્છસિ ।
તર્હ્યહં સ્થિરતાં યાસ્યે યદિ કલ્યાણમિચ્છસિ ॥ ૪૭॥

સૂત ઉવાચ ।
ઇત્યેવં વચનં શ્રુત્વાનસૂયા સા પતિવ્રતા ।
ગઙ્ગાયૈ પ્રદદૌ પુણ્યં સર્વં તદ્વર્ષસમ્ભવમ્ ॥ ૪૮॥

મહતાં ચ સ્વભાવો હિ પરેષાં હિતમાવહેત્ ।
સુવર્ણં ચન્દનં ચેક્ષુરસસ્તત્ર નિદર્શનમ્ ॥ ૪૯॥

એતદ્ દૃષ્ટ્વાનસૂયં તત્કર્મ પાતિવ્રતં મહત્ ।

પ્રસન્નોઽભૂન્મહાદેવઃ પાર્થિવાદાવિરાશુ વૈ ॥ ૫૦॥

શમ્ભુરુવાચ ।
દૃષ્ટ્વા તે કર્મ સાધ્વ્યેતત્ પ્રસન્નોઽસ્મિ પતિવ્રતે ।
વરં બ્રૂહિ પ્રિયે મત્તો યતઃ પ્રિયતરાસિ મે ॥ ૫૧॥

અથ તૌ દમ્પતી શમ્ભુમભૂતાં સુન્દરાકૃતિમ્ ।
પઞ્ચવક્ત્રાદિસંયુક્તં હરં પ્રેક્ષ્ય સુવિસ્મિતૌ ॥ ૫૨॥

નત્વા સ્તુત્વા કરૌ બદ્ધ્વા મહાભક્તિસમન્વિતૌ ।
અવોચેતાં સમભ્યર્ચ્ય શઙ્કરં લોકશઙ્કરમ્ ॥ ૫૩॥

દમ્પતી ઊચતુઃ ।
યદિ પ્રસન્નો દેવેશ પ્રસન્ના જગદમ્બિકા ।
અસ્મિંસ્તપોવને તિષ્ઠ લોકાનાં સુખદો ભવ ॥ ૫૪॥

પ્રસન્ના ચ તદા ગઙ્ગા પ્રસન્નશ્ચ શિવસ્તદા ।
ઉભૌ તૌ ચ સ્થિતૌ તત્ર યત્રાસીદૃષિસત્તમઃ ॥ ૫૫॥

અત્રીશ્વરશ્ચ નામ્નાસીદીશ્વરઃ પરદુઃખહા ।
ગઙ્ગા સાપિ સ્થિતા તત્ર તદા ગર્તેઽથ માયયા ॥ ૫૬॥

તદ્દિનં હિ સમારભ્ય તત્રાક્ષય્યજલં સદા ।
હસ્તમાત્રે હિ તદ્ગર્તે ગઙ્ગા મન્દાકિની હ્યભૂત્ ॥ ૫૭॥

તત્રૈવ ઋષયો દિવ્યાઃ સમાજગ્મુઃ સહાઙ્ગનાઃ ।
તીર્થાત્તીર્થાચ્ચ તે સર્વે યે પુરા નિર્ગતા દ્વિજાઃ ॥ ૫૮॥

યવાશ્ચ વ્રીહયશ્ચૈવ યજ્ઞયાગપરાયણાઃ ।
યુક્તા ઋષિવરૈસ્તૈશ્ચ હોમં ચક્રુશ્ચ તે જનાઃ ॥ ૫૯॥

કર્મભિસ્તૈશ્ચ સન્તુષ્ટા વૃષ્ટિં ચક્રુર્ઘનાસ્તદા ।
આનન્દઃ પરમો લોકે બભૂવાતિ મુનીશ્વરાઃ ॥ ૬૦॥

અત્રીશ્વરસ્ય માહાત્મ્યમિત્યુક્તં વઃ સુખાવહમ્ ।
ભુક્તિમુક્તિપ્રદં સર્વકામદં ભક્તિવર્ધનમ્ ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયામત્રીશ્વરમાહાત્મ્યવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૪.૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥
કોટિરુદ્રસંહિતા

## ૪.૫. પઞ્ચમોઽધ્યાયઃ । બ્રાહ્મણીમરણવર્ણનમ્ ।

સૂત ઉવાચ ।
કાલઞ્જરે ગિરૌ દિવ્યે નીલકણ્ઠો મહેશ્વરઃ ।
લિઙ્ગરૂપઃ સદા ચૈવ ભક્તાનન્દપ્રદઃ સદા ॥ ૧॥

મહિમા તસ્ય દિવ્યોઽસ્તિ શ્રુતિસ્મૃતિપ્રકીર્તિતઃ ।
તીર્થં તદાખ્યયા તત્ર સ્નાનાત્પાતકનાશકૃત્ ॥ ૨॥

રેવાતીરે યાનિ સન્તિ શિવલિઙ્ગાનિ સુવ્રતાઃ ।
સર્વસૌખ્યકરાણીહ તેષાં સઙ્ખ્યા ન વિદ્યતે ॥ ૩॥

સા ચ રુદ્રસ્વરૂપા હિ દર્શનાત્પાપહારિકા ।
તસ્યાં સ્થિતાશ્ચ યે કેચિત્પાષાણાઃ શિવરૂપિણઃ ॥ ૪॥

તથાપિ ચ પ્રવક્ષ્યામિ યથાન્યાનિ મુનીશ્વરાઃ ।
પ્રધાનશિવલિઙ્ગાનિ ભુક્તિમુક્તિપ્રદાનિ ચ ॥ ૫॥

આર્તેશ્વરસુનામા હિ વર્તતે પાપહારકઃ ।
પરમેશ્વર ઇતિ ખ્યાતઃ સિંહેશ્વર ઇતિ સ્મૃતઃ ॥ ૬॥

શર્મેશશ્ચ તથા ચાત્ર કુમારેશ્વર એવ ચ ।
પુણ્ડરીકેશ્વરઃ ખ્યાતો મણ્ડપેશ્વર એવ ચ ॥ ૭॥

તીક્ષ્ણેશનામા તત્રાસીદ્દર્શનાત્પાપહારકઃ ।
ધુન્ધુરેશ્વરનામાસીત્પાપહા નર્મદાતટે ॥ ૮॥

શૂલેશ્વર ઇતિ ખ્યાતસ્તથા કુમ્ભેશ્વરઃ સ્મૃતઃ ।
કુબેરેશ્વરનામાપિ તથા સોમેશ્વરઃ સ્મૃતઃ ॥ ૯॥

નીલકણ્ઠો મઙ્ગલેશો મઙ્ગલાયતનો મહાન્ ।
મહાકપીશ્વરો દેવઃ સ્થાપિતો હિ હનૂમતા ॥ ૧૦॥

તતશ્ચ નન્દિકો દેવો હત્યાકોટિનિવારકઃ ।
સર્વકામાર્થદશ્ચૈવ મોક્ષદો હિ પ્રકીર્તિતઃ ॥ ૧૧॥

નન્દીકેશં ચ યશ્ચૈવ પૂજયેત્પરયા મુદા ।

નિત્યં તસ્યાખિલા સિદ્ધિર્ભવિષ્યતિ ન સંશયઃ ॥ ૧॥

તત્ર તીરે ચ યઃ સ્નાતિ રેવાયાં મુનિસત્તમાઃ ।
તસ્ય કામાશ્ચ સિધ્યન્તિ સર્વં પાપં વિનશ્યતિ ॥ ૧૩॥

ઋષય ઊચુઃ ।
એવં તસ્ય ચ માહાત્મ્યં કથં તત્ર મહામતે ।
નન્દિકેશસ્ય કૃપયા કથ્યતાં ચ ત્વયાધુના ॥ ૧૪॥

સૂત ઉવાચ ।
સમ્યક્ પૃષ્ટં ભવદ્ભિશ્ચ કથયામિ યથાશ્રુતમ્ ।
શૌનકાદ્યાશ્ચ મુનયઃ સર્વે હિ શ◌ૃણુતાદરાત્ ॥ ૧૫॥

પુરા યુધિષ્ઠિરેણૈવં પૃષ્ટશ્ચ ઋષિસત્તમઃ ।
યથોવાચ તથા વચ્મિ ભવત્સ્નેહાનુસારતઃ ॥ ૧૬॥

રેવાયાઃ પશ્ચિમે તીરે કર્ણિકી નામ વૈ પુરી ।
વિરાજતે સુશોભાઢ્યા ચતુર્વર્ણસમાકુલા ॥ ૧૭॥

તત્ર દ્વિજવરઃ કશ્ચિદુતથ્યકુલસમ્ભવઃ ।
કાશ્યાં ગતશ્ચ પુત્રાભ્યામર્પયિત્વા સ્વપત્નિકામ્ ॥ ૧૮॥

તત્રૈવ સ મૃતો વિપ્રઃ પુત્રાભ્યાં ચ શ્રુતં તદા ।
તદીયં ચૈવ તત્કૃત્યં ચક્રાતે પુત્રકાવુભૌ ॥ ૧૯॥

પત્ની ચ પાલયામાસ પુત્રૌ પુત્રહિતૈષિણી ।
કિઞ્ચિચ્ચ વર્જયિત્વા ચ વિભક્તં વૈ ધનં તયા ॥ ૨૦॥

સ્વીયં ચ રક્ષિતં કિઞ્ચિદ્ધનં મરણહેતવે ।
તતશ્ચ દ્વિજપત્ની હિ કિયત્કાલે ગતે ચ સા ॥ ૨૧॥

કદાચિન્મ્રિયમાણા સા વિવિધં પુણ્યમાચરત્ ।
ન મૃતા દૈવયોગેન દ્વિજપત્ની ચ સા દ્વિજાઃ ॥ ૨૨॥

યદા પ્રાણાન્ન મુમુચે માતા દૈવાત્તયોશ્ચ સા ।
તદ્ દ્રુષ્ટ્વા જનનીકષ્ટં પુત્રકાવૂચતુસ્તદા ॥ ૨૩॥

પુત્રાવૂચતુઃ ।
કિં ન્યૂનં વિદ્યતે માતઃ કષ્ટં યદ્વિદ્યતે મહત્ ।
વ્રિયતાં તદ્ દ્રુતં પ્રીત્યા તદાવાં કરવાવહે ॥ ૨૪॥

સૂત ઉવાચ ।
તચ્છ્રુત્વોક્તં તયા તત્ર ન્યૂનં મે વિદ્યતે બહુ ।
તદેવ ક્રિયતે ચેદ્ધૈ સુખેન મરણં ભવેત્ ॥ ૫॥

જ્યેષ્ઠપુત્રશ્ચ યસ્તસ્યાસ્તેનોક્તં કથ્યતાં ત્વયા ।
કરિષ્યામિ તદેતદ્ધિ તયા ચ કથિતં તદા ॥ ૬॥

દ્વિજપત્ન્યુવાચ ।
શૃણુ પુત્ર વચઃ પ્રીત્યા પુરાસીન્મે મનઃસ્પૃહા ।
કાશ્યાં ગન્તું તથા નાસીદિદાનીં મ્રિયતે પુનઃ ॥ ૭॥

મમાસ્થીનિ ત્વયા પુત્ર ક્ષેપણીયાન્યતન્દ્રિતમ્ ।
ગઙ્ગાજલે શુભં તેઽદ્ય ભવિષ્યતિ ન સંશયઃ ॥ ૮॥

સૂત ઉવાચ ।
ઇત્યુક્તે ચ તયા માત્રા સ જ્યેષ્ઠતનયોઽબ્રવીત્ ।
માતરં માતૃભક્તસ્તુ સુવ્રતાં મરણોન્મુખીમ્ ॥ ૨૯॥

પુત્ર ઉવાચ ।
માતસ્ત્વયા સુખેનૈવ પ્રાણાસ્ત્યાજ્યા ન સંશયઃ ।
તવ કાર્યં પુરા કૃત્વા પશ્ચાત્કાર્યં મદીયકમ્ ॥ ૩૦॥

ઇતિ હસ્તે જલં દત્ત્વા યાવત્પુત્રો ગૃહં ગતઃ ।
તાવત્સા ચ મૃતા તત્ર હરસ્મરણતત્પરા ॥ ૩૧॥

તસ્યાશ્ચૈવ તુ યત્કૃત્યં તત્સર્વં સંવિધાય સઃ ।
માસિકં કર્મ કૃત્વા તુ ગમનાય પ્રચક્રમે ॥ ૩॥

દ્વયોઃ શ્રેષ્ઠતરો યો વૈ સુવાદો નામ વિશ્રુતઃ ।
તદસ્થીનિ સમાદાય નિઃસૃતસ્તીર્થકામ્યયા ॥ ૩૩॥

સઙ્ગૃહ્ય સેવકં કઞ્ચિત્તેનૈવ સહિતસ્તદા ।
આશ્વાસ્ય ભાર્યાં પુત્રાઁશ્ચ માતુઃ પ્રિયચિકીર્ષયા ॥ ૩૪॥

શ્રાદ્ધદાનાદિકં ભોજ્યં કૃત્વા વિધિમનુત્તમમ્ ।
મઙ્ગલસ્મરણં કૃત્વા નિર્જગામ ગૃહાદ્ દ્વિજઃ ॥ ૩૫॥

તદ્દિને યોજનં ગત્વા વિંશતિ ગ્રામકે શુભે ।
ઉવાસાસ્તં ગતે ભાનૌ ગૃહે વિપ્રસ્ય કસ્યચિત્ ॥ ૩૬॥

ચક્રે સન્ધ્યાદિ સત્કર્મ સ દ્વિજો વિધિપૂર્વકમ્ ।
સ્તવાદિ કૃતવાંસ્તત્ર શમ્ભોરદ્ભુતકર્મણઃ ॥ ૩૭॥

સેવકેન તદા યુક્તો બ્રાહ્મણઃ સંસ્થિતસ્તદા ।
યામિની ચ ગતા તત્ર મુહૂર્તદ્વયસમ્મિતા ॥ ૩૮॥

એતસ્મિન્નન્તરે તત્રૈકમાશ્ચર્યમભૂત્તદા ।
શૃણુતાદરતસ્તચ્ચ મુનયો વો વદામ્યહમ્ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં નન્દિકેશ્વરમાહાત્મ્યે બ્રાહ્મણીમરણવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૪.૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૬. ષષ્ઠોઽધ્યાયઃ । બ્રાહ્મણીસ્વર્ગતિવર્ણનમ્ ।

સૂત ઉવાચ ।
ગૌશ્ચૈકાપ્યભવત્તત્ર હ્યઙ્ગણે બન્ધિતા શુભા ।
તદૈવ બ્રાહ્મણો રાત્રાવાજગામ બહિર્ગતઃ ॥ ૧॥

સ ઉવાચ પ્રિયાં સ્વીયાં દૃષ્ટ્વા ગામઙ્ગણે સ્થિતામ્ ।
અદુગ્ધાં ખેદનિર્વિણ્ણો દોગ્ધુકામો મુનીશ્વરાઃ ॥ ૨॥

ગૌઃ પ્રિયે નૈવ દુગ્ધા તે સેત્યુક્ત્વા વત્સમાનયત્ ।
દોહનાર્થં સમાહૂય સ્ત્રિયં શીઘ્રતરં તદા ॥ ૩॥

વત્સં કીલે સ્વયં બદ્ધું યત્નં ચૈવાકરોત્તદા ।
બ્રાહ્મણઃ સ ગૃહસ્વામી મુનયો દુગ્ધલાલસઃ ॥ ૪॥

વત્સોઽપિ કર્ષમાણશ્ચ પાદે વૈ પાદપીડનમ્ ।
ચકાર બ્રાહ્મણશ્ચૈવ કષ્ટં પ્રાપ્તશ્ચ સુવ્રતાઃ ॥ ૫॥

તેન પાદપ્રહારેણ સ દ્વિજઃ ક્રોધમૂર્છિતઃ ।
વત્સં ચ તાડયામાસ કૂર્પૈર્દૃઢતરં તદા ॥ ૬॥

વત્સોઽપિ પીડિતસ્તેન શ્રાન્તશ્ચૈવાભવત્તદા ।

દુગ્ધા ગૌર્મોચિતો વત્સો ન ક્રોધેન દ્વિજન્મના ॥ ૭॥

ગૌર્દોગ્ધું ચ મહત્પ્રીત્યા રોદનં ચાકરોત્તદા ।
દૃષ્ટ્વા ચ રોદનં તસ્યા વત્સો વાક્યમથાબ્રવીત્ ॥ ૮॥

વત્સ ઉવાચ ।
કથં ચ રુદ્યતે માતઃ કિં તે દુઃખમુપસ્થિતમ્ ।
તન્નિવેદય મે પ્રીત્યા તચ્છ્રુત્વા ગૌરવોચત ॥ ૯॥

શ્રૂયતાં પુત્ર મે દુઃખં વક્તું શક્નોમ્યહં ન હિ ।
દુષ્ટેન તાડિતસ્ત્વં ચ તેન દુઃખં મમાપ્યભૂત્ ॥ ૧૦॥

સૂત ઉવાચ ।
સ્વમાતુર્વચનં શ્રુત્વા સ વત્સઃ પ્રત્યબોધયત્ ।
પ્રત્યુવાચ સ્વજનનીં પ્રારબ્ધપરિનિષ્ઠિતઃ ॥ ૧૧॥

કિં કર્ત્તવ્યં ક્વ ગન્તવ્યં કર્મબદ્ધા વયં યતઃ ।
કૃતં ચૈવ યથા પૂર્વં ભુજ્યતે ચ તથાધુના ॥ ૧૨॥

હસતા ક્રિયતે કર્મ રુદતા પરિભુજ્યતે ।
દુઃખદાતા ન કોઽપ્યસ્તિ સુખદાતા ન કશ્ચન ॥ ૧૩॥

સુખદુઃખે પરો દત્ત ઇત્યેષા કુમતિર્મતા ।
અહં ચાપિ કરોમ્યત્ર મિથ્યાજ્ઞાનં તદોચ્યતે ॥ ૧૪॥

સ્વકર્મણા ભવેદ્દુઃખં સુખં તેનૈવ કર્મણા ।
તસ્માચ્ચ પૂજ્યતે કર્મ સર્વં કર્મણિ સંસ્થિતમ્ ॥ ૧૫॥

ત્વં ચૈવાહં ચ જનની ઇમે જીવાદયશ્ચ યે ।
તે સર્વે કર્મણા બદ્ધા ન શોચ્યાઃ કર્હિચિત્ત્વયા ॥ ૧૬॥

સૂત ઉવાચ ।
એવં શ્રુત્વા સ્વપુત્રસ્ય વચનં જ્ઞાનગર્ભિતમ્ ।
પુત્રશોકાન્વિતા દીના સા ચ ગૌરબ્રવીદિદમ્ ॥ ૧૭॥

ગૌરુવાચ ।
વત્સ સર્વં વિજાનાસિ કર્માધીનાઃ પ્રજા ઇતિ ।
તથાપિ માયયા ગ્રસ્તા દુઃખં પ્રાપ્નોમ્યહં પુનઃ ॥ ૧૮॥

રોદનં ચ કૃતં ભૂરિ દુઃખશાન્તિર્ભવેન્ન હિ ।

ઇત્યેતદ્વચનં શ્રુત્વા પ્રસૂં વત્સોઽબ્રવીદિદમ્ ॥ ૧૯॥

વત્સ ઉવાચ ।
યદ્યેવં ચ વિજાનાસિ પુનશ્ચ રુદનં કુતઃ ।
કૃત્વા ચ સાધ્યતે કિઞ્ચિત્તસ્માદ્દુઃખં ત્યજાધુના ॥ ૨૦॥

સૂત ઉવાચ ।
એવં પુત્રવચઃ શ્રુત્વા તન્માતા દુઃખસંયુતા ।
નિઃશ્વસ્યાતિ તદા ધેનુર્વત્સં વચનમબ્રવીત્ ॥ ૨૧॥

ગૌરુવાચ ।
મમ દુઃખં તદા ગચ્છેદ્યદા દુઃખં તથાવિધમ્ ।
ભવેદ્ધિ બ્રાહ્મણસ્યાપિ સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૨૨॥

પ્રાતશ્ચૈવ મયા પુત્ર શૃઙ્ગાભ્યાં હિ હનિષ્યતે ।
હતસ્ય જીવિતં સદ્યો યાસ્યત્યસ્ય ન સંશયઃ ॥ ૨૩॥

વત્સ ઉવાચ ।
પ્રથમં યત્કૃતં કર્મ તત્ફલં ભુજ્યતેઽધુના ।
અસ્યાશ્ચ બ્રહ્મહત્યાયા માતઃ કિં ફલમાપ્સ્યસે ॥ ૨૪॥

સમાભ્યાં પુણ્યપાપાભ્યાં ભવેજ્જન્મ ચ ભારતે ।
તયોઃ ક્ષયે ચ ભોગેન માતર્મુક્તિરવાપ્યતે ॥ ૨૫॥

કદાપિ કર્મણો નાશઃ કદા ભોગઃ પ્રજાયતે ।
તસ્માચ્ચ પુનરેવં ત્વં કર્મ મા કર્તુમુદ્યતા ॥ ૨૬॥

અહં કુતસ્તે પુત્રોઽદ્ય ત્વં માતા કુત એવ ચ ।
વૃથાભિમાનઃ પુત્રત્વે માતૃત્વે ચ વિચાર્યતામ્ ॥ ૨૭॥

ક્વ માતા ક્વ પિતા વિદ્ધિ ક્વ સ્વામી ક્વ કલત્રકમ્ ।
ન કોઽપિ કસ્ય ચાસ્તીહ સર્વેઽપિ સ્વકૃતમ્ભુજઃ ॥ ૨૮॥

એવં જ્ઞાત્વા ત્વયા માતર્દુઃખં ત્યાજ્યં સુયત્નતઃ ।
સુભગાચરણં કાર્યં પરલોકસુખેપ્સયા ॥ ૯॥

ગૌરુવાચ ।
એવં જાનામ્યહં પુત્ર માયા માં ન જહાત્યસૌ ।
ત્વદ્દુઃખેન સમં દુઃખં તસ્મૈ દાસ્યે તદેવ હિ ॥ ૩૦॥

પુનશ્ચ બ્રહ્મહત્યાયા નાશો યત્ર ભવેદિહ ।
તત્સ્થલં ચ મયા દૃષ્ટં હત્યા મે હિ ગમિષ્યતિ ॥ ૩૧॥

સૂત ઉવાચ ।
ઇત્યેતદ્વચનં શ્રુત્વા સ્વમાતુર્ગોર્દ્વિજોત્તમાઃ ।
મૌનત્વં સ્વીકૃતં તત્ર વત્સેનોક્તં ન કિઞ્ચન ॥ ૩॥

તયોસ્તદદ્ભુતં વૃત્તં શ્રુત્વા પાન્થો દ્વિજસ્તદા ।
હૃદા વિચારયામાસ વિસ્મિતો હિ મુનીશ્વરાઃ ॥ ૩૩॥

ઇદમત્યદ્ભુતં વૃત્તં દૃષ્ટ્વા પ્રાતર્મયા ખલુ ।
ગન્તવ્યં પુનરેવાતો ગન્તવ્યં તત્સ્થલં પુનઃ ॥ ૩૪॥

સૂત ઉવાચ ।
વિચાર્યેતિ હૃદા વિપ્રઃ સ દ્વિજાઃ સેવકેન ચ ।
સુષ્વાપ તત્ર જનનીભક્તઃ પરમવિસ્મિતઃ ॥ ૩૫॥

પ્રાતઃકાલે તદા જાતે ગૃહસ્વામી સમુત્થિતઃ ।
બોધયામાસ તં પાન્થં વચનં ચેદમબ્રવીત્ ॥ ૩૬॥

દ્વિજ ઉવાચ ।
સ્વપિષિ ત્વં કિમર્થં હિ પ્રાતઃકાલો ભવત્યલમ્ ।
સ્વયાત્રાં કુરુ તં દેશં ગમનેચ્છા ચ યત્ર હ ॥ ૩૭॥

તેનોક્તં શ્રૂયતાં બ્રહ્મન્ શરીરે સેવકસ્ય મે ।
વર્તતે હિ વ્યથા સ્થિત્વા મુહૂર્તં ગમ્યતે તતઃ ॥ ૩૮॥

સૂત ઉવાચ ।
ઇત્યેવં ચ મિષં કૃત્વા સુષ્વાપ પુરુષસ્તદા ।
તદ્વૃત્તમખિલં જ્ઞાતુમદ્ભુતં વિસ્મયાવહમ્ ॥ ૩૯॥

દોહનસ્ય તદા કાલે બ્રાહ્મણઃ સ્વસુતં પ્રતિ ।
ઉવાચ ગન્તુકામશ્ચ કાર્યાર્થં કુત્રચિચ્ચ સઃ ॥ ૪૦॥

પિતોવાચ ।
મયા તુ ગમ્યતે પુત્ર કાર્યાર્થં કુત્રચિત્પુનઃ ।
ધેનુર્દોહ્યા ત્વયા વત્સ સાવધાનાદિયં નિજા ॥ ૪૧॥

સૂત ઉવાચ ।

ઇત્યુક્ત્વા બ્રાહ્મણવરઃ સ જગામ ચ કુત્રચિત્ ।
પુત્રઃ સમુત્થિતસ્તત્ર વત્સં ચ મુક્તવાંસ્તદા ॥ ૪૨॥

માતા ચ તસ્ય દોહાર્થમાજગામ સ્વયં તદા ।
દ્વિજપુત્રસ્તદા વત્સં ખિન્નં કીલેન તાડિતમ્ ॥ ૪૩॥

બન્ધનાર્થં હિ ગોઃ પાર્શ્વમનયદ્દુગ્ધલાલસઃ ।
પુનર્ગૌશ્ચ તદા ક્રુદ્ધા શ‍ૃઙ્ગેનાતાડયચ્ચ તમ્ ॥ ૪૪॥

પપાત મૂર્ચ્છાં સમ્પ્રાપ્ય સોઽપિ મર્મણિ તાડિતઃ ।
લોકાશ્ચ મિલિતાસ્તત્ર ગવા બાલો વિહિંસિતઃ ॥ ૪૫॥

જલં જલં વદન્તસ્તે પિત્રાદ્યા યત્ર સંસ્થિતાઃ ।
યત્નશ્ચ ક્રિયતે યાવત્તાવદ્ બાલો મૃતસ્તદા ॥ ૪૬॥

મૃતે ચ બાલકે તત્ર હાહાકારો મહાનભૂત્ ।
તન્માતા દુઃખિતા હ્યાસીદ્ રુરોદ ચ પુનઃ પુનઃ ॥ ૪૭॥

કિં કરોમિ ક્વ ગચ્છામિ કો મે દુઃખં વ્યપોહયેત્ ।
રુદિત્વેતિ તદા ગાં ચ તાડયિત્વા વ્યમોચયત્ ॥ ૪૮॥

શ્વેતવર્ણા તદા સા ગૌર્દ્રુતં શ્યામા વ્યદૃશ્યત ।
અહો ચ દૃશ્યતાં લોકાશ્ચુક્રુશુશ્ચ પરસ્પરમ્ ॥ ૪૯॥

બ્રાહ્મણશ્ચ તદા પાન્થો દૃષ્ટ્વાશ્ચર્યં વિનિર્ગતઃ ।
યત્ર ગૌશ્ચ ગતા તત્ર તામનુ બ્રાહ્મણો ગતઃ ॥ ૫૦॥

ઊર્ધ્વપુચ્છં તદા કૃત્વા શીઘ્રં ગૌર્નર્મદાં પ્રતિ ।
આગત્ય નન્દિકસ્યાસ્ય સમીપે નર્મદાજલે ॥ ૫૧॥

સન્નિમજ્ય ત્રિવારં તુ શ્વેતત્વં ચ ગતા હિ સા ।
યથાગતં ગતા સા ચ બ્રાહ્મણો વિસ્મયં ગતઃ ॥ ૫૨॥

અહો ધન્યતમં તીર્થં બ્રહ્મહત્યાનિવારણમ્ ।
સ્વયં મમજ્જ તત્રાસૌ બ્રાહ્મણઃ સેવકસ્તથા ॥ ૫૩॥

નિમજ્જ્ય હિ ગતૌ તૌ ચ પ્રશંસન્તૌ નદીં ચ તામ્ ।
માર્ગે ચ મિલિતા કાચિત્સુન્દરી ભૂષણાન્વિતા ॥ ૫૪॥

તયોક્તં તં ચ ભોઃ પાન્થ કુતો યાસિ સુવિસ્મિતઃ ।
સત્યં બ્રૂહિ ચ્છલં ત્યક્ત્વા વિપ્રવર્ય મમાગ્રતઃ ॥ ૫૫॥

સૂત ઉવાચ ।
એવં વચસ્તદા શ્રુત્વા દ્વિજેનોક્તં યથાતથમ્ ।
પુનશ્ચાયં દ્વિજસ્તત્ર સ્ત્રિયોક્તઃ સ્થીયતાં ત્વયા ॥ ૫૬॥

તયોક્તં ચ સમાકર્ણ્ય સ્થિતઃ સ બ્રાહ્મણસ્તતઃ ।
પ્રત્યુવાચ વિનીતાત્મા કથ્યતે કિં વદેતિ ચ ॥ ૫૭॥

સા ચાહ પુનરેવાત્ર ત્વયા દૃષ્ટં સ્થલં ચ યત્ ।
તત્રાધુના ક્ષિપાસ્થીનિ માતુઃ કિં ગમ્યતેઽન્યતઃ ॥ ૫૮॥

તવ માતા પાન્થવર્ય સાક્ષાદ્દિવ્યમયં વરમ્ ।
દેહં ધૃત્વા દ્રુતં સાક્ષાચ્છમ્ભોર્યાસ્યતિ સદ્ગતિમ્ ॥ ૫૯॥

વૈશાખે ચૈવ સમ્પ્રાપ્તે સપ્તમ્યાશ્ચ દિને શુભે ।
સિતે પક્ષે સદા ગઙ્ગા હ્યાયાતિ દ્વિજસત્તમ ॥ ૬૦॥

અદ્યૈવ સપ્તમી યા સા ગન્ગાઽહં યામિ તત્ર વૈ ।
ઇત્યુક્ત્વાન્તર્દધે દેવી સા ગઙ્ગા મુનિસત્તમાઃ ॥ ૬૧॥

નિવૃત્તશ્ચ દ્વિજઃ સોઽપિ માત્રસ્થ્યર્દ્ધં સ્વવસ્ત્રતઃ ।
ક્ષિપેદ્યાવત્તત્ર તીર્થે તાવચ્ચિત્રમભૂત્તદા ॥ ૬૨॥

દિવ્યદેહત્વમાપન્ના સ્વમાતા ચ વ્યદૃશ્યત ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ પવિત્રં ચ કુલં ત્વયા ॥ ૬૩॥

ધનં ધાન્યં તથા ચાયુર્વંશો વૈ વર્ધતાં તવ ।
ઇત્યાશિષં મુહુર્દત્ત્વા સ્વપુત્રાય દિવં ગતા ॥ ૬૪॥

તત્ર ભુક્ત્વા સુખં ભૂરિ ચિરકાલં મહોત્તમમ્ ।
શઙ્કરસ્ય પ્રસાદેન ગતા સા હ્યુત્તમાં ગતિમ્ ॥ ૬૫॥

બ્રાહ્મણશ્ચ સુતસ્તસ્યાઃ ક્ષિપ્ત્વાસ્થીનિ પુનસ્તતઃ ।
પ્રસન્નમાનસોઽભૂત્સ શુદ્ધાત્મા સ્વગૃહં ગતઃ ॥ ૬૬॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં નન્દિકેશ્વરલિઙ્ગમાહાત્મ્યવર્ણને બ્રાહ્મણીસ્વર્ગતિવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૪.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૭. સપ્તમોઽધ્યાયઃ । નન્દિકેશ્વરશિવલિઙ્ગમાહાત્મ્યવર્ણનમ્ ।

ઋષય ઊચુઃ ।
કથં ગઙ્ગા સમાયાતા વૈશાખે સપ્તમીદિને ।
નર્મદાયાં વિશેષેણ સૂતૈતદ્વર્ણય પ્રભો ॥ ૧॥

ઈશ્વરશ્ચ કથં જાતો નન્દિકેશો હિ નામતઃ ।
વૃત્તં તદપિ સુપ્રીત્યા કથય ત્વં મહામતે ॥ ૨॥

સૂત ઉવાચ ।
સાધુ પૃષ્ટમૃષિશ્રેષ્ઠા નન્દિકેશાશ્રિતં વચઃ ।
તદહં કથયામ્યદ્ય શ્રવણાત્પુણ્યવર્ધનમ્ ॥ ૩॥

બ્રાહ્મણી ઋષિકા નામ્ની કસ્યચિચ્ચ દ્વિજન્મનઃ ।
સુતા વિવાહિતા કસ્મૈચિદ્ દ્વિજાય વિધાનતઃ ॥ ૪॥

પૂર્વકર્મપ્રભાવેણ પત્ની સા હિ દ્વિજન્મનઃ ।
સુવ્રતાપિ ચ વિપ્રેન્દ્રા બાલવૈધવ્યમાગતા ॥ ૫॥

અથ સા દ્વિજપત્ની હિ બ્રહ્મચર્યવ્રતાન્વિતા ।
પાર્થિવાર્ચનપૂર્વં હિ તપસ્તેપે સુદારુણમ્ ॥ ૬॥

તસ્મિન્નવસરે દુષ્ટો મૂઢનામાસુરો બલી ।
યયૌ તત્ર મહામાયી કામબાણેન તાડિતઃ ॥ ૭॥

તપન્તીં તાં સમાલોક્ય સુન્દરીમતિકામિનીમ્ ।
તયા ભોગં યયાચે સ નાનાલોભં પ્રદર્શયન્ ॥ ૮॥

અથ સા સુવ્રતા નારી શિવધ્યાનપરાયણા ।
તસ્મિન્દૃષ્ટિં દધૌ નૈવ કામદૃષ્ટ્યા મુનીશ્વરાઃ ॥ ૯॥

ન માનિતવતી તં ચ બ્રાહ્મણી સા તપોરતા ।
અતીવ હિ તપોનિષ્ઠાસીચ્છિવધ્યાનમાશ્રિતા ॥ ૧૦॥

અથ મૂઢઃ સ દૈત્યેન્દ્રઃ તયા તન્વ્યા તિરસ્કૃતઃ ।
ચુક્રોધ વિકટં તસ્યૈ પશ્ચાદ્રૂપમદર્શયત્ ॥ ૧૧॥

અથ પ્રોવાચ દુષ્ટાત્મા દુર્વચો ભયકારકમ્ ।
ત્રાસયામાસ બહુશસ્તાં ચ પત્નીં દ્વિજન્મનઃ ॥ ૧૨॥

તદા સા ભયસન્ત્રસ્તા બહુવારં શિવેતિ ચ ।
બભાષે સ્નેહતસ્તન્વી દ્વિજપત્ની શિવાશ્રયા ॥ ૧૩॥

વિહ્વલાતીવ સા નારી શિવનામપ્રભાષિણી ।
જગામ શરણં શમ્ભોઃ સ્વધર્માવનહેતવે ॥ ૧૪॥

શરણાગતરક્ષાર્થં કર્તું સદ્વૃત્તમાહિતમ્ ।
આનન્દાર્થં હિ તસ્યાસ્તુ શિવ આવિર્બભૂવ હ ॥ ૧૫॥

અથ તં મૂઢનામાનં દૈત્યેન્દ્રં કામવિહ્વલમ્ ।
ચકાર ભસ્મસાત્સદ્યઃ શઙ્કરો ભક્તવત્સલઃ ॥ ૧૬॥

તતશ્ચ પરમેશાનો કૃપાદૃષ્ટ્યા વિલોક્ય તામ્ ।
વરં બ્રૂહીતિ ચોવાચ ભક્તરક્ષણદક્ષધીઃ ॥ ૧૭॥

શ્રુત્વા મહેશવચનં સા સાધ્વી દ્વિજકામિની ।
દદર્શ શાઙ્કરં રૂપમાનન્દજનકં શુભમ્ ॥ ૧૮॥

તતઃ પ્રણમ્ય તં શમ્ભું પરમેશં સુખાવહમ્ ।
તુષ્ટાવ સાઞ્જલિઃ સાધ્વી નતસ્કન્ધા શુભાશયા ॥ ૧૯॥

ઋષિકોવાચ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
દીનબન્ધુસ્ત્વમીશાનો ભક્તરક્ષાકરઃ સદા ॥ ૨૦॥

ત્વયા મે રક્ષિતો ધર્મો મૂઢનામ્નોઽસુરાદિહ ।
યદયં નિહતો દુષ્ટો જગદ્રક્ષા કૃતા ત્વયા ॥ ૨૧॥

સ્વપાદયોઃ પરાં ભક્તિં દેહિ મે હ્યનપાયિનીમ્ ।
અયમેવ વરો નાથ કિમન્યદધિકં હ્યતઃ ॥ ૨૨॥

અન્યદાકર્ણય વિભો પ્રાર્થનાં મે મહેશ્વર ।
લોકાનામુપકારાર્થમિહ ત્વં સંસ્થિતો ભવ ॥ ૨૩॥

સૂત ઉવાચ ।
ઇતિ સ્તુત્વા મહાદેવમૃષિકા સા શુભવ્રતા ।
તૂષ્ણીમાસાથ ગિરિશઃ પ્રોવાચ કરુણાકરઃ ॥ ૨૪॥

ગિરિશ ઉવાચ ।
ઋષિકે સુચરિત્રા ત્વં મમ ભક્તા વિશેષતઃ ।
દત્તા વરાશ્ચ તે સર્વે તુભ્યં યે યે હિ યાચિતાઃ ॥ ૨૫॥

એતસ્મિન્નન્તરે તત્ર હરિબ્રહ્માદયઃ સુરાઃ ।
શિવાવિર્ભાવમાજ્ઞાય યયુર્હર્ષસમન્વિતાઃ ॥ ૨૬॥

શિવં પ્રણમ્ય સુપ્રીત્યા સમાનર્ચુશ્ચ તેઽખિલાઃ ।
તુષ્ટુવુર્નતકા વિપ્રાઃ કરૌ બદ્ધ્વા સુચેતસઃ ॥ ૨૭॥

એતસ્મિન્સમયે ગઙ્ગા સાધ્વીં તાં સ્વર્ધુની જગૌ ।
ઋષિકાં સુપ્રસન્નાત્મા પ્રશંસન્તી ચ તદ્વિધિમ્ ॥ ૨૮॥

ગઙ્ગોવાચ ।
મમાર્થં ચૈવ વૈશાખે માસિ દેયં ત્વયા વચઃ ।
સ્થિત્યર્થં દિનમેકં મે સામીપ્યં કાર્યમેવ હિ ॥ ૨૯॥

સૂત ઉવાચ ।
ગઙ્ગાવચનમાકર્ણ્ય સા સાધ્વી પ્રાહ સુવ્રતા ।
તથાસ્ત્વિતિ વચઃ પ્રીત્યા લોકાનાં હિતહેતવે ॥ ૩૦॥

આનન્દાર્થં શિવસ્તસ્યાઃ સુપ્રસન્નશ્ચ પાર્થિવે ।
તસ્મિઁલ્લિઙ્ગે લયં યાતઃ પૂર્ણાંશેન તયા હરઃ ॥ ૩૧॥

દેવાઃ સર્વે સુપ્રસન્નાઃ પ્રશંસન્તિ શિવં ચ તામ્ ।
સ્વં સ્વં ધામ યયુર્વિષ્ણુર્બ્રહ્માદ્યા અપિ સ્વર્ણદી ॥ ૩૨॥

તદ્દિનાત્પાવનં તીર્થમાસીદીદૃશમુત્તમમ્ ।
નન્દિકેશઃ શિવઃ ખ્યાતઃ સર્વપાપવિનાશનઃ ॥ ૩૩॥

ગઙ્ગાપિ પ્રતિવર્ષં તદ્દિને યાતિ શુભેચ્છયા ।
ક્ષાલનાર્થં સ્વપાપસ્ય યદ્ ગૃહીતં નૃણાં દ્વિજાઃ ॥ ૩૪॥

તત્ર સ્નાતો નરઃ સમ્યઙ્ નન્દિકેશં સમર્ચ્ય ચ ।
બ્રહ્મહત્યાદિભિઃ પાપૈર્મુચ્યતે હ્યખિલૈરપિ ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં નન્દિકેશ્વરશિવલિઙ્ગમાહાત્મ્યવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૪.૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૮. અષ્ટમોઽધ્યાયઃ । મહાબલમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
દ્વિજાઃ શૃણુત સદ્ભક્ત્યા શિવલિઙ્ગાનિ તાનિ ચ ।
પશ્ચિમાયાં દિશાયાં વૈ યાનિ ખ્યાતાનિ ભૂતલે ॥ ૧॥

કપિલાયાં નગર્યાં તુ કાલરામેશ્વરાભિધે ।
શિવલિઙ્ગે મહાદિવ્યે દર્શનાત્પાપહારકે ॥ ૨॥

પશ્ચિમે સાગરે ચૈવ મહાસિદ્ધેશ્વરઃ સ્મૃતઃ ।
ધર્માર્થકામદશ્ચૈવ તથા મોક્ષપ્રદોઽપિ હિ ॥ ૩॥

પશ્ચિમામ્બુધિતીરસ્થં ગોકર્ણં ક્ષેત્રમુત્તમમ્ ।
બ્રહ્મહત્યાદિપાપઘ્નં સર્વકામફલપ્રદમ્ ॥ ૫॥

ગોકર્ણે શિવલિઙ્ગાનિ વિદ્યન્તે કોટિકોટિશઃ ।
અસઙ્ખ્યાતાનિ તીર્થાનિ તિષ્ઠન્તિ ચ પદે પદે ॥ ૫॥

બહુનાત્ર કિમુક્તેન ગોકર્ણસ્થાનિ સર્વશઃ ।
શિવપ્રત્યક્ષલિઙ્ગાનિ તીર્થાન્યમ્ભાંસિ સર્વશઃ ॥ ૬॥

ગોકર્ણે શિવલિઙ્ગાનાં તીર્થાનામપિ સર્વશઃ ।
વર્ણ્યતે મહિમા તાત પુરાણેષુ મહર્ષિભિઃ ॥ ૭॥

કૃતે યુગે સ હિ શ્વેતસ્ત્રેતાયાં સોઽતિલોહિતઃ ।
દ્વાપરે પીતવર્ણશ્ચ કલૌ શ્યામો ભવિષ્યતિ ॥ ૮॥

આક્રાન્તસપ્તપાતાલકુહરોઽપિ મહાબલઃ ।
પ્રાપ્તે કલિયુગે ઘોરે મૃદુતામુપયાસ્યતિ ॥ ૯॥

મહાપાતકિનશ્ચાત્ર સમભ્યર્ચ્ય મહાબલમ્ ।
શિવલિઙ્ગં ચ ગોકર્ણે પ્રયાતાઃ શાઙ્કરં પદમ્ ॥ ૧૦॥

ગોકર્ણે તત્ર મુનયો ગત્વા પુણ્યર્ક્ષવાસરે ।
યેઽર્ચયન્તિ ચ તં ભક્ત્યા તે રુદ્રાઃ સ્યુર્ન સંશયઃ ॥ ૧૧॥

યદા કદાચિદ્ગોકર્ણે યો વા કો વાપિ માનવઃ ।
પૂજયેચ્છિવલિઙ્ગં તત્સ ગચ્છેદ્ બ્રહ્મણઃ પદમ્ ॥ ૧૨॥

બ્રહ્મવિષ્ણ્વાદિદેવાનાં શઙ્કરો હિતકામ્યયા ।
મહાબલાભિધાનેન દેવઃ સન્નિહિતઃ સદા ॥ ૧૩॥

ઘોરેણ તપસા લબ્ધં રાવણાખ્યેન રક્ષસા ।
તલ્લિઙ્ગં સ્થાપયામાસ ગોકર્ણે ગણનાયકઃ ॥ ૧૪॥

વિષ્ણુર્બ્રહ્મા મહેન્દ્રશ્ચ વિશ્વેદેવા મરુદ્ગણાઃ ।
આદિત્યા વસવો દસ્રૌ શશાઙ્કશ્ચ સતારકઃ ॥ ૧૫॥

એતે વિમાનગતયો દેવાશ્ચ સહ પાર્ષદૈઃ ।
પૂર્વદ્વારં નિષેવન્તે તસ્ય વૈ પ્રીતિકારણાત્ ॥ ૧૬॥

યમો મૃત્યુઃ સ્વયં સાક્ષાચ્ચિત્રગુપ્તશ્ચ પાવકઃ ।
પિતૃભિઃ સહ રુદ્રૈશ્ચ દક્ષિણદ્વારમાશ્રિતઃ ॥ ૧૭॥

વરુણઃ સરિતાં નાથો ગઙ્ગાદિસરિતાં ગણૈઃ ।
મહાબલં ચ સેવન્તે પશ્ચિમદ્વારમાશ્રિતાઃ ॥ ૧૮॥

તથા વાયુઃ કુબેરશ્ચ દેવેશી ભદ્રકાલિકા ।
માતૃભિશ્ચણ્ડિકાદ્યાભિરુત્તરદ્વારમાશ્રિતાઃ ॥ ૧૯॥

સર્વે દેવાઃ સગન્ધર્વાઃ પિતરઃ સિદ્ધચારણાઃ ।
વિદ્યાધરાઃ કિમ્પુરુષાઃ કિન્નરા ગુહ્યકાઃ ખગાઃ ॥ ૨૦॥

નાનાપિશાચા વેતાલા દૈતેયાશ્ચ મહાબલાઃ ।
નાગાઃ શેષાદયઃ સર્વે સિદ્ધાશ્ચ મુનયોઽખિલાઃ ॥ ૨૧॥

પ્રણુવન્તિ ચ તં દેવં પ્રણમન્તિ મહાબલમ્ ।
લભન્ત ઈપ્સિતાન્કામાન્ રમન્તે ચ યથાસુખમ્ ॥ ૨૨॥

બહુભિસ્તત્ર સુતપસ્તપ્તં સમ્પૂજ્ય તં વિભુમ્ ।
લબ્ધા હિ પરમા સિદ્ધિરિહામુત્રાપિ સૌખ્યદા ॥ ૨૩॥

ગોકર્ણે શિવલિઙ્ગં તુ મોક્ષદ્વાર ઉદાહૃતઃ ।
મહાબલાભિધાનોઽસૌ પૂજિતઃ સંસ્તુતો દ્વિજાઃ ॥ ૨૪॥

માઘાસિતચતુર્દશ્યાં મહાબલસમર્ચનમ્ ।
વિમુક્તિદં વિશેષેણ સર્વેષાં પાપિનામપિ ॥ ૨૫॥

અસ્યાં શિવતિથૌ સર્વે મહોત્સવદિદૃક્ષવઃ ।
આયાન્તિ સર્વદેશેભ્યશ્ચાતુર્વર્ણ્યમહાજનાઃ ॥ ૨૬॥

સ્ત્રિયો વૃદ્ધાશ્ચ બાલાશ્ચ ચતુરાશ્રમવાસિનઃ ।
દૃષ્ટ્વા તત્રૈત્ય દેવેશં લેભિરે કૃતકૃત્યતામ્ ॥ ૨૭॥

મહાબલપ્રભાવાત્તે તચ્ચ લિઙ્ગં શિવસ્ય તુ ।
સમ્પૂજ્યૈકાથ ચાણ્ડાલી શિવલોકં ગતા દ્રુતમ્ ॥ ૨૮॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં મહાબલમાહાત્મ્યવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૪.૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૯. નવમોઽધ્યાયઃ । ચાણ્ડાલીસદ્ગતિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ ધન્યસ્ત્વં શૈવસત્તમઃ ।
ચાણ્ડાલી કા સમાખ્યાતા તત્કથાં કથય પ્રભો ॥ ૧॥

સૂત ઉવાચ ।
દ્વિજાઃ શ‍ૃણુત સદ્ભક્ત્યા તાં કથાં પરમાદ્ભુતામ્ ।
શિવપ્રભાવસમ્મિશ્રાં શ‍ૃણ્વતાં ભક્તિવર્ધિનીમ્ ॥ ૨॥

ચાણ્ડાલી સા પૂર્વભવેઽભવદ્ બ્રાહ્મણકન્યકા ।
સૌમિની નામ ચન્દ્રાસ્યા સર્વલક્ષણસંયુતા ॥ ૩॥

અથ સા સમયે કન્યા યુવતિઃ સૌમિની દ્વિજાઃ ।
પિત્રા દત્તા ચ કસ્મૈચિદ્વિધિના દ્વિજસૂનવે ॥ ૪॥

સા ભર્તારમનુપ્રાપ્ય કિઞ્ચિત્કાલં શુભવ્રતા ।
રેમે તેન દ્વિજશ્રેષ્ઠા નવયૌવનશાલિની ॥ ૫॥

અથ તસ્યાઃ પતિર્વિપ્રસ્તરુણઃ સુરુજાર્દિતઃ ।
સૌમિન્યાઃ કાલયોગાત્તુ પઞ્ચત્વમગમદ્ દ્વિજાઃ ॥ ૬॥

મૃતે ભર્તરિ સા નારી દુઃખિતાતિવિષણ્ણધીઃ ।
કિઞ્ચિત્કાલં શુભાચારા સુશીલોવાસ સદ્મનિ ॥ ૭॥

તતઃ સા મન્મથાવિષ્ટહૃદયા વિધવાપિ ચ ।
યુવાવસ્થાવિશેષેણ બભૂવ વ્યભિચારિણી ॥ ૮॥

તજ્જ્ઞાત્વા ગોત્રિણસ્તસ્યા દુષ્કર્મ કુલદૂષણમ્ ।
સમેતાસ્તત્યજુર્દૂરં નીત્વા તાં સકચગ્રહામ્ ॥ ૯॥

કશ્ચિચ્છૂદ્રવરસ્તાં વૈ વિચરન્તીં નિજેચ્છયા ।
દૃષ્ટ્વા વને સ્ત્રિયં ચક્રે નિનાય સ્વગૃહં તતઃ ॥ ૧૦॥

અથ સા પિશિતાહારા નિત્યમાપીતવારુણી ।
અજીજનત્સુતાં તેન શૂદ્રેણ સુરતપ્રિયા ॥ ૧૧॥

કદાચિદ્ભર્તરિ ક્વાપિ યાતે પીતસુરાથ સા ।
ઇયેષ પિશિતાહારં સૌમિની વ્યભિચારિણી ॥ ૧૨॥

તતો મેષેષુ બદ્ધેષુ ગોભિઃ સહ બહિર્વ્રજે ।
નિશામુખે તમોઽન્ધે હિ ખડ્ગમાદાય સા યયૌ ॥ ૧૩॥

અવિમૃશ્ય મદાવેશાન્મેષબુદ્ધ્યામિષપ્રિયા ।
એકં જઘાન ગોવત્સં ક્રોશન્તમતિદુર્ભગા ॥ ૧૪॥

હતં તં ગૃહમાનીય જ્ઞાત્વા ગોવત્સમઙ્ગના ।
ભીતા શિવ શિવેત્યાહ કેનચિત્પુણ્યકર્મણા ॥ ૧૫॥

સા મુહૂર્તં શિવં ધ્યાત્વામિષભોજનલાલસા ।
છિત્ત્વા તમેવ ગોવત્સં ચકારાહારમીપ્સિતમ્ ॥ ૧૬॥

એવં બહુતિથે કાલે ગતે સા સૌમિની દ્વિજાઃ ।
કાલસ્ય વશમાપન્ના જગામ યમસક્ષયમ્ ॥ ૧૭॥

યમોઽપિ ધર્મમાલોક્ય તસ્યાઃ કર્મ ચ પૌર્વિકમ્ ।
નિવર્ત્ય નિરયાવાસાચ્ચક્રે ચાણ્ડાલજાતિકામ્ ॥ ૧૮॥

સાથ ભ્રષ્ટા યમપુરાચ્ચાણ્ડાલીગર્ભમાશ્રિતા ।
તતો બભૂવ જન્માન્ધા પ્રશાન્તાઙ્ગારમેચકા ॥ ૧૯॥

જન્માન્ધા સાથ બાલ્યેઽપિ વિધ્વસ્તપિતૃમાતૃકા ।
ઊઢા ન કેનચિદ્દુષ્ટા મહાકુષ્ઠરુજાર્દિતા ॥ ૨૦॥

તતઃ ક્ષુધાર્દિતા દીના યષ્ટિપાણિર્ગતેક્ષણા ।
ચાણ્ડાલોચ્છિષ્ટપિણ્ડેન જઠરાગ્નિમતર્પયત્ ॥ ૨૧॥

એવં કૃચ્છ્રેણ મહતા નીત્વા સ્વવિપુલં વયઃ ।
જરયા ગ્રસ્તસર્વાઙ્ગી દુઃખમાપ દુરત્યયમ્ ॥ ૨૨॥

કદાચિત્સાથ ચાણ્ડાલી ગોકર્ણં તં મહાજનાન્ ।
આયાસ્યન્ત્યાં શિવતિથૌ ગચ્છતો બુબુધેઽધ્વગાન્ ॥ ૨૩॥

અથાસાવપિ ચાણ્ડાલી વસનાશનતૃષ્ણયા ।
મહાજનાન્ યાચયિતું સઞ્ચચાર શનૈઃ શનૈઃ ॥ ૨૪॥

ગત્વા તત્રાથ ચાણ્ડાલી પ્રાર્થયન્તી મહાજનાન્ ।
યત્ર તત્ર ચચારાસૌ દીનવાક્પ્રસૃતાઞ્જલિઃ ॥ ૨૫॥

એવમભ્યર્થયન્ત્યાસ્તુ ચાણ્ડાલ્યાઃ પ્રસૃતાઞ્જલૌ ।
એકઃ પુણ્યતમઃ પાન્થઃ પ્રાક્ષિપદ્બિલ્વમઞ્જરીમ્ ॥ ૨૬॥

તામઞ્જલૌ નિપતિતાં સા વિમૃશ્ય પુનઃ પુનઃ ।
અભક્ષ્યમિતિ મત્વાથ દૂરે પ્રાક્ષિપદાતુરા ॥ ૨૭॥

તસ્યાઃ કરાદ્વિનિર્મુક્તા રાત્રૌ સા બિલ્વમઞ્જરી ।
પપાત કસ્યચિદ્દિષ્ટ્યા શિવલિઙ્ગસ્ય મસ્તકે ॥ ૨૮॥

સૈવં શિવચતુર્દશ્યાં રાત્રૌ પાન્થજનાન્ મુહુઃ ।
યાચમાનાપિ યત્કિઞ્ચિન્ન લેભે દૈવયોગતઃ ॥ ૨૯॥

એવં શિવચતુર્દશ્યા વ્રતં જાતં ચ નિર્મલમ્ ।
અજ્ઞાનતો જાગરણં પરમાનન્દદાયકમ્ ॥ ૩૦॥

તતઃ પ્રભાતે સા નારી શોકેન મહતાવૃતા ।
શનૈર્નિવવૃતે દીના સ્વદેશાયૈવ કેવલમ્ ॥ ૩૧॥

શ્રાન્તા ચિરોપવાસેન નિપતન્તી પદે પદે ।
અતીત્ય તાવતીં ભૂમિં નિપપાત વિચેતના ॥ ૩૨॥

અથ સા શમ્ભુકૃપયા જગામ પરમં પદમ્ ।
આરુહ્ય સુવિમાનં ચ નીતં શિવગણૈર્દ્રુતમ્ ॥ ૩૩॥

આદૌ યદેષા શિવનામ નારી

પ્રમાદતો વાપ્યસતી જગાદ ।
તેનેહ ભૂયઃ સુકૃતેન વિપ્રા
મહાબલસ્થાનમવાપ દિવ્યમ્ ॥ ૩૪॥

શ્રીગોકર્ણે શિવતિથાવુપોષ્ય શિવમસ્તકે ।
કૃત્વા જાગરણં સા હિ ચક્રે બિલ્વાર્ચનં નિશિ ॥ ૩૫॥

અકામતઃ કૃતસ્યાસ્ય પુણ્યસ્યૈવ ચ તત્ફલમ્ ।
ભુનક્ત્યદ્યાપિ સા ચૈવ મહાબલપ્રસાદતઃ ॥ ૩૬॥

એવંવિધં મહાલિઙ્ગં શઙ્કરસ્ય મહાબલમ્ ।
સર્વપાપહરં સદ્યઃ પરમાનન્દદાયકમ્ ॥ ૩૭॥

એવં વઃ કથિતં વિપ્રા માહાત્મ્યં પરમં મયા ।
મહાબલાભિધાનસ્ય શિવલિઙ્ગવરસ્ય હિ ॥ ૩૮॥

અથાન્યદપિ વક્ષ્યામિ માહાત્મ્યં તસ્ય ચાદ્ભુતમ્ ।
શ્રુતમાત્રેણ યેનાશુ શિવે ભક્તિઃ પ્રજાયતે ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ચાણ્ડાલીસદ્ગતિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૪.૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૦. દશમોઽધ્યાયઃ । મહાબલાખ્યશિવલિઙ્ગમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
શ્રીમતીક્ષ્વાકુવંશે હિ રાજા પરમધાર્મિકઃ ।
આસીન્મિત્રસહો નામ શ્રેષ્ઠઃ સર્વધનુષ્મતામ્ ॥ ૧॥

તસ્ય રાજ્ઞઃ સુધર્મિષ્ઠા મદયન્તી પ્રિયા શુભા ।
દમયન્તી નલસ્યેવ બભૂવ વિદિતા સતી ॥ ૨॥

સ એકદા હિ મૃગયાસ્નેહી મિત્રસહો નૃપઃ ।
મહદ્બલેન સંયુક્તો જગામ ગહનં વનમ્ ॥ ૩॥

વિહરંસ્તત્ર સ નૃપઃ કમઠાખ્યં નિશાચરમ્ ।

નિજઘાન મહાદુષ્ટં સાધુપીડાકરં ખલમ્ ॥ ૪॥

અથ તસ્યાનુજઃ પાપી જયેયં છદ્મનૈવ તમ્ ।
મત્વા જગામ નૃપતેરન્તિકં છદ્મકારકઃ ॥ ૫॥

તં વિનમ્રાકૃતિં દૃષ્ટ્વા ભૃત્યતાં કર્તુમાગતમ્ ।
ચક્રે મહાનસાધ્યક્ષમજ્ઞાનાત્સ મહીપતિઃ ॥ ૬॥

અથ તસ્મિન્વને રાજા કિયત્કાલં વિહૃત્ય સઃ ।
નિવૃત્તો મૃગયાં હિત્વા સ્વપુરીમાયયૌ મુદા ॥ ૭॥

પિતુઃ ક્ષયાહે સમ્પ્રાપ્તે નિમન્ત્ર્ય સ્વગુરું નૃપઃ ।
વસિષ્ઠં ગૃહમાનિન્યે ભોજયામાસ ભક્તિતઃ ॥ ૮॥

રક્ષસા સૂદરૂપેણ સમ્મિશ્રિતનરામિષમ્ ।
શાકામિષં પુરઃ ક્ષિપ્તં દૃષ્ટ્વા ગુરુરથાબ્રવીત્ ॥ ૯॥

ગુરુરુવાચ ।
ધિક્ ત્વાં નરામિષં રાજંસ્ત્વયૈતચ્છદ્મકારિણા ।
ખલેનોપહૃતં મહ્યં તતો રક્ષો ભવિષ્યસિ ॥ ૧૦॥

રક્ષઃકૃતં ચ વિજ્ઞાય તદૈવં સ ગુરુસ્તદા ।
પુનર્વિમૃશ્ય તં શાપં ચકાર દ્વાદશાબ્દિકમ્ ॥ ૧૧॥

સ રાજાનુચિતં શાપં વિજ્ઞાય ક્રોધમૂર્છિતઃ ।
જલાઞ્જલિં સમાદાય ગુરું શપ્તું સમુદ્યતઃ ॥ ૧॥

તદા ચ તત્પ્રિયા સાધ્વી મદયન્તી સુધર્મિણી ।
પતિત્વા પાદયોસ્તસ્ય શાપં તં હિ ન્યવારયત્ ॥ ૧૩॥

તતો નિવૃત્તશાપસ્તુ તસ્યા વચનગૌરવાત્ ।
તત્યાજ પાદયોરમ્ભઃ પાદૌ કલ્મષતાં ગતૌ ॥ ૧૪॥

તતઃપ્રભૃતિ રાજા ભૂત્સ લોકેઽસ્મિન્મુનીશ્વરાઃ ।
કલ્મષાઙ્ઘ્રિરિતિ ખ્યાતઃ પ્રભાવાત્તજ્જલસ્ય હિ ॥ ૧૫॥

રાજા મિત્રસહઃ શાપાદ્ ગુરોરૃષિવરસ્ય હિ ।
બભૂવ રાક્ષસો ઘોરો હિંસકો વનગોચરઃ ॥ ૧૬॥

સ બિભ્રદ્રાક્ષસં રૂપં કાલાન્તકયમોપમમ્ ।
ચખાદ વિવિધાઞ્જન્તૂન્ માનુષાદીન્વનેચરઃ ॥ ૧૭॥

સ કદાચિદ્વને ક્વાપિ રમમાણૌ કિશોરકૌ ।
અપશ્યદન્તકાકારો નવોઢૌ મુનિદમ્પતી ॥ ૧૮॥

રાક્ષસઃ સ નરાહારઃ કિશોરં મુનિનન્દનમ્ ।
જગ્ધું જગ્રાહ શાપાર્ત્તો વ્યાઘ્રો મૃગશિશું યથા ॥ ૧૯॥

કક્ષે ગૃહીતં ભર્તારં દૃષ્ટ્વા ભીતા ચ તત્પ્રિયા ।
સા ચક્રે પ્રાર્થનાં તસ્મૈ વદતી કરુણં વચઃ ॥ ૨૦॥

પ્રાર્થ્યમાનોઽપિ બહુશઃ પુરુષાદઃ સ નિર્ઘૃણઃ ।
ચખાદ શિર ઉત્કૃત્ય વિપ્રસૂનોર્દુરાશયઃ ॥ ૨૧॥

અથ સાધ્વી ચ સા દીના વિલપ્ય ભૃશદુઃખિતા ।
આહૃત્ય ભર્તુરસ્થીનિ ચિતાં ચક્રે કિલોલ્બણામ્ ॥ ૨૨॥

ભર્તારમનુગચ્છન્તી સંવિશન્તી હુતાશનમ્ ।
રાજાનં રાક્ષસાકારં સા શશાપ દ્વિજાઙ્ગના ॥ ૨૩॥

અદ્યપ્રભૃતિ નારીષુ યદા ત્વં સઙ્ગતો ભવેઃ ।
તદા મૃતિસ્તવેત્યુક્ત્વા વિવેશ જ્વલનં સતી ॥ ૨૪॥

સોઽપિ રાજા ગુરોઃ શાપમનુભૂય કૃતાવધિમ્ ।
પુનઃ સ્વરૂપમાસ્થાય સ્વગૃહં મુદિતો યયૌ ॥ ૨૫॥

જ્ઞાત્વા વિપ્રસતીશાપં મદયન્તી રતિપ્રિયમ્ ।
પતિં નિવારયામાસ વૈધવ્યાદતિબિભ્યતી ॥ ૨૬॥

અનપત્યો વિનિર્વિણ્ણો રાજ્યભોગેષુ પાર્થિવઃ ।
વિસૃજ્ય સકલાં લક્ષ્મીં વનમેવ જગામ હ ॥ ૨૭॥

સ્વપૃષ્ઠતઃ સમાયાન્તીં બ્રહ્મહત્યાં સુદુઃખદામ્ ।
દદર્શ વિકટાકારાં તર્જયન્તીં મુહુર્મુહુઃ ॥ ૨૮॥

તસ્યા નિર્ભદ્રમન્વિચ્છન્ રાજા નિર્વિણ્ણમાનસઃ ।
ચકાર નાનોપાયાન્સ જપવ્રતમખાદિકાન્ ॥ ૨૯॥

નાનોપાયૈર્યદા રાજ્ઞસ્તીર્થસ્નાનાદિભિર્દ્વિજાઃ ।
ન નિવૃત્તા બ્રહ્મહત્યા મિથિલાં સ યયૌ તદા ॥ ૩૦॥

બાહ્યોદ્યાનગતસ્તસ્યાશ્ચિન્તયા પરયાર્દિતઃ ।

દદર્શ મુનિમાયાન્તં ગૌતમં પાર્થિવશ્ચ સઃ ॥ ૩૧॥

અભિસૃત્ય સ રાજેન્દ્રો ગૌતમં વિમલાશયમ્ ।
તદ્દર્શનાપ્તકિઞ્ચિત્કઃ પ્રણનામ મુહુર્મુહુઃ ॥ ૩॥

અથ તત્પૃષ્ટકુશલો દીર્ઘમુષ્ણં ચ નિઃશ્વસન્ ।
તત્કૃપાદૃષ્ટિસમ્પ્રાપ્તસુખઃ પ્રોવાચ તં નૃપઃ ॥ ૩૩॥

રાજોવાચ ।
મુને માં બાધતે હ્યેષા બ્રહ્મહત્યા દુરત્યયા ।
અલક્ષિતા પરૈસ્તાત તર્જયન્તી પદે પદે ॥ ૩૪॥

યન્મયા શાપદગ્ધેન વિપ્રપુત્રશ્ચ ભક્ષિતઃ ।
તત્પાપસ્ય ન શાન્તિર્હિ પ્રાયશ્ચિત્તસહસ્રકૈઃ ॥ ૩૫॥

નાનોપાયાઃ કૃતા મે હિ તચ્છાન્ત્યૈ ભ્રમતા મુને ।
ન નિવૃત્તા બ્રહ્મહત્યા મમ પાપાત્મનઃ કિમુ ॥ ૩૬॥

અદ્ય મે જન્મસાફલ્યં સમ્પ્રાપ્તમિવ લક્ષયે ।
યતસ્ત્વદ્દર્શનાદેવ મમાનન્દભરોઽભવત્ ॥ ૩૭॥

અદ્ય મે તવ પાદાબ્જશરણસ્ય કૃતૈનસઃ ।
શાન્તિં કુરુ મહાભાગ યેનાહં સુખમાપ્નુયામ્ ॥ ૩૮॥

સૂત ઉવાચ ।
ઇતિ રાજ્ઞા સમાદિષ્ટો ગૌતમઃ કરુણાર્દ્રધીઃ ।
સમાદિદેશ ઘોરાણામઘાનાં સાધુ નિષ્કૃતિમ્ ॥ ૩૯॥

ગૌતમ ઉવાચ ।
સાધુ રાજેન્દ્ર ધન્યોઽસિ મહાઘેભ્યો ભયં ત્યજ ।
શિવે શાસ્તરિ ભક્તાનાં ક્વ ભયં શરણૈષિણામ્ ॥ ૪૦॥

શ ૃણુ રાજન્મહાભાગ ક્ષેત્રમન્યત્પ્રતિષ્ઠિતમ્ ।
મહાપાતકસંહારિ ગોકર્ણાખ્યં શિવાલયમ્ ॥ ૪૧॥

તત્ર સ્થિતિર્ન પાપાનાં મહદ્ભ્યો મહતામપિ ।
મહાબલાભિધાનેન શિવઃ સન્નિહિતઃ સ્વયમ્ ॥ ૪૨॥

સર્વેષાં શિવલિઙ્ગાનાં સાર્વભૌમો મહાબલઃ ।
ચતુર્યુગે ચતુર્વર્ણઃ સર્વપાપાપહારકઃ ॥ ૪૩॥

પશ્ચિમામ્બુધિતીરસ્થં ગોકર્ણં તીર્થમુત્તમમ્ ।
તત્રાસ્તિ શિવલિઙ્ગં તન્મહાપાતકનાશકમ્ ॥ ૪૪॥

તત્ર ગત્વા મહાપાપાઃ સ્નાત્વા તીર્થેષુ ભૂરિશઃ ।
મહાબલં ચ સમ્પૂજ્ય પ્રયાતાઃ શાઙ્કરં પદમ્ ॥ ૪૫॥

તથા ત્વમપિ રાજેન્દ્ર ગોકર્ણં ગિરિશાલયમ્ ।
ગત્વા સમ્પૂજ્ય તલ્લિઙ્ગં કૃતકૃત્યત્વમાપ્નુયાઃ ॥ ૪૬॥

તત્ર સર્વેષુ તીર્થેષુ સ્નાત્વાભ્યર્ચ્ય મહાબલમ્ ।
સર્વપાપવિનિર્મુક્તઃ શિવલોકં ત્વમાપ્નુયાઃ ॥ ૪૭॥

સૂત ઉવાચ ।
ઇત્યાદિષ્ટઃ સ મુનિના ગૌતમેન મહાત્મના ।
મહાહૃષ્ટમના રાજા ગોકર્ણં પ્રત્યપદ્યત ॥ ૪૮॥

તત્ર તીર્થેષુ સુસ્નાત્વા સમભ્યર્ચ્ય મહાબલમ્ ।
નિર્ધૂતાશેષપાપૌઘોઽલભચ્છમ્ભોઃ પરં પદમ્ ॥ ૪૯॥

ય ઇમાં શ‍ૃણુયાન્નિત્યં મહાબલકથાં પ્રિયામ્ ।
ત્રિસપ્તકુલજૈઃ સાર્ધં શિવલોકે વ્રજત્યસૌ ॥ ૫૦॥

ઇતિ વશ્ચ સમાખ્યાતં માહાત્મ્યં પરમાદ્ભુતમ્ ।
મહાબલસ્ય ગિરિશલિઙ્ગસ્ય નિખિલાઘહૃત્ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં મહાબલાહ્વશિવલિઙ્ગ- માહાત્મ્યવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૪.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૧. એકાદશોઽધ્યાયઃ । ચન્દ્રભાલપશુપતિનાથલિઙ્ગમાહાત્મ્યવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ ધન્યસ્ત્વં શિવસક્તધીઃ ।
મહાબલસ્ય લિઙ્ગસ્ય શ્રાવિતેયં કથાદ્ભુતા ॥ ૧॥

ઉત્તરસ્યાં દિશાયાં ચ શિવલિઙ્ગાનિ યાનિ ચ ।
તેષાં માહાત્મ્યમનઘં વદ ત્વં પાપનાશકમ્ ॥ ૨॥

સૂત ઉવાચ ।
શૃણુતાદરતો વિપ્રા ઔત્તરાણાં વિશેષતઃ ।
માહાત્મ્યં શિવલિઙ્ગાનાં પ્રવદામિ સમાસતઃ ॥ ૩॥

ગોકર્ણ ક્ષેત્રમપરં મહાપાતકનાશનમ્ ।
મહાવનં ચ તત્રાસ્તિ પવિત્રમતિવિસ્તરમ્ ॥ ૪॥

તત્રાસ્તિ ચન્દ્રભાલાખ્યં શિવલિઙ્ગમનુત્તમમ્ ।
રાવણેન સમાનીતં સદ્ભક્ત્યા સર્વસિદ્ધિદમ્ ॥ ૫॥

તસ્ય તત્ર સ્થિતિર્વૈદ્યનાથસ્યેવ મુનીશ્વરાઃ ।
સર્વલોકહિતાર્થાય કરુણાસાગરસ્ય ચ ॥ ૬॥

સ્નાનં કૃત્વા તુ ગોકર્ણે ચન્દ્રભાલં સમર્ચ્ય ચ ।
શિવલોકમવાપ્નોતિ સત્યં સત્યં ન સંશયઃ ॥ ૭॥

ચન્દ્રભાલસ્ય લિઙ્ગસ્ય મહિમા પરમાદ્ભુતઃ ।
ન શક્યો વર્ણિતું વ્યાસાદ્ભક્તિસ્નેહરતસ્ય હિ ॥ ૮॥

ચન્દ્રભાલમહાદેવલિઙ્ગસ્ય મહિમા મહાન્ ।
યથાકથઞ્ચિત્સમ્પ્રોક્તઃ પરલિઙ્ગસ્ય વૈ શૃણુ ॥ ૯॥

દાધીચં શિવલિઙ્ગં તુ મિશ્રર્ષિવરતીર્થકે ।
દધીચિના મુનીશેન સુપ્રીત્યા ચ પ્રતિષ્ઠિતમ્ ॥ ૧૦॥

તત્ર ગત્વા ચ તત્તીર્થે સ્નાત્વા સમ્યગ્વિધાનતઃ ।
શિવલિઙ્ગં સમર્ચેદ્વૈ દાધીચેશ્વરમાદરાત્ ॥ ૧૧॥

દધીચમૂર્તિસ્તત્રૈવ સમર્ચ્યા વિધિપૂર્વકમ્ ।
શિવપ્રીત્યર્થમેવાશુ તીર્થયાત્રાફલાર્થિભિઃ ॥ ૧॥

એવં કૃતે મુનિશ્રેષ્ઠાઃ કૃતકૃત્યો ભવેન્નરઃ ।
ઇહ સર્વસુખં ભુક્ત્વા પરત્ર ગતિમાપ્નુયાત્ ॥ ૧૩॥

નૈમિષારણ્યતીર્થે તુ નિખિલર્ષિપ્રતિષ્ઠિતમ્ ।
ઋષીશ્વરમિતિ ખ્યાતં શિવલિઙ્ગં સુખપ્રદમ્ ॥ ૧૪॥

તદ્દર્શનાત્પૂજનાચ્ચ જનાનાં પાપિનામપિ ।

ભુક્તિર્મુક્તિશ્ચ તેષાં તુ પરત્રેહ મુનીશ્વરાઃ ॥ ૧૫॥

હત્યાહરણતીર્થે તુ શિવલિઙ્ગમઘાપહમ્ ।
પૂજનીયં વિશેષેણ હત્યાકોટિવિનાશનમ્ ॥ ૧૬॥

દેવપ્રયાગતીર્થે તુ લલિતેશ્વરનામકમ્ ।
શિવલિઙ્ગં સદા પૂજ્યં નરૈઃ સર્વાઘનાશનમ્ ॥ ૧૭॥

નયપાલાખ્યપુર્યાં તુ પ્રસિદ્ધાયાં મહીતલે ।
લિઙ્ગં પશુપતીશાખ્યં સર્વકામફલપ્રદમ્ ॥ ૧૮॥

શિરોભાગસ્વરૂપેણ શિવલિઙ્ગં તદસ્તિ હિ ।
તત્કથાં વર્ણયિષ્યામિ કેદારેશ્વરવર્ણને ॥ ૧૯॥

તદારાન્મુક્તિનાથાખ્યં શિવલિઙ્ગં મહાદ્ભુતમ્ ।
દર્શનાદર્ચનાત્તસ્ય ભુક્તિર્મુક્તિશ્ચ લભ્યતે ॥ ૨૦॥

ઇતિ વશ્ચ સમાખ્યાતં લિઙ્ગવર્ણનમુત્તમમ્ ।
ચતુર્દિક્ષુ મુનિશ્રેષ્ઠાઃ કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૨૧॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ચન્દ્રભાલપશુપતિનાથલિઙ્ગમાહાત્મ્યવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૪.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૨. દ્વાદશોઽધ્યાયઃ । લિઙ્ગસ્વરૂપકારણવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત જાનાસિ સકલં વસ્તુ વ્યાસપ્રસાદતઃ ।
તવાજ્ઞાતં ન વિદ્યેત તસ્માત્પૃચ્છામહે વયમ્ ॥ ૧॥

લિઙ્ગં ચ પૂજ્યતે લોકે તત્ત્વયા કથિતં ચ યત્ ।
તત્તથૈવ ન ચાન્યદ્વા કારણં વિદ્યતે ત્વિહ ॥ ૨॥

બાણરૂપા શ્રુતા લોકે પાર્વતી શિવવલ્લભા ।
એતત્કિં કારણં સૂત કથય ત્વં યથાશ્રુતમ્ ॥ ૩॥

સૂત ઉવાચ ।
કલ્પભેદકથા ચૈવ શ્રુતા વ્યાસાન્મયા દ્વિજાઃ ।
તામેવ કથયામ્યદ્ય શ્રૂયતામૃષિસત્તમાઃ ॥ ૪॥

પુરા દારુવને જાતં યદ્ વૃત્તં તુ દ્વિજન્મનામ્ ।
તદેવ શ્રૂયતાં સમ્યક્ કથયામિ યથાશ્રુતમ્ ॥ ૫॥

દારુનામ વનં શ્રેષ્ઠં તત્રાસન્ ઋષિસત્તમાઃ ।
શિવભક્તાઃ સદા નિત્યં શિવધ્યાનપરાયણાઃ ॥ ૬॥

ત્રિકાલં શિવપૂજાં ચ કુર્વન્તિ સ્મ નિરન્તરમ્ ।
નાનાવિધૈઃ સ્તવૈર્દિવ્યૈસ્તુષ્ટુવુસ્તે મુનીશ્વરાઃ ॥ ૭॥

તે કદાચિદ્વને યાતાઃ સમિધાહરણાય ચ ।
સર્વે દ્વિજર્ષભાઃ શૈવાઃ શિવધ્યાનપરાયણાઃ ॥ ૮॥

એતસ્મિન્નન્તરે સાક્ષાચ્છઙ્કરો નીલલોહિતઃ ।
વિરૂપં ચ સમાસ્થાય પરીક્ષાર્થં સમાગતઃ ॥ ૯॥

દિગમ્બરોઽતિતેજસ્વી ભૂતિભૂષણભૂષિતઃ ।
સ ચેષ્ટામકરોદ્દુષ્ટાં હસ્તે લિઙ્ગં વિધારયન્ ॥ ૧૦॥

મનસા ચ પ્રિયં તેષાં કર્તું વૈ વનવાસિનામ્ ।
જગામ તદ્વનં પ્રીત્યા ભક્તપ્રીતો હરઃ સ્વયમ્ ॥ ૧૧॥

તં દૃષ્ટ્વા ઋષિપત્ન્યસ્તાઃ પરં ત્રાસમુપાગતાઃ ।
વિહ્વલા વિસ્મિતાશ્ચાન્યાઃ સમાજગ્મુસ્તથા પુનઃ ॥ ૧॥

આલિલિઙ્ગુસ્તથા ચાન્યાઃ કરં ધૃત્વા તથાપરાઃ ।
પરસ્પરં તુ સઙ્ઘર્ષાત્સમ્મગ્નાસ્તાઃ સ્ત્રિયસ્તદા ॥ ૧૩॥

એતસ્મિન્નેવ સમયે ઋષિવર્યાઃ સમાગમન્ ।
વિરુદ્ધં તં ચ તે દૃષ્ટ્વા દુઃખિતાઃ ક્રોધમૂર્ચ્છિતાઃ ॥ ૧૪॥

તદા દુઃખમનુપ્રાપ્તાઃ કોઽયં કોઽયં તથાબ્રુવન્ ।
સમસ્તા ઋષયસ્તે વૈ શિવમાયાવિમોહિતાઃ ॥ ૧૫॥

યદા ચ નોક્તવાન્ કિઞ્ચિત્સોઽવધૂતો દિગમ્બરઃ ।
ઊચુસ્તં પુરુષં ભીમં તદા તે પરમર્ષયઃ ॥ ૧૬॥

ત્વયા વિરુદ્ધં ક્રિયતે વેદમાર્ગવિલોપિ યત્ ।

તતસ્ત્વદીયં તલ્લિઙ્ગં પતતાં પૃથિવીતલે ॥ ૧૭॥

સૂત ઉવાચ ।
ઇત્યુક્તે તુ તદા તૈશ્ચ લિઙ્ગં ચ પતિતં ક્ષણાત્ ।
અવધૂતસ્ય તસ્યાશુ શિવસ્યાદ્ભુતરૂપિણઃ ॥ ૧૮॥

તલ્લિઙ્ગં ચાગ્નિવત્સર્વં યદ્દદાહ પુરા સ્થિતમ્ ।
યત્ર યત્ર ચ તદ્યાતિ તત્ર તત્ર દહેત્પુનઃ ॥ ૧૯॥

પાતાલે ચ ગતં તચ્ચ સ્વર્ગે ચાપિ તથૈવ ચ ।
ભૂમૌ સર્વત્ર તદ્યાતં ન કુત્રાપિ સ્થિરં હિ તત્ ॥ ૨૦॥

લોકાશ્ચ વ્યાકુલા જાતા ઋષયસ્તેઽતિદુઃખિતાઃ ।
ન શર્મ લેભિરે કેચિદ્દેવાશ્ચ ઋષયસ્તથા ॥ ૨૧॥

ન જ્ઞાતસ્તુ શિવો યૈસ્તુ તે સર્વે ચ સુરર્ષયઃ ।
દુઃખિતા મિલિતાઃ શીઘ્રં બ્રહ્માણં શરણં યયુઃ ॥ ૨૨॥

તત્ર ગત્વા ચ તે સર્વે નત્વા સ્તુત્વા વિધિં દ્વિજાઃ ।
તત્સર્વમવદન્ વૃત્તં બ્રહ્મણે સૃષ્ટિકારિણે ॥ ૨૩॥

બ્રહ્મા તદ્વચનં શ્રુત્વા શિવમાયાવિમોહિતાન્ ।
જ્ઞાત્વા તાન્ શઙ્કરં નત્વા પ્રોવાચ ઋષિસત્તમાન્ ॥ ૨૪॥

બ્રહ્મોવાચ ।
જ્ઞાતારશ્ચ ભવન્તો વૈ કુર્વતે ગર્હિતં દ્વિજાઃ ।
અજ્ઞાતારો યદા કુર્યુઃ કિં પુનઃ કથ્યતે પુનઃ ॥ ૨૫॥

વિરુદ્ધ્યૈવં શિવં દેવં કુશલં કઃ સમીહતે ।
મધ્યાહ્નસમયે યો વૈ નાતિથિં ચ પરામૃશેત્ ॥ ૨૬॥

તસ્યૈવ સુકૃતં નીત્વા સ્વીયં ચ દુષ્કૃતં પુનઃ ।
સંસ્થાપ્ય ચાતિથિર્યાતિ કિં પુનઃ શિવમેવ વા ॥ ૨૭॥

યાવલ્લિઙ્ગં સ્થિરં નૈવ જગતાં ત્રિતયે શુભમ્ ।
જાયતે ન તદા ક્વાપિ સત્યમેતદ્વદામ્યહમ્ ॥ ૨૮॥

ભવદ્ભિશ્ચ તથા કાર્યં યથા સ્વાસ્થ્યં ભવેદિહ ।
શિવલિઙ્ગસ્ય ઋષયો મનસા સંવિચાર્યતામ્ ॥ ૨૯॥

સૂત ઉવાચ ।

ઇત્યુક્તાસ્તે પ્રણમ્યોચુર્બ્રહ્માણમૃષયશ્ચ વૈ ।
કિમસ્માભિર્વિધે કાર્યં તત્કાર્યં ત્વં સમાદિશ ॥ ૩૦॥

ઇત્યુક્તશ્ચ મુનીશૈસ્તૈઃ સર્વલોકપિતામહઃ ।
મુનીશાંસ્તાંસ્તદા બ્રહ્મા સ્વયં પ્રોવાચ વૈ તદા ॥ ૩૧॥

બ્રહ્મોવાચ ।
આરાધ્ય ગિરિજાં દેવીં પ્રાર્થયન્તુ સુરાઃ શિવામ્ ।
યોનિરૂપા ભવેચ્ચેદ્વૈ તદા તત્સ્થિરતાં વ્રજેત્ ॥ ૩૨॥

તદ્વિધિં પ્રવદામ્યદ્ય સર્વે શૃણુત સત્તમાઃ ।
તામેવ કુરુત પ્રેમ્ણા પ્રસન્ના સા ભવિષ્યતિ ॥ ૩૩॥

કુમ્ભમેકં ચ સંસ્થાપ્ય કૃત્વાષ્ટદલમુત્તમમ્ ।
દૂર્વાયવાઙ્કુરૈસ્તીર્થોદકમાપૂરયેત્તતઃ ॥ ૩૪॥

વેદમન્ત્રૈસ્તતસ્તં વૈ કુમ્ભં ચૈવાભિમન્ત્રયેત્ ।
શ્રુત્યુક્તવિધિના તસ્ય પૂજાં કૃત્વા શિવં સ્મરન્ ॥ ૩૫॥

તલ્લિઙ્ગં તજ્જલેનાભિષેચયેત્પરમર્ષયઃ ।
શતરુદ્રિયમન્ત્રૈસ્તુ પ્રોક્ષિતં શાન્તિમાપ્નુયાત્ ॥ ૩૬॥

ગિરિજાયોનિરૂપં ચ બાણં સ્થાપ્ય શુભં પુનઃ ।
તત્ર લિઙ્ગં ચ તત્સ્થાપ્યં પુનશ્ચૈવાભિમન્ત્રયેત્ ॥ ૩૭॥

સુગન્ધૈશ્ચન્દનૈશ્ચૈવ પુષ્પધૂપાદિભિસ્તથા ।
નૈવેદ્યાદિકપૂજાભિસ્તોષયેત્પરમેશ્વરમ્ ॥ ૩૮॥

પ્રણિપાતૈઃ સ્તવૈઃ પુણ્યૈર્વાદ્યૈર્ગાનૈસ્તથા પુનઃ ।
તતઃ સ્વસ્ત્યયનં કૃત્વા જયેતિ વ્યાહરેત્તથા ॥ ૩૯॥

પ્રસન્નો ભવ દેવેશ જગદાહ્લાદકારક ।
કર્તા પાલયિતા ત્વં ચ સંહર્તા ત્વં નિરક્ષરઃ ॥ ૪૦॥

જગદાદિર્જગદ્યોનિર્જગદન્તર્ગતોઽપિ ચ ।
શાન્તો ભવ મહેશાન સર્વાંલ્લોકાંશ્ચ પાલય ॥ ૪૧॥

એવં કૃતે વિધૌ સ્વાસ્થ્યં ભવિષ્યતિ ન સંશયઃ ।
વિકારો ન ત્રિલોકેઽસ્મિન્ભવિષ્યતિ સુખં સદા ॥ ૪૨॥

સૂત ઉવાચ ।

ઇત્યુક્તાસ્તે દ્વિજા દેવાઃ પ્રણિપત્ય પિતામહમ્ ।
શિવં તં શરણં પ્રાપ્તાઃ સર્વલોકસુખેપ્સયા ॥ ૪૩॥

પૂજિતઃ પરયા ભક્ત્યા પ્રાર્થિતઃ શઙ્કરસ્તદા ।
સુપ્રસન્નસ્તતો ભૂત્વા તાનુવાચ મહેશ્વરઃ ॥ ૪૪॥

મહેશ્વર ઉવાચ ।
હે દેવા ઋષયઃ સર્વે મદ્વચઃ શૃણુતાદરાત્ ।
યોનિરૂપેણ મલ્લિઙ્ગં ધૃતં ચેત્સ્યાત્તદા સુખમ્ ॥ ૪૫॥

પાર્વતીં ચ વિના નાન્યા લિઙ્ગં ધારયિતું ક્ષમા ।
તયા ધૃતં ચ મલ્લિઙ્ગં દ્રુતં શાન્તિં ગમિષ્યતિ ॥ ૪૬॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા ઋષિભિર્દેવૈઃ સુપ્રસન્નૈર્મુનીશ્વરાઃ ।
ગૃહીત્વા ચૈવ બ્રહ્માણં ગિરિજા પ્રાર્થિતા તદા ॥ ૪૭॥

પ્રસન્નાં ગિરિજાં કૃત્વા વૃષભધ્વજમેવ ચ ।
પૂર્વોક્તં ચ વિધિં કૃત્વા સ્થાપિતં લિઙ્ગમુત્તમમ્ ॥ ૪૮॥

મન્ત્રોક્તેન વિધાનેન દેવાશ્ચ ઋષયસ્તથા ।
ચક્રુઃ પ્રસન્નાં ગિરિજાં શિવં ચ ધર્મહેતવે ॥ ૪૯॥

સમાનર્ચુર્વિશેષેણ સર્વે દેવર્ષયઃ શિવમ્ ।
બ્રહ્મા વિષ્ણુઃ પરે ચૈવ ત્રૈલોક્યં સચરાચરમ્ ॥ ૫૦॥

સુપ્રસન્નઃ શિવો જાતઃ શિવા ચ જગદમ્બિકા ।
ધૃતં તયા ચ તલ્લિઙ્ગં તેન રૂપેણ વૈ તદા ॥ ૫૧॥

લોકાનાં સ્થાપિતે લિઙ્ગે કલ્યાણં ચાભવત્તદા ।
પ્રસિદ્ધં ચૈવ તલ્લિઙ્ગં ત્રિલોક્યામભવદ્ દ્વિજાઃ ॥ ૫૨॥

હાટકેશમિતિ ખ્યાતં તચ્છિવાશિવમિત્યપિ ।
પૂજનાત્તસ્ય લોકાનાં સુખં ભવતિ સર્વથા ॥ ૫૩॥

ઇહ સર્વસમૃદ્ધિઃ સ્યાન્નાનાસુખવહાધિકા ।
પરત્ર પરમા મુક્તિર્નાત્ર કાર્યા વિચારણા ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં લિઙ્ગસ્વરૂપકારણવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૪.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૩. ત્રયોદશોઽધ્યાયઃ । બટુકોત્પત્તિવર્ણનમ્ ।

સૂત ઉવાચ ।
યથાભવલ્લિઙ્ગરૂપઃ સમ્પૂજ્યસ્ત્રિભવે શિવઃ ।
તથોક્તં વા દ્વિજાઃ પ્રીત્યા કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૧॥

ઋષય ઊચુઃ ।
અન્ધકેશ્વરલિઙ્ગસ્ય મહિમાનં વદ પ્રભો ।
તથાન્યચ્છિવલિઙ્ગાનાં પ્રીત્યા વક્તુમિહાર્હસિ ॥ ૨॥

સૂત ઉવાચ ।
પુરાબ્ધિગર્તમાશ્રિત્ય વસન્ દૈત્યોઽન્ધકાસુરઃ ।
સ્વવશં કારયામાસ ત્રૈલોક્યં સુરસૂદનઃ ॥ ૩॥

તસ્માદ્ગર્તાચ્ચ નિઃસૃત્ય પીડયિત્વા પુનઃ પ્રજાઃ ।
પ્રાવિશચ્ચ તદા દૈત્યસ્તં ગર્તં સુપરાક્રમઃ ॥ ૪॥

દેવાશ્ચ દુઃખિતાઃ સર્વે શિવં પ્રાર્થ્ય પુનઃપુનઃ ।
સર્વં નિવેદયામાસુઃ સ્વદુઃખં ચ મુનીશ્વરાઃ ॥ ૫॥

સૂત ઉવાચ ।
તદાકર્ણ્ય વચસ્તેષાં દેવાનાં પરમેશ્વરઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા દુષ્ટહન્તા સતાં ગતિઃ ॥ ૬॥

શિવ ઉવાચ ।
ઘાતયિષ્યામિ તં દૈત્યમન્ધકં સુરસૂદનમ્ ।
સૈન્યં ચ નીયતાન્દેવા હ્યાયામિ ચ ગણૈઃ સહ ॥ ૭॥

તસ્માદ્ગર્તાદન્ધકે હિ દેવર્ષિદ્રુહિ ભીકરે ।
નિઃસૃતે ચ તદા તસ્મિન્દેવા ગર્તમુપાશ્રિતાઃ ॥ ૮॥

દૈત્યાશ્ચ દેવતાશ્ચૈવ યુદ્ધં ચક્રુઃ સુદારુણમ્ ।
શિવાનુગ્રહતો દેવાઃ પ્રબલાશ્ચાભવઁસ્તદા ॥ ૯॥

દેવૈશ્ચ પીડિતઃ સોઽપિ યાવદ્ગર્તમુપાગતઃ ।
તાવચ્છૂલેન સમ્પ્રોતઃ શિવેન પરમાત્મના ॥ ૧૦॥

તત્રત્યશ્ચ તદા શમ્ભું ધ્યાત્વા સમ્પ્રાર્થયત્તદા ।
અન્તકાલે ચ ત્વાં દૃષ્ટ્વા તાદૃશો ભવતિ ક્ષણાત્ ॥ ૧૧॥

ઇત્યેવં સંસ્તુતઃ સોઽપિ પ્રસન્નઃ શઙ્કરસ્તદા ।
ઉવાચ વચનં તત્ર વરં બ્રૂહિ દદામિ તે ॥ ૧૨॥

ઇત્યેવં વચનં શ્રુત્વા સ દૈત્યઃ પુનરબ્રવીત્ ।
સુપ્રણમ્ય શિવં સ્તુત્વા સત્ત્વભાવમુપાશ્રિતઃ ॥ ૧૩॥

અન્ધક ઉવાચ ।
યદિ પ્રસન્નો દેવેશ સ્વભક્તિં દેહિ મે શુભામ્ ।
કૃપાં કૃત્વા વિશેષેણ સંસ્થિતો ભવ ચેહ વૈ ॥ ૧૪॥

સૂત ઉવાચ ।
ઇત્યુક્તસ્તેન દૈત્યં તં તદ્ગર્તે ચાક્ષિપદ્ધરઃ ।
સ્વયં તત્ર સ્થિતો લિઙ્ગરૂપોઽસૌ લોકકામ્યયા ॥ ૧૫॥

અન્ધકેશં ચ તલ્લિઙ્ગં નિત્યં યઃ પૂજયેન્નરઃ ।
ષણ્માસાજ્જાયતે તસ્ય વાઞ્છાસિદ્ધિર્ન સંશયઃ ॥ ૧૬॥

વૃત્ત્યર્થં પૂજયેલ્લિઙ્ગં લોકસ્ય હિતકારકમ્ ।
ષણ્માસં યો દ્વિજશ્ચૈવ સ વૈ દેવલકઃ સ્મૃતઃ ॥ ૧૭॥

યથા દેવલકશ્ચૈવ સ ભવેદિહ વૈ તદા ।
દેવલકશ્ચ યઃ પ્રોક્તો નાધિકારો દ્વિજસ્ય હિ ॥ ૧૮॥

॥ ઋષય ઊચુઃ ॥

દેવલકશ્ચ કઃ પ્રોક્તઃ કિં કાર્યં તસ્ય વિદ્યતે ।
તત્ત્વં વદ મહાપ્રાજ્ઞ લોકાનાં હિતહેતવે ॥ ૧૯॥

સૂત ઉવાચ ।
દધીચિર્નામ વિપ્રો યો ધર્મિષ્ઠો વેદપારગઃ ।
શિવભક્તિરતો નિત્યં શિવશાસ્ત્રપરાયણઃ ॥ ૨૦॥

તસ્ય પુત્રસ્તથા હ્યાસીત્સ્મૃતો નામ્ના સુદર્શનઃ ।
તસ્ય ભાર્યા દુકૂલા ચ નામ્ના દુષ્ટકુલોદ્ભવા ॥ ૨૧॥

તદ્વશે સ ચ ભર્તાસીત્તસ્ય પુત્રચતુષ્ટયમ્ ।
સોઽપિ નિત્યં શિવસ્યૈવ પૂજાં ચ સ્મ કરોત્યસૌ ॥ ૨૨॥

દધીચેસ્તુ તદા હ્યાસીદ્ ગ્રામાન્તરનિવેશનમ્ ।
જ્ઞાતિસંયોગતશ્ચૈવ જ્ઞાતિભિર્ન સ મોચિતઃ ॥ ૨૩॥

કથયિત્વા ચ પુત્રં સ શિવભક્તિરતો ભવ ।
ઇત્યુક્ત્વા સ ગતો મુક્તો દધીચિઃ શૈવસત્તમઃ ॥ ૨૪॥

સુદર્શનસ્તત્પુત્રોઽપિ શિવપૂજાં ચકાર હ ।
એવં ચિરતરઃ કાલો વ્યતીયાય મુનીશ્વરાઃ ॥ ૨૫॥

એવં ચ શિવરાત્રિશ્ચ સમાયાતા કદાચન ।
તસ્યાં ચોપોષિતાઃ સર્વે સ્વયં સંયોગતસ્તદા ॥ ૨૬॥

પૂજાં કૃત્વા ગતઃ સોઽપિ સુદર્શન ઇતિ સ્મૃતઃ ।
સ્ત્રીસઙ્ગં શિવરાત્રૌ તુ કૃત્વા પુનરિહાગતઃ ॥ ૨૭॥

ન સ્નાનં તેન ચ કૃતં તદ્રાત્ર્યાં શિવપૂજનમ્ ।
તેન તત્કર્મપાકેન ક્રુદ્ધઃ પ્રોવાચ શઙ્કરઃ ॥ ૨૮॥

મહેશ્વર ઉવાચ ।
શિવરાત્ર્યાં ત્વયા દુષ્ટ સેવનં ચ સ્ત્રિયાઃ કૃતમ્ ।
અસ્નાતેન મદીયા ચ કૃતા પૂજાવિવેકિના ॥ ૨૯॥

જ્ઞાત્વા ચૈવં કૃતં યસ્માત્તસ્માત્ત્વં જડતાં વ્રજ ।
મમાસ્પૃશ્યો ભવ ત્વં ચ દૂરતો દર્શનં કુરુ ॥ ૩૦॥

સૂત ઉવાચ ।
ઇતિ શપ્તો મહેશેન દાધીચિઃ સ સુદર્શનઃ ।
જડત્વં પ્રાપ્તવાન્સદ્યઃ શિવમાયાવિમોહિતઃ ॥ ૩૧॥

એતસ્મિન્સમયે વિપ્રા દધીચિઃ શૈવસત્તમઃ ।
ગ્રામાન્તરાત્સમાયાતો વૃત્તાન્તં શ્રુતવાઁશ્ચ સઃ ॥ ૩૨॥

શિવેન ભર્ત્સિતઃ સોઽપિ દુઃખિતોઽભૂદતીવ હિ ।
રુરોદ હા હતોઽસ્મીતિ દુઃખેન સુતકર્મણા ॥ ૩૩॥

પુનઃપુનરુવાચેતિ સ દધીચિઃ સતાં મતઃ ।
અનેનેદં કુપુત્રેણ હતં મે કુલમુત્તમમ્ ॥ ૩૪॥

સ પુત્રોऽપિ હતો ભાર્યાં પુંશ્ચલીમુક્તવાન્દ્રુતમ્ ।
પશ્ચાત્તાપમનુપ્રાપ્ય સ્વપિત્રા પરિભર્ત્સિતઃ ॥ ૩૫॥

તત્પિત્રા ગિરિજા તત્ર પૂજિતા વિધિભિર્વરૈઃ ।
સુયત્નતો મહાભક્ત્યા સ્વપુત્રસુખહેતવે ॥ ૩૬॥

સુદર્શનોऽપિ ગિરિજાં પૂજયામાસ ચ સ્વયમ્ ।
ચણ્ડીપૂજનમાર્ગેણ મહાભક્ત્યા શુભૈઃ સ્તવૈઃ ॥ ૩૭॥

એવં તૌ પિતૃપુત્રૌ હિ નાનોપાયૈઃ સુભક્તિતઃ ।
પ્રસન્નાં ચક્રતુર્દેવીં ગિરિજાં ભક્તવત્સલામ્ ॥ ૩૮॥

તયોઃ સેવાપ્રભાવેણ પ્રસન્ના ચણ્ડિકા તદા ।
સુદર્શનં ચ પુત્રત્વે ચકાર ગિરિજા મુને ॥ ૩૯॥

શિવં પ્રસાદયામાસ પુત્રાર્થે ચણ્ડિકા સ્વયમ્ ।
ક્રુદ્ધાક્રુદ્ધા પુનશ્ચણ્ડી તત્પુત્રસ્ય પ્રસન્નધીઃ ॥ ૪૦॥

અથાજ્ઞાય પ્રસન્નં તં મહેશં વૃષભધ્વજમ્ ॥

નમસ્કૃત્ય સ્વયં તસ્ય હ્યુત્સઙ્ગે તં ન્યવેશયત્ ॥ ૪૧॥

ધૃતસ્નાનં તશ્ચક્રે પુત્રસ્ય ગિરિજા સ્વયમ્ ।
ત્રિરાવૃત્તોપવીતં ચ ગ્રન્થિનૈકેન સંયુતમ્ ॥ ૪૨॥

સુદર્શનાય પુત્રાય દદૌ પ્રીત્યા તદામ્બિકા ।
ઉદ્દિશ્ય શિવગાયત્રીં ષોડશાક્ષરસંયુતામ્ ॥ ૪૩॥

તદોં નમઃ શિવાયેતિ શ્રીશબ્દપૂર્વકાય ચ ।
વારાન્ષોડશ સઙ્કલ્પપૂજાં કુર્યાદયં બટુઃ ॥ ૪૪॥

આસ્નાનાદિપ્રણામાન્તં પૂજયન્વૃષભધ્વજમ્ ।
મન્ત્રવાદિત્રપૂજાભિઃ સર્ષીણાં સન્નિધૌ તથા ॥ ૪૫॥

નામમન્ત્રાનનેકાંશ્ચ પાઠયામાસ વૈ તદા ।
ઉવાચ સુપ્રસન્નાત્મા ચણ્ડિકા ચ શિવસ્તથા ॥ ૪૬॥

મદર્પિતં ચ યત્કિઞ્ચિદ્ધનધાન્યાદિકં તથા ।
તત્સર્વં ચ ત્વયા ગ્રાહ્યં ન દોષાય ભવિષ્યતિ ॥ ૪૭॥

મમ કૃત્યે ભવાન્મુખ્યો દેવીકૃત્યે વિશેષતઃ ।

ઘૃતતૈલાદિકં સર્વં ત્વયા ગ્રાહ્યં મદર્પિતમ્ ॥ ૪૮॥

પ્રાજાપત્યં ભવેદ્ધર્હિ તર્હ્યેકો હિ ભવાન્ભવેત્ ।
તદા પૂજા ચ સમ્પૂર્ણાન્યથા સર્વા ચ નિષ્ફલા ॥ ૪૯॥

તિલકં વર્તુલં કાર્યં સ્નાનં કાર્યં સદા ત્વયા ।
શિવસન્ધ્યા ચ કર્તવ્યા ગાયત્રી ચ તદીયકા ॥ ૫૦॥

મત્સેવાં પ્રથમં કૃત્વા કાર્યમન્યત્કુલોચિતમ્ ।
એવં કૃતેઽખિલે ભદ્રં દોષાઃ ક્ષાન્તા મયા તવ ॥ ૫૧॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા તસ્ય પુત્રાશ્ચ ચત્વારો બટુકાસ્તદા ।
અભિષિક્તાશ્ચતુર્દિક્ષુ શિવેન પરમાત્મના ॥ ૫૨॥

ચણ્ડી ચૈવાત્મનિકટે પુત્રં સ્થાપ્ય સુદર્શનમ્ ।
તત્પુત્રાન્પ્રેરયામાસ વરાન્દત્ત્વા હ્યનેકશઃ ॥ ૫૩॥

દેવ્યુવાચ ।
ઉભયોર્વ્યૂહયોર્મધ્યે બટુકો યો ભવેન્મમ ।
તસ્ય સ્યાદ્વિજયો નિત્યં નાત્ર કાર્યા વિચારણા ॥ ૫૪॥

ભવાંશ્ચ પૂજિતો યેન તેનૈવાહં પ્રપૂજિતા ।
કર્તવ્યં હિ ભવદ્ભિશ્ચ સ્વીયં કર્મ સદા સુત ॥ ૫૫॥

સૂત ઉવાચ ।
એવં તસ્મૈ વરા દત્તાઃ સપુત્રાય મહાત્મને ।
સુદર્શનાય કૃપયા શિવાભ્યાં જગતાં કૃતે ॥ ૫૬॥

શિવાભ્યાં સ્થાપિતા યસ્માત્તસ્માત્તે બટુકાઃ સ્મૃતાઃ ।
તપોભ્રષ્ટા યતો જાતાઃ સ્મૃતાસ્તસ્માત્તપોઽધમાઃ ॥ ૫૭॥

શિવયોઃ કૃપયા સર્વે વિસ્તારં બહુધા ગતાઃ ।
તેષાં ચ પ્રથમા પૂજા મહાપૂજા મહાત્મનઃ ॥ ૫૮॥

તેન યાવત્કૃતા નૈવ પૂજા વૈ શઙ્કરસ્ય ચ ।
તાવત્પૂજા ન કર્ત્તવ્યા કૃતા ચેન્ન શુભાપિ સા ॥ ૫૯॥

શુભં વાપ્યશુભં વાપિ બટુકં ન પરિત્યજેત્ ।
પ્રાજાપત્યે ચ ભોજ્યે વૈ બટુરેકો વિશિષ્યતે ॥ ૬૦॥

શિવયોશ્ચ તથા કાર્યે વિશેષોઽત્ર પ્રદૃશ્યતે ।
તદેવ શ ૃણુ સુપ્રાજ્ઞ યથાહં વચ્મિ તેઽનઘ ॥ ૬૧॥

તસ્યૈવ નગરે રાજ્ઞો ભદ્રસ્ય નિત્યભોજને ।
પ્રાજાપત્યસ્ય નિયમે હ્યન્ધકેશસમીપતઃ ॥ ૬૨॥

યજ્જાતમદ્ભુતં વૃત્તં શિવાનુગ્રહકારણાત્ ।
શ્રૂયતાં તચ્ચ સુપ્રીત્યા કથયામિ યથાશ્રુતમ્ ॥ ૬૩॥

ધ્વજ એકશ્ચ તદ્રાજ્ઞે દત્તસ્તુષ્ટેન શમ્ભુના ।
પ્રોક્તશ્ચ કૃપયા રાજા દેવદેવેન તેન સઃ ॥ ૬૪॥

પ્રાતશ્ચ બધ્યતાં રાજન્ધ્વજો રાત્રૌ પતિષ્યતિ ।
મમ ત્વેવં ચ સમ્પૂર્ણે પ્રાજાપત્યે તથા પુનઃ ॥ ૬૫॥

અન્યથાયં ધ્વજો મે હિ રાત્રાવપિ સ્થિરો ભવેત્ ।
ઇત્યુક્ત્વાન્તર્હિતઃ શમ્ભૂ રાજ્ઞે તુષ્ટઃ કૃપાનિધિઃ ॥ ૬૬॥

તથેતિ નિયમશ્ચાસીત્તસ્ય રાજ્ઞો મહામુને ।
પ્રાજાપત્યં કૃતં નિત્યં શિવપૂજાવિધાનતઃ ॥ ૬૭॥

સ્વયં પ્રાતર્વિવર્ધેત ધ્વજઃ સાયં પતેદિતિ ।
યદિ કાર્યં ચ સમ્પૂર્ણં જાતં ચૈવ ભવેદિહ ॥ ૬૮॥

એકસ્મિન્સમયે ચાત્ર બટોઃ કાર્યં પુરા હ્યભૂત્ ।
ધ્વજઃ સ પતિતો વૈ હિ બ્રહ્મભોજં વિનાપિ હિ ॥ ૬૯॥

દૃષ્ટ્વા તચ્ચ તદા તત્ર પૃષ્ટા રાજ્ઞા ચ પણ્ડિતાઃ ।
ભુઞ્જતે બ્રાહ્મણા હ્યત્ર નોત્થિતો વૈ ધ્વજસ્ત્વતિ ॥ ૭૦॥

કથં ચ પતિતઃ સોઽત્ર બ્રાહ્મણા બ્રૂત સત્યતઃ ।
તે પૃષ્ટાશ્ચ તદા પ્રોચુર્બ્રાહ્મણાઃ પણ્ડિતોત્તમાઃ ॥ ૭૧॥

બ્રહ્મભોજે મહારાજ બટુકો ભોજિતઃ પુરા ।
ચણ્ડીપુત્રઃ શિવસ્તુષ્ટસ્તસ્માચ્ચ પતિતો ધ્વજઃ ॥ ૭૨॥

તચ્છ્રુત્વા નૃપતિઃ સોઽથ જનાશ્ચાન્યેઽપિ સર્વશઃ ।
અભવન્વિસ્મિતાસ્તત્ર પ્રશંસાં ચક્રિરે તતઃ ॥ ૭૩॥

એવં ચ મહિમા તેષાં વર્ધિતઃ શઙ્કરેણ હિ ।
તસ્માચ્ચ બટુકાઃ શ્રેષ્ઠાઃ પુરાવિદ્ભિઃ પ્રકીર્તિતાઃ ॥ ૭૪॥

શિવપૂજા તુ તૈઃ પૂર્વમુત્તાર્યા નાન્યથા પુનઃ ।
અન્યેષાં નાધિકારોઽસ્તિ શિવસ્ય વચનાદિહ ॥ ૭૫॥

ઉત્તારણં ચ કાર્યં વૈ પૂજા પૂર્ણા ભવત્વિતિ ।
એતાવદેવ તેષાં તુ કાર્યં નાન્યત્તથૈવ ચ ॥ ૭૬॥

એતત્સર્વં સમાખ્યાતં યત્પૃષ્ટં ચ મુનીશ્વરાઃ ।
યચ્છ્રુત્વા શિવપૂજાયાઃ ફલં પ્રાપ્નોતિ વૈ નરઃ ॥ ૭૭॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં બટુકોત્પત્તિવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૪.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૪. ચતુર્દશોઽધ્યાયઃ । સોમનાથજ્યોતિર્લિઙ્ગોત્પત્તિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
જ્યોતિષાં ચૈવ લિઙ્ગાનાં માહાત્મ્યં કથયાધુના ।
ઉત્પત્તિં ચ તથા તેષાં બ્રૂહિ સર્વં યથાશ્રુતમ્ ॥ ૧॥

સૂત ઉવાચ ।
શૃણ્વન્તુ વિપ્રા વક્ષ્યામિ તન્માહાત્મ્યં જનિં તથા ।
સઙ્ક્ષેપતો યથાબુદ્ધિ સદ્ગુરોશ્ચ મયા શ્રુતમ્ ॥ ૨॥

એતેષાં ચૈવ માહાત્મ્યં વક્તું વર્ષશતૈરપિ ।
શક્યતે ન મુનિશ્રેષ્ઠાસ્તથાપિ કથયામિ વઃ ॥ ૩॥

સોમનાથશ્ચ તેષાં વૈ પ્રથમઃ પરિકીર્તિતઃ ।
તન્માહાત્મ્યં શૃણુ મુને પ્રથમં સાવધાનતઃ ॥ ૪॥

સપ્તવિંશન્મિતાઃ કન્યા દક્ષેણ ચ મહાત્મના ।
તેન ચન્દ્રમસે દત્તા અશ્વિન્યાદ્યા મુનીશ્વરાઃ ॥ ૫॥

ચન્દ્રં ચ સ્વામિનં પ્રાપ્ય શોભમાના વિશેષતઃ ।
ચન્દ્રોઽપિ ચૈવ તાઃ પ્રાપ્ય શોભતે સ્મ નિરન્તરમ્ ॥ ૬॥

હેમ્ના ચૈવ મણિર્ભાતિ મણિના હેમ ચૈવ હિ ।
એવં ચ સમયે તસ્ય યજ્જાતં શ્રૂયતામિતિ ॥ ૭॥

સર્વાસ્વપિ ચ પત્નીષુ રોહિણી નામ યા સ્મૃતા ।
યથૈકા સા પ્રિયા ચાસીત્તથાન્યા ન કદાચન ॥ ૮॥

અન્યાશ્ચ દુઃખમાપન્નાઃ પિતરં શરણં યયુઃ ।
ગત્વા તસ્મૈ ચ યદ્દુઃખં તથા તાભિર્નિવેદિતમ્ ॥ ૯॥

દક્ષઃ સ ચ તથા શ્રુત્વા દુઃખં ચ પ્રાપ્તાવાંસ્તદા ।
સમાગત્ય દ્વિજાશ્ચન્દ્રં શાન્ત્યાવોચદ્ વચસ્તદા ॥ ૧૦॥

દક્ષ ઉવાચ ।
વિમલે ચ કુલે ત્વં હિ સમુત્પન્નઃ કલાનિધે ।
આશ્રિતેષુ ચ સર્વેષુ ન્યૂનાધિક્યં કથં તવ ॥ ૧૧॥

કૃતં ચેત્તત્કૃતં તચ્ચ ન કર્તવ્યં ત્વયા પુનઃ ।
વર્તનં વિષમત્વેન નરકપ્રદમીરિતમ્ ॥ ૧૨॥

સૂત ઉવાચ ।
દક્ષશ્ચૈવં ચ સમ્પ્રાર્થ્ય ચન્દ્રં જામાતરં સ્વયમ્ ।
જગામ મન્દિરં સ્વં વૈ નિશ્ચયં પરમં ગતઃ ॥ ૧૩॥

ચન્દ્રોઽપિ વચનં તસ્ય ન ચકાર વિમોહિતઃ ।
શિવમાયાપ્રભાવેણ યયા સમ્મોહિતં જગત્ ॥ ૧૪॥

શુભં ભાવિ યદા યસ્ય શુભં ભવતિ તસ્ય વૈ ।
અશુભં ચ યદા ભાવિ કથં તસ્ય શુભં ભવેત્ ॥ ૧૫॥

ચન્દ્રોઽપિ બલવદ્ભાવિવશાન્મેને ન તદ્વચઃ ।
રોહિણ્યાં ચ સમાસક્તો નાન્યાં મેને કદાચન ॥ ૧૬॥

તચ્છ્રુત્વા પુનરાગત્ય સ્વયં દુઃખસમન્વિતઃ ।
પ્રાર્થયામાસ ચન્દ્રં સ દક્ષો દક્ષઃ સુનીતિતઃ ॥ ૧૭॥

દક્ષ ઉવાચ ।
શ્રૂયતાં ચન્દ્ર યત્પૂર્વં પ્રાર્થિતો બહુધા મયા ।
ન માનિતં ત્વયા યસ્માત્તસ્માત્ત્વં ચ ક્ષયી ભવ ॥ ૧૮॥

સૂત ઉવાચ ।

ઇત્યુક્તે તેન ચન્દ્રો વૈ ક્ષયી જાતઃ ક્ષણાદિહ ।
હાહાકારો મહાનાસીત્તદેન્દૌ ક્ષીણતાં ગતે ॥ ૧૯॥

દેવર્ષયસ્તદા સર્વે કિં કાર્યં હા કથં ભવેત્ ।
ઇતિ દુઃખં સમાપન્ના વિહ્વલા હ્યભવન્મુને ॥ ૨૦॥

વિજ્ઞાપિતાશ્ચ ચન્દ્રેણ સર્વે શક્રાદયઃ સુરાઃ ।
ઋષયશ્ચ વસિષ્ઠાદ્યા બ્રહ્માણં શરણં યયુઃ ॥ ૨૧॥

ગત્વાપિ તુ તદા પ્રોચુસ્તદ્ વૃત્તં નિખિલં મુને ।
બ્રહ્મણે ઋષયો દેવા નત્વા નુત્વાતિવિહ્વલાઃ ॥ ૨૨॥

બ્રહ્માપિ તદ્વચઃ શ્રુત્વા વિસ્મયં પરમં યયૌ ।
શિવમાયાં સુપ્રશસ્ય શ્રાવયંસ્તાનુવાચ હ ॥ ૨૩॥

બ્રહ્મોવાચ ।
અહો કષ્ટં મહજ્જાતં સર્વલોકસ્ય દુઃખદમ્ ।
ચન્દ્રસ્તુ સર્વદા દુષ્ટો દક્ષશ્ચ શપ્તવાનમુમ્ ॥ ૨૪॥

સર્વં દુષ્ટેન ચન્દ્રેણ કૃતં કર્માણ્યનેકશઃ ।
શ્રૂયતામૃષયો દેવાશ્ચન્દ્રકૃત્યં પુરાતનમ્ ॥ ૨૫॥

બૃહસ્પતેર્ગૃહં ગત્વા તારા દુષ્ટેન વૈ હૃતા ।
તસ્ય ભાર્યા પુનશ્ચૈવ સ દૈત્યાન્સમુપસ્થિતઃ ॥ ૨૬॥

સમાશ્રિતસ્તદા દૈત્યાન્યુદ્ધં દેવૈશ્ચકાર હ ।
મયાત્રિણા નિષિદ્ધશ્ચ તસ્મૈ તારાં દદૌ શશી ॥ ૨૭॥

તાં ચ ગર્ભવતીં દૃષ્ટ્વા ન ગૃહ્ણામીતિ સોઽબ્રવીત્ ।
અસ્માભિર્વારિતો જીવઃ કૃચ્છ્રાજ્જગ્રાહ તાં તદા ॥ ૨૮॥

યદિ ગર્ભં જહાતીહ ગૃહ્ણામીત્યબ્રવીત્પુનઃ ।
ગર્ભે મયા પુનસ્તત્ર ત્યાજિતે મુનિસત્તમાઃ ॥ ૨૯॥

કસ્યાયં ચ પુનર્ગર્ભઃ સોમસ્યેતિ ચ સાબ્રવીત્ ।
પશ્ચાત્તેન ગૃહીતા સા મયા ચ વારિતેન વૈ ॥ ૩૦॥

એવંવિધાનિ ચન્દ્રસ્ય દુશ્ચરિત્રાણ્યનેકશઃ ।
વર્ણ્યન્તે કિં પુનસ્તાનિ સોઽદ્યાપિ કુરુતે કથમ્ ॥ ૩૧॥

યજ્જાતં તત્ સુસઞ્જાતં નાન્યથા ભવતિ ધ્રુવમ્ ।

અતઃ પરમુપાયં વો વક્ષ્યામિ શ‍ૃણુતાદરાત્ ॥ ૩૨॥

પ્રભાસકે શુભે ક્ષેત્રે વ્રજેશ્ચન્દ્રઃ સદૈવતૈઃ ।
શિવમારાધયેત્તત્ર મૃત્યુઞ્જયવિધાનતઃ ॥ ૩૩॥

નિધાયેશં પુરસ્તત્ર ચન્દ્રસ્તપતુ નિત્યશઃ ।
પ્રસન્નશ્ચ શિવઃ પશ્ચાદક્ષયં તં કરિષ્યતિ ॥ ૩૪॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય બ્રહ્મણસ્તે સુરર્ષયઃ ।
સન્નિવૃત્યાયયુઃ સર્વે યત્ર દક્ષવિધૂ તતઃ ॥ ૩૫॥

ગૃહીત્વા તે તતશ્ચન્દ્રં દક્ષં ચાશ્વાસ્ય નિર્જરાઃ ।
પ્રભાસે ઋષયશ્ચકુસ્તત્ર ગત્વાખિલાશ્ચ વૈ ॥ ૩૬॥

આવાહ્ય તીર્થવર્યાણિ સરસ્વત્યાદિકાનિ ચ ।
પાર્થિવેન તદા પૂજાં મૃત્યુઞ્જયવિધાનતઃ ॥ ૩૭॥

તે દેવાશ્ચ તદા સર્વે ઋષયો નિર્મલાશયાઃ ।
સ્થાપ્ય ચન્દ્રં પ્રભાસે ચ સ્વં સ્વં ધામ યયુર્મુદા ॥ ૩૮॥

ચન્દ્રેણ ચ તપસ્તપ્તં ષણ્માસં ચ નિરન્તરમ્ ।
મૃત્યુઞ્જયેન મન્ત્રેણ પૂજિતો વૃષભધ્વજઃ ॥ ૩૯॥

દશકોટિમિતં મન્ત્રં સમાવૃત્ય શશી ચ તમ્ ।
ધ્યાત્વા મૃત્યુઞ્જયં મન્ત્રં તસ્થૌ નિશ્ચલમાનસઃ ॥ ૪૦॥

તં દૃષ્ટ્વા શઙ્કરો દેવઃ પ્રસન્નોઽભૂત્તતઃ પ્રભુઃ ।
આવિર્ભૂય વિધું પ્રાહ સ્વભક્તં ભક્તવત્સલઃ ॥ ૪૧॥

શઙ્કર ઉવાચ ।
વરં વૃણીષ્વ ભદ્રં તે મનસા યત્સમીપ્સિતમ્ ।
પ્રસન્નોઽહં શશિન્સર્વં દાસ્યે વરમનુત્તમમ્ ॥ ૪૨॥

ચન્દ્ર ઉવાચ ।
યદિ પ્રસન્નો દેવેશ કિમસાધ્યં ભવેન્મમ ।
તથાપિ મે શરીરસ્ય ક્ષયં વારય શઙ્કર ॥ ૪૩॥

ક્ષન્તવ્યો મેઽપરાધશ્ચ કલ્યાણં કુરુ સર્વદા ।
ઇત્યુક્તે ચ તદા તેન શિવો વચનમબ્રવીત્ ॥ ૪૪॥

શિવ ઉવાચ ।
પક્ષે ચ ક્ષીયતાં ચન્દ્ર કલા તે ચ દિને દિને ।
પુનશ્ચ વર્ધતાં પક્ષે સા કલા ચ નિરન્તરમ્ ॥ ૪૫॥

સૂત ઉવાચ ।
એવં સતિ તદા દેવા હર્ષનિર્ભરમાનસાઃ ।
ઋષયશ્ચ તથા સર્વે સમાજગ્મુર્દ્રુતં દ્વિજાઃ ॥ ૪૬॥

આગત્ય ચ તદા સર્વે ચન્દ્રાયાશિષમબ્રુવન્ ।
શિવં નત્વા કરૌ બદ્ધ્વા પ્રાર્થયામાસુરાદરાત્ ॥ ૪૭॥

દેવાઃ ઊચુઃ ।
દેવદેવ મહાદેવ પરમેશ નમોઽસ્તુ તે ।
ઉમયા સહિતઃ શમ્ભો સ્વામિન્નત્ર સ્થિરો ભવ ॥ ૪૮॥

સૂત ઉવાચ ।
તતશ્ચન્દ્રેણ સદ્ભક્ત્યા સંસ્તુતઃ શઙ્કરઃ પુરા ।
નિરાકારશ્ચ સાકારઃ પુનશ્ચૈવાભવત્પ્રભુઃ ॥ ૪૯॥

પ્રસન્નશ્ચ સ દેવાનાં ક્ષેત્રમાહાત્મ્યહેતવે ।
ચન્દ્રસ્ય યશસે તત્ર નામ્ના ચન્દ્રસ્ય શઙ્કરઃ ॥ ૫૦॥

સોમેશ્વરશ્ચ નામ્નાસીદ્વિખ્યાતો ભુવનત્રયે ।
ક્ષયકુષ્ઠાદિરોગાણાં નાશકઃ પૂજનાદ્ દ્વિજાઃ ॥ ૫૧॥

ધન્યોઽયં કૃતકૃત્યોઽયં યન્નામ્ના શઙ્કરઃ સ્વયમ્ ।
સ્થિતશ્ચ જગતાં નાથઃ પાવયઞ્જગતીતલમ્ ॥ ૫૨॥

તત્કુણ્ડં તૈશ્ચ તત્રૈવ સર્વૈર્દેવૈઃ પ્રતિષ્ઠિતમ્ ।
શિવેન બ્રહ્મણા તત્ર હ્યવિભક્તં તુ તત્પુનઃ ॥ ૫૩॥

ચન્દ્રકુણ્ડં પ્રસિદ્ધં ચ પૃથિવ્યાં પાપનાશનમ્ ।
તત્ર સ્નાતિ નરો યઃ સ સર્વૈઃ પાપૈઃ પ્રમુચ્યતે ॥ ૫૪॥

રોગાઃ સર્વે ક્ષયાદ્યાશ્ચ હ્યસાધ્યા યે ભવન્તિ વૈ ।
તે સર્વે ચ ક્ષયં યાન્તિ ષણ્માસં સ્નાનમાત્રતઃ ॥ ૫૫॥

પ્રભાસં ચ પરિક્રમ્ય પૃથિવીક્રમસમ્ભવમ્ ।
ફલં પ્રાપ્નોતિ શુદ્ધાત્મા મૃતઃ સ્વર્ગે મહીયતે ॥ ૫૬॥

સોમલિઙ્ગં નરો દૃષ્ટ્વા સર્વપાપાત્પ્રમુચ્યતે ।
લબ્ધ્વા ફલં મનોઽભીષ્ટં મૃતઃ સ્વર્ગં સમીહતે ॥ ૫૭॥

યદ્યત્ફલં સમુદ્દિશ્ય કુરુતે તીર્થમુત્તમમ્ ।
તત્તત્ફલમવાપ્નોતિ સર્વથા નાત્ર સંશયઃ ॥ ૫૮॥

ઇતિ તે ઋષયો દેવાઃ ફલં દૃષ્ટ્વા તથાવિધમ્ ।
મુદા શિવં નમસ્કૃત્ય ગૃહીત્વા ચન્દ્રમક્ષયમ્ ॥ ૫૯॥

પરિક્રમ્ય ચ તત્તીર્થં પ્રશંસન્તશ્ચ તે યયુઃ ।
ચન્દ્રશ્ચાપિ સ્વકીયં ચ કાર્યં ચક્રે પુરાતનમ્ ॥ ૬૦॥

ઇતિ સર્વઃ સમાખ્યાતઃ સોમેશસ્ય સમુદ્ભવઃ ।
એવં સોમેશ્વરં લિઙ્ગં સમુત્પન્નં મુનીશ્વરાઃ ॥ ૬૧॥

યઃ શૃણોતિ તદુત્પત્તિં શ્રાવયેદ્વા પરાન્નરઃ ।
સર્વાન્કામાનવાપ્નોતિ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં સોમનાથજ્યોતિર્લિઙ્ગોત્પત્તિવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૪.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૫. પઞ્ચદશોઽધ્યાયઃ । મલ્લિકાર્જુનનામકદ્વિતીયજ્યોતિર્લિઙ્ગવર્ણનમ્ ।

સૂત ઉવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ મલ્લિકાર્જુનસમ્ભવમ્ ।
યં શ્રુત્વા ભક્તિમાન્ધીમાન્સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧॥

પૂર્વં ચ કથિતં યચ્ચ તત્પુનઃ કથયામ્યહમ્ ।
કુમારચરિતં દિવ્યં સર્વપાપવિનાશનમ્ ॥ ૨॥

યદા પૃથ્વીં સમાક્રમ્ય કૈલાસં પુનરાગતઃ ।
કુમારઃ સ શિવાપુત્રસ્તારકારિર્મહાબલઃ ॥ ૩॥

તદા સુરર્ષિરાગત્ય સર્વં વૃત્તં જગાદ હ ।

ગણેશ્વરવિવાહાદિ ભ્રામયંસ્તં સ્વબુદ્ધિતઃ ॥ ૪॥

તચ્છ્રુત્વા સ કુમારો હિ પ્રણમ્ય પિતરૌ ચ તૌ ।
જગામ પર્વતં ક્રૌઞ્ચં પિતૃભ્યાં વારિતોઽપિ હિ ॥ ૫॥

કુમારસ્ય વિયોગેન તન્માતા ગિરિજા યદા ।
દુઃખિતાસીત્તદા શમ્ભુસ્તામુવાચ સુબોધકૃત્ ॥ ૬॥

કથં પ્રિયે દુઃખિતાસિ ન દુઃખં કુરુ પાર્વતિ ।
આયાસ્યતિ સુતઃ સુભ્રૂસ્ત્યજ્યતાં દુઃખમુત્કટમ્ ॥ ૭॥

સા યદા ચ ન તં મેને પાર્વતી દુઃખિતા ભૃશમ્ ।
તદા ચ પ્રેષિતાસ્તત્ર શઙ્કરેણ સુરર્ષયઃ ॥ ૮॥

દેવાશ્ચ ઋષયઃ સર્વે સગણા હિ મુદાન્વિતાઃ ।
કુમારાનયનાર્થં વૈ તત્ર જગ્મુઃ સુબુદ્ધયઃ ॥ ૯॥

તત્ર ગત્વા ચ તે સર્વે કુમારં સુપ્રણમ્ય ચ ।
વિજ્ઞાપ્ય બહુધાપ્યેનં પ્રાર્થનાં ચક્રુરાદરાત્ ॥ ૧૦॥

દેવાદિપ્રાર્થનાં તાં ચ શિવાજ્ઞાસઙ્કુલાં ગુરુઃ ।
ન મેને સ કુમારો હિ મહાહઙ્કારવિહ્વલઃ ॥ ૧૧॥

તતશ્ચ પુનરાવૃત્ય સર્વે તે હિ શિવાન્તિકમ્ ।
સ્વં સ્વં સ્થાનં ગતા નત્વા પ્રાપ્ય શઙ્કરશાસનમ્ ॥ ૧૨॥

તદા ચ ગિરિજા દેવી વિરહં પુત્રસમ્ભવમ્ ।
શમ્ભુશ્ચ પરમં દુઃખં પ્રાપ તસ્મિન્નનાગતે ॥ ૧૩॥

અથો સુદુઃખિતૌ દીનૌ લોકાચારકરૌ તદા ।
જગ્મતુસ્તત્ર સુસ્નેહાત્સ્વપુત્રો યત્ર સંસ્થિતઃ ॥ ૧૪॥

સ પુત્રશ્ચ કુમારાખ્યઃ પિત્રોરાગમનં ગિરેઃ ।
જ્ઞાત્વા દૂરં ગતોઽસ્નેહાદ્યોજનત્રયમેવ ચ ॥ ૧૫॥

ક્રૌઞ્ચે ચ પર્વતે દૂરં ગતે તસ્મિન્સ્વપુત્રકે ।
તૌ ચ તત્ર સમાસીનૌ જ્યોતીરૂપં સમાશ્રિતૌ ॥ ૧૬॥

પુત્રસ્નેહાતુરૌ તૌ વૈ શિવૌ પર્વણિ પર્વણિ ।
દર્શનાર્થં કુમારસ્ય સ્વપુત્રસ્ય હિ ગચ્છતઃ ॥ ૧૭॥

અમાવાસ્યાદિને શમ્ભુઃ સ્વયં ગચ્છતિ તત્ર હ ।
પૌર્ણમાસીદિને તત્ર પાર્વતી ગચ્છતિ ધ્રુવમ્ ॥ ૧૮॥

તદ્દિનં હિ સમારભ્ય મલ્લિકાર્જુનસમ્ભવમ્ ।
લિઙ્ગં ચૈવ શિવસ્યૈકં પ્રસિદ્ધં ભુવનત્રયે ॥ ૧૯॥

તલ્લિઙ્ગં યઃ સમીક્ષેત સ સર્વૈઃ કિલ્બિષૈરપિ ।
મુચ્યતે નાત્ર સન્દેહઃ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૨૦॥

દુઃખં ચ દૂરતો યાતિ સુખમાત્યન્તિકં લભેત્ ।
જનનીગર્ભસમ્ભૂતં કષ્ટં નાપ્નોતિ વૈ પુનઃ ॥ ૨૧॥

ધનધાન્યસમૃદ્ધિશ્ચ પ્રતિષ્ઠારોગ્યમેવ ચ ।
અભીષ્ટફલસિદ્ધિશ્ચ જાયતે નાત્ર સંશયઃ ॥ ૨૨॥

જ્યોતિર્લિઙ્ગં દ્વિતીયં ચ પ્રોક્તં મલ્લિકસંજ્ઞિતમ્ ।
દર્શનાત્સર્વસુખદં કથિતં લોકહેતવે ॥ ૨૩॥

ઇતિ શ્રીશિવપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં મલ્લિકાર્જુનનામકદ્વિતીયજ્યોતિર્લિઙ્ગવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૪.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૬. ષોડશોઽધ્યાયઃ । મહાકાલજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનમ્ ૧ ।

ઋષય ઊચુઃ ।
સૂત સર્વં વિજાનાસિ વસ્તુ વ્યાસપ્રસાદતઃ ।
જ્યોતિષાં ચ કથાં શ્રુત્વા તૃપ્તિર્નૈવ પ્રજાયતે ॥ ૧॥

તસ્માત્ત્વં હિ વિશેષેણ કૃપાં કૃત્વાતુલાં પ્રભો ।
જ્યોતિર્લિઙ્ગં તૃતીયં ચ કથય ત્વં હિ નોઽધુના ॥ ૨॥

સૂત ઉવાચ ।
ધન્યોઽહં કૃતકૃત્યોઽહં શ્રીમતાં ભવતાં યદિ ।
ગતશ્ચ સઙ્ગમં વિપ્રા ધન્યા વૈ સાધુસઙ્ગતિઃ ॥ ૩॥

અતો મત્વા સ્વભાગ્યં હિ કથયિષ્યામિ પાવનીમ્ ।
પાપપ્રણાશિનીં દિવ્યાં કથાં ચ શ‍ૃણુતાદરાત્ ॥ ૪॥

અવન્તી નગરી રમ્યા મુક્તિદા સર્વદેહિનામ્ ।
શિવપ્રિયા મહાપુણ્યા વર્તતે લોકપાવની ॥ ૫॥

તત્રાસીદ્ બ્રાહ્મણશ્રેષ્ઠઃ શુભકર્મપરાયણઃ ।
વેદાધ્યયનકર્તા ચ વેદકર્મરતઃ સદા ॥ ૬॥

અગ્ન્યાધાનસમાયુક્તઃ શિવપૂજારતઃ સદા ।
પાર્થિવીં પ્રત્યહં મૂર્તિં પૂજયામાસ વૈ દ્વિજઃ ॥ ૭॥

સર્વકર્મફલં પ્રાપ્ય દ્વિજો વેદપ્રિયઃ સદા ।
સતાં ગતિં સમાલેભે સમ્યજ્ઞ્ઞાનપરાયણઃ ॥ ૮॥

તત્પુત્રાસ્તાદૃશાશ્ચાસંશ્ચત્વારો મુનિસત્તમાઃ ।
શિવપૂજારતા નિત્યં પિત્રોરનવમાઃ સદા ॥ ૯॥

દેવપ્રિયશ્ચ તજ્જ્યેષ્ઠઃ પ્રિયમેધાસ્તતઃ પરમ્ ।
તૃતીયઃ સુકૃતો નામ ધર્મવાહી ચ સુવ્રતઃ ॥ ૧૦॥

તેષાં પુણ્યપ્રતાપાચ્ચ પૃથિવ્યાં સુખમૈધત ।
શુક્લપક્ષે યથા ચન્દ્રો વર્ધતે ચ નિરન્તરમ્ ॥ ૧૧॥

તથા તેષાં ગુણાસ્તત્ર વર્ધન્તે સ્મ સુખાવહાઃ ।
બ્રહ્મતેજોમયી સા વૈ નગરી ચાભવત્તદા ॥ ૧૨॥

એતસ્મિન્નન્તરે તત્ર યજ્જાતં વૃત્તમુત્તમમ્ ।
શ્રૂયતાં તદ્ દ્વિજશ્રેષ્ઠાઃ કથયામિ યથાશ્રુતમ્ ॥ ૧૩॥

પર્વતે રત્નમાલે ચ દૂષણાખ્યો મહાસુરઃ ।
બલવાન્દૈત્યરાજશ્ચ ધર્મદ્વેષી નિરન્તરમ્ ॥ ૧૪॥

બ્રહ્મણો વરદાનાચ્ચ જગત્તુચ્છીચકાર હ ।
દેવાઃ પરાજિતાસ્તેન સ્થાનાન્નિઃસારિતાસ્તથા ॥ ૧૫॥

પૃથિવ્યાં વેદધર્માશ્ચ સ્મૃતિધર્માશ્ચ સર્વશઃ ।
સ્ફોટિતાસ્તેન દુષ્ટેન સિંહેનેવ શશાઃ ખલુ ॥ ૧૬॥

યાવન્તો વેદધર્માશ્ચ તાવન્તો દૂરતઃ કૃતાઃ ।
તીર્થે તીર્થે તથા ક્ષેત્રે ધર્મો નીતશ્ચ દૂરતઃ ॥ ૧૭॥

અવન્તી નગરી રમ્યા તત્રૈકા દૃશ્યતે પુનઃ ।
ઇત્થં વિચાર્ય તેનૈવ યત્કૃતં શ્રૂયતાં હિ તત્ ॥ ૧૮॥

બહુસૈન્યસમાયુક્તો દૂષણઃ સ મહાસુરઃ ।
તત્રસ્થાન્બ્રાહ્મણાન્સર્વાનુદ્દિશ્ય સમુપાયયૌ ॥ ૧૯॥

તત્રાગત્ય સ દૈત્યેન્દ્રશ્ચતુરો દૈત્યસત્તમાન્ ।
પ્રોવાચાહૂય વચનં વિપ્રદ્રોહી મહાખલઃ ॥ ૨૦॥

દૈત્ય ઉવાચ ।
કિમેતે બ્રાહ્મણા દુષ્ટા ન કુર્વન્તિ વચો મમ ।
વેદધર્મરતા એતે સર્વે દણ્ડ્યા મતે મમ ॥ ૨૧॥

સર્વે દેવા મયા લોકે રાજાનશ્ચ પરાજિતાઃ ।
વશે કિં બ્રાહ્મણાઃ શક્યા ન કર્તું દૈત્યસત્તમાઃ ॥ ૨૨॥

યદિ જીવિતુમિચ્છા સ્યાત્તદા ધર્મં શિવસ્ય ચ ।
વેદાનાં પરમં ધર્મં ત્યક્ત્વા સુખસુભાગિનઃ ॥ ૨૩॥

અન્યથા જીવને તેષાં સંશયશ્ચ ભવિષ્યતિ ।
ઇતિ સત્યં મયા પ્રોક્તં તત્કુરુધ્વં વિશઙ્કિતાઃ ॥ ૨૪॥

સૂત ઉવાચ ।
ઇતિ નિશ્ચિત્ય તે દૈત્યાશ્ચત્વારઃ પાવકા ઇવ ।
ચતુર્દિક્ષુ તદા જાતાઃ પ્રલયે ચ યથા પુરા ॥ ૨૫॥

તે બ્રાહ્મણાસ્તદા શ્રુત્વા દૈત્યાનામુદ્યમં તદા ।
ન દુઃખં લેભિરે તત્ર શિવધ્યાનપરાયણાઃ ॥ ૨૬॥

ધૈર્યં સમાશ્રિતાસ્તે ચ રેખામાત્રં તદા દ્વિજાઃ ।
ન ચેલુઃ પરમધ્યાનાદ્વરાકાઃ કે શિવાગ્રતઃ ॥ ૨૭॥

એતસ્મિન્નન્તરે તૈસ્તુ વ્યાપ્તાસીન્નગરી શુભા ।
લોકાશ્ચ પીડિતાસ્તૈસ્તુ બ્રાહ્મણાન્સમુપાયયુઃ ॥ ૨૮॥

લોકા ઊચુઃ ।
સ્વામિનઃ કિં ચ કર્તવ્યં દુષ્ટાશ્ચ સમુપાગતાઃ ।
હિંસિતા બહવો લોકા આગતાશ્ચ સમીપતઃ ॥ ૨૯॥

સૂત ઉવાચ ।
તેષામિતિ વચઃ શ્રુત્વા વેદપ્રિયસુતાશ્ચ તે ।
સમૂચુર્બ્રાહ્મણાઁસ્તાન્વૈ વિશ્વસ્તાઃ શઙ્કરે સદા ॥ ૩૦॥

બ્રાહ્મણા ઊચુઃ ।
શ્રૂયતાં વિદ્યતે નૈવ બલં દુષ્ટભયાવહમ્ ।
ન શસ્ત્રાણિ તથા સન્તિ યચ્ચ તે વિમુખાઃ પુનઃ ॥ ૩૧॥

સામાન્યસ્યાપમાનો નો હ્યાશ્રયસ્ય ભવેદિહ ।
પુનશ્ચ કિં સમર્થસ્ય શિવસ્યેહ ભવિષ્યતિ ॥ ૩૨॥

શિવો રક્ષાં કરોત્વદ્યાસુરાણાં ભયતઃ પ્રભુઃ ।
નાન્યથા શરણં લોકે ભક્તવત્સલતઃ શિવાત્ ॥ ૩૩॥

સૂત ઉવાચ ।
ઇતિ ધૈર્યં સમાસ્થાય સમર્ચાં પાર્થિવસ્ય ચ ।
કૃત્વા તે ચ દ્વિજાઃ સમ્યક્ સ્થિતા ધ્યાનપરાયણાઃ ।
દૃષ્ટા દૈત્યેન તાવચ્ચ તે વિપ્રાઃ સબલેન હિ ॥ ૩૪॥

દૂષણેન વચઃ પ્રોક્તં હન્યતાં વધ્યતામિતિ ।
તચ્છ્રુતં તૈસ્તદા નૈવ દૈત્યપ્રોક્તં વચો દ્વિજૈઃ ।
વેદપ્રિયસુતૈઃ શમ્ભોર્ધ્યાનમાર્ગપરાયણૈઃ ॥ ૩૫॥

અથ યાવત્સ દુષ્ટાત્મા હન્તુમૈચ્છદ્ દ્વિજાંશ્ચ તાન્ ।
તાવચ્ચ પ્રાર્થિવસ્થાને ગર્ત આસીત્સશબ્દકઃ ॥ ૩૬॥

ગર્તાત્તતઃ સમુત્પન્નઃ શિવો વિકટરૂપધૃક્ ।
મહાકાલ ઇતિ ખ્યાતો દુષ્ટહન્તા સતાં ગતિઃ ॥ ૩૭॥

મહાકાલઃ સમુત્પન્નો દુષ્ટાનાં ત્વાદૃશામહમ્ ।
ખલ ત્વં બ્રાહ્મણાનાં હિ સમીપાદ્ દૂરતો વ્રજ ॥ ૩૮॥

ઇત્યુક્ત્વા હુઙ્કૃતેનૈવ ભસ્મસાત્કૃતવાંસ્તદા ।
દૂષણં ચ મહાકાલઃ શઙ્કરઃ સબલં દ્રુતમ્ ॥ ૩૯॥

કિયત્સૈન્યં હતં તેન કિઞ્ચિત્સૈન્યં પલાયિતમ્ ।
દૂષણશ્ચ હતસ્તેન શિવેનેહ પરાત્મના ॥ ૪૦॥

સૂર્યં દૃષ્ટ્વા યથા યાતિ સઙ્ક્ષયં સર્વશસ્તમઃ ।

તથૈવ ચ શિવં દૃષ્ટ્વા તત્સૈન્યં વિનનાશ હ ॥ ૪૧॥

દેવદુન્દુભયો નેદુઃ પુષ્પવૃષ્ટિઃ પપાત હ ।
દેવઃ સમાયયુઃ સર્વે હરિબ્રહ્માદયસ્તથા ॥ ૪૨॥

ભક્ત્યા પ્રણમ્ય તં દેવં શઙ્કરં લોકશઙ્કરમ્ ।
તુષ્ટુવુર્વિવિધૈઃ સ્તોત્રૈઃ કૃતાઞ્જલિપુટા દ્વિજાઃ ॥ ૪૩॥

બ્રાહ્મણાંશ્ચ સમાશ્વાસ્ય સુપ્રસન્નઃ શિવઃ સ્વયમ્ ।
વરં બ્રૂતેતિ ચોવાચ મહાકાલો મહેશ્વરઃ ॥ ૪૪॥

તચ્છ્રુત્વા તે દ્વિજાઃ સર્વે કૃતાઞ્જલિપુટાસ્તદા ।
સુપ્રણમ્ય શિવં ભક્ત્યા પ્રોચુઃ સન્નતમસ્તકાઃ ॥ ૪૫॥

દ્વિજા ઊચુઃ ।
મહાકાલ મહાદેવ દુષ્ટદણ્ડકર પ્રભો ।
મુક્તિં પ્રયચ્છ નઃ શમ્ભો સંસારામ્બુધિતઃ શિવ ॥ ૪૬॥

અત્રૈવ લોકરક્ષાર્થં સ્થાતવ્યં હિ ત્વયા શિવ ।
સ્વદર્શકાન્નરાન્ શમ્ભો તારય ત્વં સદા પ્રભો ॥ ૪૭॥

સૂત ઉવાચ ।
ઇત્યુક્તસ્તૈઃ શિવસ્તત્ર તસ્થૌ ગર્તે સુશોભને ।
ભક્તાનાં ચૈવ રક્ષાર્થં દત્ત્વા તેભ્યશ્ચ સદ્ગતિમ્ ॥ ૪૮॥

દ્વિજાસ્તે મુક્તિમાપન્નાશ્ચતુર્દિક્ષુ શિવાસ્પદમ્ ।
ક્રોશમાત્રં તદા જાતં લિઙ્ગરૂપિણ એવ ચ ॥ ૪૯॥

મહાકાલેશ્વરો નામ શિવઃ ખ્યાતશ્ચ ભૂતલે ।
તં દૃષ્ટ્વા ન ભવેત્સ્વપ્ને કિઞ્ચિદ્દુઃખમપિ દ્વિજાઃ ॥ ૫૦॥

યં યં કામમપેક્ષ્યૈવ તલ્લિઙ્ગં ભજતે તુ યઃ ।
તં તં કામમવાપ્નોતિ લભેન્મોક્ષં પરત્ર ચ ॥ ૫૧॥

એતત્સર્વં સમાખ્યાતં મહાકાલસ્ય સુવ્રતાઃ ।
સમુદ્ભવશ્ચ માહાત્મ્યં કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં મહાકાલજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૪.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૭. સપ્તદશોઽધ્યાયઃ । મહાકાલજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનમ્ ૨ ।

ઋષય ઊચુઃ ।
મહાકાલસમાહ્વસ્થજ્યોતિર્લિઙ્ગસ્ય રક્ષિણઃ ।
ભક્તાનાં મહિમાનં ચ પુનર્બ્રૂહિ મહામતે ॥ ૧॥

સૂત ઉવાચ ।
શ‍ૃણુતાદરતો વિપ્રા ભક્તરક્ષાવિધાયિનઃ ।
મહાકાલસ્ય લિઙ્ગસ્ય માહાત્મ્યં ભક્તિવર્ધનમ્ ॥ ૨॥

ઉજ્જયિન્યામભૂદ્રાજા ચન્દ્રસેનાહ્વયો મહાન્ ।
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞઃ શિવભક્તો જિતેન્દ્રિયઃ ॥ ૩॥

તસ્યાભવત્સખા રાજ્ઞો મણિભદ્રો ગણો દ્વિજાઃ ।
ગિરીશગણમુખ્યશ્ચ સર્વલોકનમસ્કૃતઃ ॥ ૪॥

એકદા સ ગણેન્દ્રો હિ પ્રસન્નાસ્યો મહામણિમ્ ।
મણિભદ્રો દદૌ તસ્મૈ ચિન્તામણિમુદારધીઃ ॥ ૫॥

સ વૈ મણિઃ કૌસ્તુભવદ્ દ્યોતમાનોઽર્કસન્નિભઃ ।
ધ્યાતો દૃષ્ટઃ શ્રુતો વાપિ મઙ્ગલં યચ્છતિ ધ્રુવમ્ ॥ ૬॥

તસ્ય કાન્તિતલસ્પૃષ્ટં કાંસ્યં તામ્રમયસ્ત્રપુ ।
પાષાણાદિકમન્યદ્વા દ્રુતં ભવતિ હાટકમ્ ॥ ૭॥

સ તુ ચિન્તામણિં કણ્ઠે બિભ્રદ્ રાજા શિવાશ્રયઃ ।
ચન્દ્રસેનો રરાજાતિ દેવમધ્યેવ ભાનુમાન્ ॥ ૮॥

શ્રુત્વા ચિન્તામણિગ્રીવં ચન્દ્રસેનં નૃપોત્તમમ્ ।
નિખિલાઃ ક્ષિતિરાજાનસ્તૃષ્ણાક્ષુબ્ધહૃદોઽભવન્ ॥ ૯॥

નૃપા મત્સરિણઃ સર્વે તં મણિં ચન્દ્રસેનતઃ ।
નાનોપાયૈરયાચન્ત દેવલબ્ધમબુદ્ધયઃ ॥ ૧૦॥

સર્વેષાં ભૂભૃતાં યાચ્ઞા ચન્દ્રસેનેન તેન વૈ ।

વ્યર્થીકૃતા મહાકાલદૃઢભક્તેન ભૂસુરાઃ ॥ ૧૧॥

તે કદર્થીકૃતાઃ સર્વે ચન્દ્રસેનેન ભૂભૃતા ।
રાજાનઃ સર્વદેશાનાં સંરમ્ભં ચક્રિરે તદા ॥ ૧૨॥

અથ તે સર્વરાજાનશ્ચતુરઙ્ગબલાન્વિતાઃ ।
ચન્દ્રસેનં રણે જેતું સમ્બભૂવુઃ કિલોદ્યતાઃ ॥ ૧૩॥

તે તુ સર્વે સમેતા વૈ કૃતસઙ્કેતસંવિદઃ ।
ઉજ્જયિન્યાશ્ચતુર્દ્વારં રુરુધુર્બહુસૈનિકાઃ ॥ ૧૪॥

સંરુધ્યમાનાં સ્વપુરીં દૃષ્ટ્વા નિખિલરાજભિઃ ।
તમેવ શરણં રાજા મહાકાલેશ્વરં યયૌ ॥ ૧૫॥

નિર્વિકલ્પો નિરાહારઃ સ નૃપો દૃઢનિશ્ચયઃ ।
સમાનર્ચ મહાકાલં દિવાનક્તમનન્યધીઃ ॥ ૧૬॥

તતઃ સ ભગવાઞ્છમ્ભુર્મહાકાલઃ પ્રસન્નધીઃ ।
તં રક્ષિતુમુપાયં વૈ ચક્રે તં શ ૃણુતાદરાત્ ॥ ૧૭॥

તદૈવ સમયે ગોપી કાચિત્તત્ર પુરોત્તમે ।
ચરન્તી સશિશુર્વિપ્રા મહાકાલાન્તિકં યયૌ ॥ ૧૮॥

પઞ્ચાબ્દવયસં બાલં વહન્તી ગતભર્તૃકા ।
રાજ્ઞા કૃતાં મહાકાલપૂજાં સાપશ્યદાદરાત્ ॥ ૧૯॥

સા દૃષ્ટ્વા સુમહાશ્ચર્યાં શિવપૂજાં ચ તત્કૃતામ્ ।
પ્રણિપત્ય સ્વશિબિરં પુનરેવાભ્યપદ્યત ॥ ૨૦॥

એતત્સર્વમશેષેણ સ દૃષ્ટ્વા વલ્લવીસુતઃ ।
કુતૂહલેન તાં કર્તું શિવપૂજાં મનો દધે ॥ ૨૧॥

આનીય હૃદ્યં પાષાણં શૂન્યે તુ શિબિરાન્તરે ।
અવિદૂરે સ્વશિબિરાચ્છિવલિઙ્ગં સ ભક્તિતઃ ॥ ૨૨॥

ગન્ધાલઙ્કારવાસોભિર્ધૂપદીપાક્ષતાદિભિઃ ।
વિધાય કૃત્રિમૈર્દ્રવ્યૈર્નૈવેદ્યં ચાપ્યકલ્પયત્ ॥ ૨૩॥

ભૂયો ભૂયઃ સમભ્યર્ચ્ય પત્રૈઃ પુષ્પૈર્મનોરમૈઃ ।
નૃત્યં ચ વિવિધં કૃત્વા પ્રણનામ પુનઃ પુનઃ ॥ ૨૪॥

એતસ્મિન્સમયે પુત્રં શિવાસક્તસુચેતસમ્ ।
પ્રણયાદ્ગોપિકા સા તં ભોજનાય સમાહ્વયત્ ॥ ૨૫॥

યદાહૂતોઽપિ બહુશ; શિવપૂજાક્તમાનસઃ ।
બાલશ્ચ ભોજનં નૈચ્છત્તદા તત્ર યયૌ પ્રસૂઃ ॥ ૨૬॥

તં વિલોક્ય શિવસ્યાગ્રે નિષણ્ણં મીલિતેક્ષણમ્ ।
ચકર્ષ પાણિં સઙ્ગૃહ્ય કોપેન સમતાડયત્ ॥ ૨૭॥

આકૃષ્ટસ્તાડિતશ્ચાપિ નાગચ્છત્ સ્વસુતો યદા ।
તાં પૂજાં નાશયામાસ ક્ષિપ્ત્વા લિઙ્ગં ચ દૂરતઃ ॥ ૨૮॥

હાહેતિ દૂયમાનં તં નિર્ભર્ત્સ્ય સ્વસુતં ચ સા ।
પુનર્વિવેશ સ્વગૃહં ગોપી ક્રોધસમન્વિતા ॥ ૨૯॥

માત્રા વિનાશિતાં પૂજાં દૃષ્ટ્વા દેવસ્ય શૂલિનઃ ।
દેવદેવેતિ ચુક્રોશ નિપપાત સ બાલકઃ ॥ ૩૦॥

પ્રનષ્ટસંજ્ઞઃ સહસા સ બભૂવ શુચાકુલઃ ।
લબ્ધસંજ્ઞો મુહૂર્તેન ચક્ષુષી ઉદમીલયત્ ॥ ૩૧॥

તદૈવ જાતં શિવિરં મહાકાલસ્ય સુન્દરમ્ ।
દદર્શ સ શિશુસ્તત્ર શિવાનુગ્રહતોઽચિરાત્ ॥ ૩૨॥

હિરણ્મયબૃહદ્ દ્વારં કપાટવરતોરણમ્ ।
મહાર્હનીલવિમલવજ્રવેદીવિરાજિતમ્ ॥ ૩૩॥

સન્તપ્તહેમકલશૈર્વિચિત્રૈર્બહુભિર્યુતમ્ ।
પ્રોદ્ભાસિતમણિસ્તમ્ભૈર્બદ્ધસ્ફટિકભૂતલૈઃ ॥ ૩૪॥

તન્મધ્યે રત્નલિઙ્ગં હિ શઙ્કરસ્ય કૃપાનિધેઃ ।
સ્વકૃતાર્ચનસંયુક્તમપશ્યદ્ગોપિકાસુતઃ ॥ ૩૫॥

સ દૃષ્ટ્વા સહસોત્થાય શિશુર્વિસ્મિતમાનસઃ ।
સન્નિમગ્ન ઇવાસીદ્વૈ પરમાનન્દસાગરે ॥ ૩૬॥

તતઃ સ્તુત્વા સ ગિરિશં ભૂયો ભૂયઃ પ્રણમ્ય ચ ।
સૂર્યે ચાસ્તઙ્ગતે બાલો નિર્જગામ શિવાલયાત્ ॥ ૩૭॥

અથાપશ્યત્સ્વશિવિરં પુરન્દરપુરોપમમ્ ।
સદ્યો હિરણ્મયીભૂતં વિચિત્રં પરમોજ્જ્વલમ્ ॥ ૩૮॥

સોઽન્તર્વિવેશ ભવનં સર્વશોભાસમન્વિતમ્ ।
મણિહેમગણાકીર્ણં મોદમાનો નિશામુખે ॥ ૩૯॥

તત્રાપશ્યત્સ્વજનનીં સ્વપન્તીં દિવ્યલક્ષણામ્ ।
રત્નાલઙ્કારદીમાઙ્ગીં સાક્ષાત્સુરવધૂમિવ ॥ ૪૦॥

અથો સ તનયો વિપ્રાઃ શિવાનુગ્રહભાજનમ્ ।
જવેનોત્થાપયામાસ માતરં સુખવિહ્વલઃ ॥ ૪૧॥

સોત્થિતાદ્ભુતમાલક્ષ્યાપૂર્વં સર્વમિવાભવત્ ।
મહાનન્દસુમગ્ના હિ સસ્વજે સ્વસુતં ચ તમ્ ॥ ૪૨॥

શ્રુત્વા પુત્રમુખાત્સર્વં પ્રસાદં ગિરિજાપતેઃ ।
પ્રભું વિજ્ઞાપયામાસ યો ભજત્યનિશં શિવમ્ ॥ ૪૩॥

સ રાજા સહસાગત્ય સમાપ્તનિયમો નિશિ ।
દદર્શ ગોપિકાસૂનોઃ પ્રભાવં શિવતોષણમ્ ॥ ૪૪॥

દૃષ્ટ્વા મહીપતિઃ સર્વં તત્સામાત્યપુરોહિતઃ ।
આસીન્નિમગ્નો વિધૃતિઃ પરમાનન્દસાગરે ॥ ૪૫॥

પ્રેમ્ણા બાષ્પજલં મુઞ્ચન્ ચન્દ્રસેનો નૃપો હિ સઃ ।
શિવનામોચ્ચરન્પ્રીત્યા પરિરેભે તમર્ભકમ્ ॥ ૪૬॥

મહામહોત્સવસ્તત્ર પ્રબભૂવાદ્ભુતો દ્વિજાઃ ।
મહેશકીર્તનં ચક્રુઃ સર્વે ચ સુખવિહ્વલાઃ ॥ ૪૭॥

એવમત્યદ્ભુતાચારાચ્છિવમાહાત્મ્યદર્શનાત્ ।
પૌરાણાં સમ્ભ્રમાચ્ચૈવ સા રાત્રિઃ ક્ષણતામગાત્ ॥ ૪૮॥

અથ પ્રભાતે યુદ્ધાય પુરં સંરુધ્ય સંસ્થિતાઃ ।
રાજાનશ્ચારવક્ત્રેભ્યઃ શુશ્રુવુશ્ચરિતં ચ તત્ ॥ ૪૯॥

તે સમેતાશ્ચ રાજાનઃ સર્વે યે યે સમાગતાઃ ।
પરસ્પરમિતિ પ્રોચુસ્તચ્છ્રુત્વા ચકિત અતિ ॥ ૫૦॥

રાજાન ઊચુઃ ।
અયં રાજા ચન્દ્રસેનઃ શિવભક્તોઽતિદુર્જયઃ ।
ઉજ્જયિન્યા મહાકાલપુર્યાઃ પતિરનાકુલઃ ॥ ૫૧॥

ઈદૃશાઃ શિશવો યસ્ય પુર્યાં સન્તિ શિવવ્રતાઃ ।
સ રાજા ચન્દ્રસેનસ્તુ મહાશઙ્કરસેવકઃ ॥ ૫૨॥

નૂનમસ્ય વિરોધેન શિવઃ ક્રોધં કરિષ્યતિ ।
તત્ક્રોધાદ્ધિ વયં સર્વે ભવિષ્યામો વિનષ્ટકાઃ ॥ ૫૩॥

તસ્માદનેન રાજ્ઞા વૈ મિલાપઃ કાર્ય એવ હિ ।
એવં સતિ મહેશાનઃ કરિષ્યતિ કૃપાં પરામ્ ॥ ૫૪॥

સૂત ઉવાચ ।
ઇતિ નિશ્ચિત્ય તે ભૂપાસ્ત્યક્તવૈરાઃ સદાશયાઃ ।
સર્વે બભૂવુઃ સુપ્રીતા ન્યસ્તશસ્ત્રાસ્ત્રપાણયઃ ॥ ૫૫॥

વિવિશુસ્તે પુરીં રમ્યાં મહાકાલસ્ય ભૂભૃતઃ ।
મહાકાલં સમાનર્ચુશ્ચન્દ્રસેનાનુમોદિતાઃ ॥ ૫૬॥

તતસ્તે ગોપવનિતાગેહં જગ્મુર્મહીભૃતઃ ।
પ્રશંસન્તશ્ચ તદ્ભાગ્યં સર્વે દિવ્યમહોદયમ્ ॥ ૫૭॥

તે તત્ર ચન્દ્રસેનેન પ્રત્યુદ્ગમ્યાભિપૂજિતાઃ ।
મહાર્હવિષ્ટરગતાઃ પ્રત્યનન્દન્ સુવિસ્મિતાઃ ॥ ૫૮॥

ગોપસૂનોઃ પ્રસાદાત્તત્પ્રાદુર્ભૂતં શિવાલયમ્ ।
સંવીક્ષ્ય શિવલિઙ્ગં ચ શિવે ચક્રુઃ પરાં મતિમ્ ॥ ૫૯॥

તતસ્તે ગોપશિશવે પ્રીતા નિખિલભૂભુજઃ ।
દદુર્બહૂનિ વસ્તૂનિ તસ્મૈ શિવકૃપાર્થિનઃ ॥ ૬૦॥

યે યે સર્વેષુ દેશેષુ ગોપાસ્તિષ્ઠન્તિ ભૂરિશઃ ।
તેષાં તમેવ રાજાનં ચક્રિરે સર્વપાર્થિવાઃ ॥ ૬૧॥

અથાસ્મિન્નન્તરે સર્વૈસ્ત્રિદશૈરભિપૂજિતઃ ।
પ્રાદુર્બભૂવ તેજસ્વી હનૂમાન્ વાનરેશ્વરઃ ॥ ૬૨॥

તે તસ્યાભિગમાદેવ રાજાનો જાતસમ્ભ્રમાઃ ।
પ્રત્યુત્થાય નમશ્ચક્રુર્ભક્તિનમ્રાત્મમૂર્તયઃ ॥ ૬૩॥

તેષાં મધ્યે સમાસીનઃ પૂજિતઃ પ્લવગેશ્વરઃ ।
ગોપાત્મજં તમાલિઙ્ગ્ય રાજ્ઞો વીક્ષ્યેદમબ્રવીત્ ॥ ૬૪॥

હનૂમાનુવાચ ।

સર્વે શ્ૃણ્વન્તુ ભદ્રં વો રાજાનો યે ચ દેહિનઃ ।
ઋતે શિવં નાન્યતમો ગતિરસ્તિ શરીરિણામ્ ॥ ૬૫॥

એવં ગોપસુતો દિષ્ટ્યા શિવપૂજાં વિલોક્ય ચ ।
અમન્ત્રેણાપિ સમ્પૂજ્ય શિવં શિવમવાપ્તવાન્ ॥ ૬૬॥

એષ ભક્તવરઃ શમ્ભોર્ગોપાનાં કીર્તિવર્ધનઃ ।
ઇહ ભુક્ત્વાખિલાન્ભોગાનન્તે મોક્ષમવાપ્સ્યતિ ॥ ૬૭॥

અસ્ય વંશેઽષ્ટમો ભાવી નન્દો નામ મહાયશાઃ ।
પ્રાપ્સ્યતે તસ્ય પુત્રત્વં કૃષ્ણો નારાયણઃ સ્વયમ્ ॥ ૬૮॥

અદ્યપ્રભૃતિ લોકેઽસ્મિન્નેષ ગોપકુમારકઃ ।
નામ્ના શ્રીકર ઇત્યુચ્ચૈર્લોકખ્યાતિં ગમિષ્યતિ ॥ ૬૯॥

સૂત ઉવાચ ।
એવમુક્ત્વાઞ્જનીસૂનુઃ શિવરૂપો હરીશ્વરઃ ।
સર્વાન્ રાજ્ઞશ્ચન્દ્રસેનં કૃપાદૃષ્ટ્યા દદર્શ હ ॥ ૭૦॥

અથ તસ્મૈ શ્રીકરાય ગોપપુત્રાય ધીમતે ।
ઉપાદિદેશ સુપ્રીત્યા શિવાચારં શિવપ્રિયમ્ ॥ ૭૧॥

હનૂમાનથ સુપ્રીતઃ સર્વેષાં પશ્યતાં દ્વિજાઃ ।
ચન્દ્રસેનં શ્રીકરં ચ તત્રૈવાન્તરધીયત ॥ ૭૨॥

તં સર્વે ચ મહીપાલાઃ સંહૃષ્ટાઃ પ્રતિપૂજિતાઃ ।
ચન્દ્રસેનં સમામન્ત્ર્ય પ્રતિજગ્મુર્યથાગતમ્ ॥ ૭૩॥

શ્રીકરોઽપિ મહાતેજા ઉપદિષ્ટો હનૂમતા ।
બ્રાહ્મણૈઃ સહ ધર્મજ્ઞૈશ્ચક્રે શમ્ભોઃ સમર્હણમ્ ॥ ૭૪॥

ચન્દ્રસેનો મહારાજઃ શ્રીકરો ગોપબાલકઃ ।
ઉભાવપિ પરપ્રીત્યા મહાકાલં ચ ભેજતુઃ ॥ ૭૫॥

કાલેન શ્રીકરઃ સોઽપિ ચન્દ્રસેનશ્ચ ભૂપતિઃ ।
સમારાધ્ય મહાકાલં ભેજતુઃ પરમં પદમ્ ॥ ૭૬॥

એવંવિધો મહાકાલઃ શિવલિઙ્ગઃ સતાં ગતિઃ ।
સર્વથા દુષ્ટહન્તા ચ શઙ્કરો ભક્તવત્સલઃ ॥ ૭૭॥

ઇદં પવિત્રં પરમં રહસ્યં સર્વસૌખ્યદમ્ ।

આખ્યાનં કથિતં સ્વર્ગ્યં શિવભક્તિવિવર્ધનમ્ ॥ ૭૮॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં મહાકાલજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૪.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૮. અષ્ટાદશોઽધ્યાયઃ । ઓઙ્કારેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ શ્રાવિતા હ્યદ્ભુતા કથા ।
મહાકાલાખ્યલિઙ્ગસ્ય નિજભક્તસુરક્ષિણઃ ॥ ૧॥

જ્યોતિર્લિઙ્ગં ચતુર્થં ચ કૃપયા વદ વિત્તમ ।
ઓઙ્કારે પરમેશસ્ય સર્વપાતકહારિણઃ ॥ ૨॥

સૂત ઉવાચ ।
ઓઙ્કારે પરમેશાખ્યં લિઙ્ગમાસીદ્યથા દ્વિજાઃ ।
તથા વક્ષ્યામિ વઃ પ્રીત્યા શ્રૂયતાં પરમર્ષયઃ ॥ ૩॥

કસ્મિંશ્ચિત્સમયે ચાત્ર નારદો ભગવાન્મુનિઃ ।
ગોકર્ણાખ્યં શિવં ગત્વા સિષેવે પરભક્તિમાન્ ॥ ૪॥

તતઃ સ આગતો વિન્ધ્યં નગેશં મુનિસત્તમઃ ।
તત્રૈવ પૂજિતસ્તેન બહુમાનપુરઃસરમ્ ॥ ૫॥

મયિ સર્વં વિદ્યતે ચ ન ન્યૂનં હિ કદાચન ।
ઇતિ ભાવં સમાસ્થાય સંસ્થિતો નારદાગ્રતઃ ॥ ૬॥

તન્માનં તત્તદા શ્રુત્વા નારદો માનહા તતઃ ।
નિઃશ્વસ્ય સંસ્થિતસ્તત્ર શ્રુત્વા વિન્ધ્યોઽબ્રવીદિદમ્ ॥ ૭॥

વિન્ધ્ય ઉવાચ ।
કિં ન્યૂનં ચ ત્વયા દૃષ્ટં મયિ નિઃ શ્વાસકારણમ્ ।
તચ્છ્રુત્વા નારદો વાક્યમબ્રવીત્સ મહામુનિઃ ॥ ૮॥

નારદ ઉવાચ ।
વિદ્યતે ત્વયિ સર્વં હિ મેરુરુચ્ચતરઃ પુનઃ ।
દેવેષ્વપિ વિભાગોઽસ્ય ન તવાસ્તિ કદાચન ॥ ૯॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા નારદસ્તસ્માજ્જગામ ચ યથાગતમ્ ।
વિન્ધ્યશ્ચ પરિતપ્તો વૈ ધિગ્વૈ મે જીવિતાદિકમ્ ॥ ૧૦॥

વિશ્વેશ્વરં તથા શમ્ભુમારાધ્ય ચ તપામ્યહમ્ ।
ઇતિ નિશ્ચિત્ય મનસા શઙ્કરં શરણં ગતઃ ॥ ૧૧॥

જગામ તત્ર સુપ્રીત્યા હ્યોઙ્કારો યત્ર વૈ સ્વયમ્ ।
ચકાર ચ પુનસ્તત્ર શિવમૂર્તિં ચ પાર્થિવીમ્ ॥ ૧૨॥

આરાધ્ય ચ તદા શમ્ભું ષણ્માસં સ નિરન્તરમ્ ।
ન ચચાલ તપઃસ્થાનાચ્છિવધ્યાનપરાયણઃ ॥ ૧૩॥

એવં વિન્ધ્યતપો દૃષ્ટ્વા પ્રસન્નઃ પાર્વતીપતિઃ ।
સ્વરૂપં દર્શયામાસ દુર્લભં યોગિનામપિ ॥ ૧૪॥

પ્રસન્નઃ સ તદોવાચ બ્રૂહિ ત્વં મનસેપ્સિતમ્ ।
તપસા તે પ્રસન્નોઽસ્મિ ભક્તાનામીપ્સિતપ્રદઃ ॥ ૧૫॥

વિન્ધ્ય ઉવાચ ।
યદિ પ્રસન્નો દેવેશ બુદ્ધિં દેહિ યથેપ્સિતામ્ ।
સ્વકાર્યસાધિનીં શમ્ભો ત્વં સદા ભક્તવત્સલઃ ॥ ૧૬॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા ભગવાન્ શમ્ભુશ્ચિચેત હૃદયે ચિરમ્ ।
પરોપતાપદં વિન્ધ્યો વરમિચ્છતિ મૂઢધીઃ ॥ ૧૭॥

કિં કરોમિ યદેતસ્મૈ વરદાનં ભવેચ્છુભમ્ ।
મદ્દત્તં પરદુઃખાય વરદાનં યથા ન હિ ॥ ૧૮॥

સૂત ઉવાચ ।
તથાપિ દત્તવાન્ શમ્ભુસ્તસ્મૈ તદ્વરમુત્તમમ્ ।
વિન્ધ્ય પર્વતરાજ ત્વં યથેચ્છસિ તથા કુરુ ॥ ૧૯॥

એવં ચ સમયે દેવા ઋષયશ્ચામલાશયાઃ ।

સમ્પૂજ્ય શઙ્કરં તત્ર સ્થાતવ્યમિતિ ચાબ્રુવન્ ॥ ૨૦॥

તચ્છ્રુત્વા દેવવચનં પ્રસન્નઃ પરમેશ્વરઃ ।
તથૈવ કૃતવાન્પ્રીત્યા લોકાનાં સુખહેતવે ॥ ૨૧॥

ઓઙ્કારં ચૈવ યલ્લિઙ્ગમેકં તચ્ચ દ્વિધા ગતમ્ ।
પ્રણવે ચૈવ ઓઙ્કારનામાસીત્સ સદાશિવઃ ॥ ૨૨॥

પાર્થિવે ચૈવ યજ્જાતં તદાસીત્પરમેશ્વરઃ ।
ભક્તાભીષ્ટપ્રદૌ ચોભૌ ભુક્તિમુક્તિપ્રદૌ દ્વિજાઃ ॥ ૨૩॥

તત્પૂજાં ચ તદા ચક્રુર્દેવાશ્ચ ઋષયસ્તથા ।
પ્રાપુર્વરાનનેકાંશ્ચ સન્તોષ્ય વૃષભધ્વજમ્ ॥ ૨૪॥

સ્વસ્વસ્થાનં યયુર્દેવા વિન્ધ્યોઽપિ મુદિતોઽધિકમ્ ।
કાર્યં સાધિતવાન્સ્વીયં પરિતાપં જહૌ દ્વિજાઃ ॥ ૨૫॥

ય એવં પૂજયેચ્છમ્ભું માતૃગર્ભં વસેન્ન હિ ।
યદભીષ્ટં ફલં તચ્ચ પ્રાપ્નુયાન્નાત્ર સંશયઃ ॥ ૨૬॥

સૂત ઉવાચ ।
એતત્તે સર્વમાખ્યાતમોઙ્કારપ્રભવે ફલમ્ ।
અતઃ પરં પ્રવક્ષ્યામિ કેદારં લિઙ્ગમુત્તમમ્ ॥ ૨૭॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયામોઙ્કારેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૪.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૧૯. એકોનવિંશોઽધ્યાયઃ । કેદારેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
નરનારાયણાખ્યૌ યાવવતારૌ હરેર્દ્વિજાઃ ।
તેપાતે ભારતે ખણ્ડે બદર્યાશ્રમ એવ હિ ॥ ૧॥

તાભ્યાં સમ્પ્રાર્થિતઃ શમ્ભુઃ પાર્થિવે પૂજનાય વૈ ।

આયાતિ નિત્યં તલ્લિઙ્ગે ભક્તાધીનતયા શિવઃ ॥ ૨॥

એવં પૂજયતોઃ શમ્ભું તયોર્વિષ્ણ્વવતારયોઃ ।
ચિરકાલો વ્યતીયાય શૈવયોર્ધર્મપુત્રયોઃ ॥ ૩॥

એકસ્મિન્સમયે તત્ર પ્રસન્નઃ પરમેશ્વરઃ ।
પ્રત્યુવાચ પ્રસન્નોઽસ્મિ વરો મે વ્રિયતામિતિ ॥ ૪॥

ઇત્યુક્તે ચ તદા તેન નરો નારાયણઃ સ્વયમ્ ।
ઊચતુર્વચનં તત્ર લોકાનાં હિતકામ્યયા ॥ ૫॥

નરનારાયણાવૂચતુઃ ।
યદિ પ્રસન્નો દેવેશ યદિ દેયો વરસ્ત્વયા ।
સ્થીયતાં સ્વેન રૂપેણ પૂજાર્થં શઙ્કર સ્વયમ્ ॥ ૬॥

સૂત ઉવાચ ।
ઇત્યુક્તસ્તુ તદા તાભ્યાં કેદારે હિમસંશ્રયે ।
સ્વયં ચ શઙ્કરસ્તસ્થૌ જ્યોતીરૂપો મહેશ્વરઃ ॥ ૭॥

તાભ્યાં ચ પૂજિતશ્ચૈવ સર્વદુઃખભયાપહઃ ।
લોકાનામુપકારાર્થં ભક્તાનાં દર્શનાય વૈ ॥ ૮॥

સ્વયં સ્થિતસ્તદા શમ્ભુઃ કેદારેશ્વરસંજ્ઞકઃ ।
ભક્તાભીષ્ટપ્રદો નિત્યં દર્શનાદર્ચનાદપિ ॥ ૯॥

દેવાશ્ચ પૂજયન્તીહ ઋષયશ્ચ પુરાતનાઃ ।
મનોઽભીષ્ટફલં તે તે સુપ્રસન્નાન્મહેશ્વરાત્ ॥ ૧૦॥

ભવસ્ય પૂજનાન્નિત્યં બદર્યાશ્રમવાસિનઃ ।
પ્રાપ્નુવન્તિ યતઃ સો હિ ભક્તાભીષ્ટપ્રદઃ સદા ॥ ૧૧॥

તદ્દિનં હિ સમારભ્ય કેદારેશ્વર એવ ચ ।
પૂજિતો યેન ભક્ત્યા વૈ દુઃખં સ્વપ્નેઽપિ દુર્લભમ્ ॥ ૧૨॥

યો વૈ હિ પાણ્ડવાન્દૃષ્ટ્વા માહિષં રૂપમાસ્થિતઃ ।
માયામાસ્થાય તત્રૈવ પલાયનપરોઽભવત્ ॥ ૧૩॥

ધૃતશ્ચ પાણ્ડવૈસ્તત્ર હ્યવાઙ્મુખતયા સ્થિતઃ ।
પુચ્છં ચૈવ ધૃતં તૈસ્તુ પ્રાર્થિતશ્ચ પુનઃપુનઃ ॥ ૧૪॥

તદ્રૂપેણ સ્થિતસ્તત્ર ભક્તવત્સલનામભાક્ ।

નયપાલે શિરોભાગો ગતસ્તદ્રૂપતઃ સ્થિતઃ ॥ ૧૫॥

તથૈવ પૂજનાન્નિત્યમાજ્ઞાં ચૈવાપ્યદાત્તથા ।
પૂજિતશ્ચ સ્વયં શમ્ભુસ્તત્ર તસ્થૌ વરાનદાત્ ॥ ૧૬॥

પૂજયિત્વા ગતાસ્તે તુ પાણ્ડવા મુદિતાસ્તદા ।
લબ્ધ્વા ચિત્તેપ્સિતં સર્વં વિમુક્તાઃ સર્વદુઃખતઃ ॥ ૧૭॥

તત્ર નિત્યં હરઃ સાક્ષાત્ક્ષેત્રે કેદારસંજ્ઞકે ।
ભારતીભિઃ પ્રજાભિશ્ચ તથૈવ પરિપૂજ્યતે ॥ ૧૮॥

તત્રત્યં વલયં યો વૈ દદાતિ હરવલ્લભઃ ।
હરરૂપાન્તિકં તચ્ચ હરરૂપસમન્વિતમ્ ॥ ૧૯॥

તથૈવ રૂપં દૃષ્ટ્વા ચ સર્વપાપૈઃ પ્રમુચ્યતે ।
જીવન્મુક્તો ભવેત્સોઽપિ યો ગતો બદરીવને ॥ ૨૦॥

દૃષ્ટ્વા રૂપં નરસ્યૈવ તથા નારાયણસ્ય હિ ।
કેદારેશ્વરશમ્ભોશ્ચ મુક્તિભાગી ન સંશયઃ ॥ ૨૧॥

કેદારેશસ્ય ભક્તા યે માર્ગસ્થાસ્તસ્ય વૈ મૃતાઃ ।
તેઽપિ મુક્તા ભવન્ત્યેવ નાત્ર કાર્યા વિચારણા ॥ ૨૨॥

ગત્વા તત્ર પ્રીતિયુક્તઃ કેદારેશં પ્રપૂજ્ય ચ ।
તત્રત્યમુદકં પીત્વા પુનર્જન્મ ન વિન્દતિ ॥ ૨૩॥

ખણ્ડેઽસ્મિન્ ભારતે વિપ્રા નરનારાયણેશ્વરઃ ।
કેદારેશઃ પ્રપૂજ્યશ્ચ સર્વૈર્જીવૈઃ સુભક્તિતઃ ॥ ૨૪॥

અસ્ય ખણ્ડસ્ય સ સ્વામી સર્વેશોઽપિ વિશેષતઃ ।
સર્વકામપ્રદઃ શમ્ભુઃ કેદારાખ્યો ન સંશયઃ ॥ ૨૫॥

એતદ્વચઃ સમાખ્યાતં યત્પૃષ્ટમૃષિસત્તમાઃ ।
શ્રુત્વા પાપં હરેત્સર્વં નાત્ર કાર્યા વિચારણા ॥ ૨૬॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં કેદારેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૪.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૦. વિંશોઽધ્યાયઃ । ભીમાસુરકૃતોપદ્રવવર્ણનમ્ ।

સૂત ઉવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ માહાત્મ્યં ભૈમશઙ્કરમ્ ।
યસ્ય શ્રવણમાત્રેણ સર્વાભીષ્ટં લભેન્નરઃ ॥ ૧॥

કામરૂપાભિધે દેશે શઙ્કરો લોકકામ્યયા ।
અવતીર્ણઃ સ્વયં સાક્ષાત્કલ્યાણસુખભાજનમ્ ॥ ૨॥

યદર્થમવતીર્ણોઽસૌ શઙ્કરો લોકશઙ્કરઃ ।
શ‍ૃણુતાદરતસ્તચ્ચ કથયામિ મુનીશ્વરાઃ ॥ ૩॥

ભીમો નામ મહોવીર્યો રાક્ષસોઽભૂત્પુરા દ્વિજાઃ ।
દુઃખદઃ સર્વભૂતાનાં ધર્મધ્વંસકરઃ સદા ॥ ૪॥

કુમ્ભકર્ણાત્સમુત્પન્નઃ કર્કટ્યાં સુમહાબલઃ ।
સહ્યે ચ પર્વતે સોઽપિ માત્રાવાસં ચકાર હ ॥ ૫॥

કુમ્ભકર્ણે ચ રામેણ હતે લોકભયઙ્કરે ।
રાક્ષસી પુત્રસંયુક્તા સહ્યેઽતિષ્ઠત્સ્વયં તદા ॥ ૬॥

સ બાલ એકદા ભીમઃ કર્કટીં માતરં દ્વિજાઃ ।
પપ્રચ્છ ચ ખલો લોકદુઃખદો ભીમવિક્રમઃ ॥ ૭॥

ભીમ ઉવાચ ।
માતર્મે કઃ પિતા કુત્ર કથં વૈકાકિની સ્થિતા ।
જ્ઞાતુમિચ્છામિ તત્સર્વં યથાર્થં ત્વં વદાધુના ॥ ૮॥

સૂત ઉવાચ ।
એવં પૃષ્ટા તદા તેન પુત્રેણ રાક્ષસી ચ સા ।
ઉવાચ પુત્રં સા દુષ્ટા શ્રૂયતાં કથયામ્યહમ્ ॥ ૯॥

કર્કટ્યુવાચ ।
પિતા તે કુમ્ભકર્ણશ્ચ રાવણાનુજ એવ ચ ।
રામેણ મારિતઃ સોઽયં ભ્રાત્રા સહ મહાબલઃ ॥ ૧૦॥

અત્રાગતઃ કદાચિદ્વૈ કુમ્ભકર્ણઃ સ રાક્ષસઃ ।

મદ્ભોગં કૃતવાંસ્તાત પ્રસહ્ય બલવાન્પુરા ॥ ૧૧॥

લઙ્કાં સ ગતવાન્ માં ચ ત્યક્ત્વાત્રૈવ મહાબલઃ ।
મયા ન દૃષ્ટા સા લઙ્કા હ્યત્રૈવ નિવસામ્યહમ્ ॥ ૧૨॥

પિતા મે કર્કટો નામ માતા મે પુષ્કસી મતા ।
ભર્તા મમ વિરાધો હિ રામેણ નિહતઃ પુરા ॥ ૧૩॥

પિત્રોઃ પાર્શ્વે સ્થિતા ચાહં નિહતે સ્વામિનિ પ્રિયે ।
પિતરૌ મે મૃતૌ ચાત્ર ઋષિણા ભસ્મસાત્કૃતૌ ॥ ૧૪॥

ભક્ષણાર્થં ગતૌ તત્ર ક્રુદ્ધેન સુમહાત્મના ।
સુતીક્ષ્ણેન સુતપસાગસ્ત્યશિષ્યેણ વૈ તદા ॥ ૧૫॥

સાહમેકાકિની જાતા દુઃખિતા પર્વતે પુરા ।
નિવસામિ સ્મ દુઃખાર્તા નિરાલમ્બા નિરાશ્રયા ॥ ૧૬॥

એતસ્મિન્સમયે હ્યત્ર રાક્ષસો રાવણાનુજઃ ।
આગત્ય કૃતવાન્ સઙ્ગં માં વિહાય ગતો હિ સઃ ॥ ૧૭॥

તતસ્ત્વં ચ સમુત્પન્નો મહાબલપરાક્રમઃ ।
અવલમ્બ્ય પુનસ્ત્વાં ચ કાલક્ષેપં કરોમ્યહમ્ ॥ ૧૭॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્યા ભીમો ભીમપરાક્રમઃ ।
ક્રુદ્ધશ્ચ ચિન્તયામાસ કિં કરોમિ હરિં પ્રતિ ॥ ૧૯॥

પિતાનેન હતો મે હિ તથા માતામહા અપિ ।
વિરાધશ્ચ હતોઽનેન દુઃખં બહુતરં કૃતમ્ ॥ ૨૦॥

તત્પુત્રોઽહં ભવેયં ચેદ્ધરિં તં પીડયામ્યહમ્ ।
ઇતિ કૃત્વા મતિં ભીમસ્તપસ્તપ્તું મહદ્યયૌ ॥ ૨૧॥

બ્રહ્માણં ચ સમુદ્દિશ્ય વર્ષાણાં ચ સહસ્રકમ્ ।
મનસા ધ્યાનમાશ્રિત્ય તપશ્ચક્રે મહત્તદા ॥ ૨૨॥

ઊર્ધ્વબાહુશ્ચૈકપાદઃ સૂર્યે દૃષ્ટિં દધત્પુરા ।
સંસ્થિતઃ સ બભૂવાથ ભીમો રાક્ષસપુત્રકઃ ॥ ૨૩॥

શિરસસ્તસ્ય સઞ્જાતં તેજઃ પરમદારુણમ્ ।
તેન દગ્ધાસ્તદા દેવા બ્રહ્માણં શરણં યયુઃ ॥ ૨૪॥

પ્રણમ્ય વેધસં ભક્ત્યા તુષ્ટુવુર્વિવિધૈઃ સ્તવૈઃ ।
દુઃખં નિવેદયાઞ્ચક્રુર્બ્રહ્મણે તે સવાસવાઃ ॥ ૨૫॥

દેવા ઊચુઃ ।
બ્રહ્મન્વૈ રક્ષસસ્તેજો લોકાન્પીડિતુમુદ્યતમ્ ।
યત્પ્રાર્થ્યતે ચ દુષ્ટેન તત્ત્વં દેહિ વરં વિધે ॥ ૨૬॥

નો ચેદદ્ય વયં દગ્ધાસ્તીવ્રતત્તેજસા પુનઃ ।
યાસ્યામઃ સઙ્ક્ષયં સર્વે તસ્માત્તં દેહિ પ્રાર્થિતમ્ ॥ ૨૭॥

સૂત ઉવાચ ।
ઇતિ તેષાં વચઃ શ્રુત્વા બ્રહ્મા લોકપિતામહઃ ।
જગામ ચ વરં દાતું વચનં ચેદમબ્રવીત્ ॥ ૨૮॥

બ્રહ્મોવાચ ।
પ્રસન્નોઽસ્મિ વરં બ્રૂહિ યત્તે મનસિ વર્તતે ।
ઇતિ શ્રુત્વા વિધેર્વાક્યમબ્રવીદ્રાક્ષસો હિ સઃ ॥ ૨૯॥

ભીમ ઉવાચ ।
યદિ પ્રસન્નો દેવેશ યદિ દેયો વરસ્ત્વયા ।
અતુલં ચ બલં મેઽદ્ય દેહિ ત્વં કમલાસન ॥ ૩૦॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા તુ નમશ્ચક્રે બ્રહ્મણે સ હિ રાક્ષસઃ ।
બ્રહ્મા ચાપિ તદા તસ્મૈ વરં દત્ત્વા ગૃહં યયૌ ॥ ૩૧॥

રાક્ષસો ગૃહમાગત્ય બ્રહ્માપ્તાતિબલસ્તદા ।
માતરં પ્રણિપત્યાશુ સ ભીમઃ પ્રાહ ગર્વવાન્ ॥ ૩૨॥

ભીમ ઉવાચ ।
પશ્ય માતર્બલં મેઽદ્ય કરોમિ પ્રલયં મહત્ ।
દેવાનાં શક્રમુખ્યાનાં હરેર્વૈ તત્સહાયિનઃ ॥ ૩૩॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા પ્રથમં ભીમો જિગ્યે દેવાન્સવાસવાન્ ।
સ્થાનાન્નિઃસારયામાસ સ્વાત્સ્વાત્તાન્ભીમવિક્રમઃ ॥ ૩૪॥

તતો જિગ્યે હરિં યુદ્ધે પ્રાર્થિતં નિર્જરૈરપિ ।

તતો જેતું રસાં દૈત્યઃ પ્રારમ્ભં કૃતવાન્મુદા ॥ ૩૫॥

પુરા સુદક્ષિણં તત્ર કામરૂપેશ્વરં પ્રભુમ્ ।
જેતું ગતસ્તતસ્તેન યુદ્ધમાસીદ્ભયઙ્કરમ્ ॥ ૩૬॥

ભીમોઽથ તં મહારાજં પ્રભાવાદ્ બ્રહ્મણોઽસુરઃ ।
જિગ્યે વરપ્રભાવેણ મહાવીરં શિવાશ્રયમ્ ॥ ૩૭॥

સ હિ જિત્વા તતસ્તં ચ કામરૂપેશ્વરં પ્રભુમ્ ।
બબન્ધ તાડયામાસ ભીમો ભીમપરાક્રમઃ ॥ ૩૮॥

ગૃહીતં તસ્ય સર્વસ્વં રાજ્યં સોપસ્કરં દ્વિજાઃ ।
તેન ભીમેન દુષ્ટેન શિવદાસસ્ય ભૂપતેઃ ॥ ૩૯॥

રાજા ચાપિ સુધર્મિષ્ઠઃ પ્રિયધર્મો હરપ્રિયઃ ।
ગૃહીતો નિગડૈસ્તેન હ્યેકાન્તે સ્થાપિતશ્ચ સઃ ॥ ૪૦॥

તત્ર તેન તદા કૃત્વા પાર્થિવીં મૂર્તિમુત્તમામ્ ।
ભજનં ચ શિવસ્યૈવ પ્રારબ્ધં પ્રિયકામ્યયા ॥ ૪૧॥

ગઙ્ગાયાઃ સ્તવનં તેન બહુધા ચ તદા કૃતમ્ ।
માનસં સ્નાનકર્માદિ કૃત્વા શઙ્કરપૂજનમ્ ॥ ૪૨॥

પાર્થિવેન વિધાનેન ચકાર નૃપસત્તમઃ ।
તદ્ધ્યાનં ચ યથા સ્યાદ્ધૈ કૃત્વા ચ વિધિપૂર્વકમ્ ॥ ૪૩॥

પ્રણિપાતૈસ્તથા સ્તોત્રૈર્મુદ્રાસનપુરઃસરમ્ ।
કૃત્વા હિ સકલં તચ્ચ સ ભેજે શઙ્કરં મુદા ॥ ૪૪॥

પઞ્ચાક્ષરમયીં વિદ્યાં જજાપ પ્રણવાન્વિતામ્ ।
નાન્યત્કાર્યં સ વૈ કર્તું લબ્ધવાનન્તરં તદા ॥ ૪૫॥

તત્પત્ની ચ તદા સાધ્વી દક્ષિણાનામ વિશ્રુતા ।
વિધાનં પાર્થિવં પ્રીત્યા ચકાર નૃપવલ્લભા ॥ ૪૬॥

દમ્પતી ત્વેકભાવેન શઙ્કરં ભક્તશઙ્કરમ્ ।
ભેજાતે તત્ર તૌ નિત્યં શિવારાધનતત્પરૌ ॥ ૪૭॥

રાક્ષસો યજ્ઞકર્માદિ વરદર્પવિમોહિતઃ ।
લોપયામાસ તત્સર્વં મહ્યં વૈ દીયતામિતિ ॥ ૪૮॥

બહુસૈન્યસમાયુક્તો રાક્ષસાનાં દુરાત્મનામ્ ।
ચકાર વસુધાં સર્વાં સ્વવશે ચર્ષિસત્તમાઃ ॥ ૪૯॥

વેદધર્મં શાસ્ત્રધર્મં સ્મૃતિધર્મં પુરાણજમ્ ।
લોપયિત્વા ચ તત્સર્વં બુભુજે સ્વયમૂર્જિતઃ ॥ ૫૦॥

દેવાશ્ચ પીડિતાસ્તેન સશક્રા ઋષયસ્તથા ।
અત્યન્તં દુઃખમાપન્ના લોકાન્નિઃસારિતા દ્વિજાઃ ॥ ૫૧॥

તે તતો વિકલાઃ સર્વે સવાસવસુરર્ષયઃ ।
બ્રહ્મવિષ્ણૂ પુરોધાય શઙ્કરં શરણં યયુઃ ॥ ૫૨॥

સ્તુત્વા સ્તોત્રૈરનેકૈશ્ચ શઙ્કરં લોકશઙ્કરમ્ ।
પ્રસન્નં કૃતવન્તસ્તે મહાકોશ્યાસ્તટે શુભે ॥ ૫૩॥

કૃત્વા ચ પાર્થિવીં મૂર્તિં પૂજયિત્વા વિધાનતઃ ।
તુષ્ટુવુર્વિવિધૈઃ સ્તોત્રૈર્નમસ્કારાદિભિઃ ક્રમાત્ ॥ ૫૪॥

એવં સ્તુતસ્તદા શમ્ભુર્દેવાનાં સ્તવનાદિભિઃ ।
સુપ્રસન્નતરો ભૂત્વા તાન્સુરાનિદમબ્રવીત્ ॥ ૫૫॥

શિવ ઉવાચ ।
હે હરે હે વિધે દેવા ઋષયશ્ચાખિલા અહમ્ ।
પ્રસન્નોઽસ્મિ વરં બ્રૂત કિં કાર્યં કરવાણિ વઃ ॥ ૫૬॥

સૂત ઉવાચ ।
ઇત્યુક્તે ચ તદા તેન શિવેન વચને દ્વિજાઃ ।
સુપ્રણમ્ય કરૌ બધ્વા દેવા ઊચુઃ શિવં તદા ॥ ૫૭॥

દેવા ઊચુઃ ।
સર્વં જાનાસિ દેવેશ સર્વેષાં મનસિ સ્થિતમ્ ।
અન્તર્યામી ચ સર્વસ્ય નાજ્ઞાતં વિદ્યતે તવ ॥ ૫૮॥

તથાપિ શ્રૂયતાં નાથ સ્વદુઃખં બ્રૂમહે વયમ્ ।
ત્વદાજ્ઞયા મહાદેવ કૃપાદૃષ્ટ્યા વિલોકય ॥ ૫૯॥

રાક્ષસઃ કર્કટીપુત્રઃ કુમ્ભકર્ણોદ્ભવો બલી ।
પીડયત્યનિશં દેવાન્બ્રહ્મદત્તવરોર્જિતઃ ॥ ૬૦॥

તમિમં જહિ ભીમાહ્વં રાક્ષસં દુઃખદાયકમ્ ।

કૃપાં કુરુ મહેશાન વિલમ્બં ન કુરુ પ્રભો ॥ ૬૧॥

સૂત ઉવાચ ।
ઇત્યુક્તસ્તુ સુરૈઃ સર્વૈઃ શમ્ભુર્વૈ ભક્તવત્સલઃ ।
વધં તસ્ય કરિષ્યામીત્યુક્ત્વા દેવાંસ્તતોઽબ્રવીત્ ॥ ૬૨॥

શમ્ભુરુવાચ ।
કામરૂપેશ્વરો રાજા મદીયો ભક્ત ઉત્તમઃ ।
તસ્મૈ બ્રૂતેતિ વૈ દેવાઃ કાર્યં શીઘ્રં ભવિષ્યતિ ॥ ૬૩॥

સુદક્ષિણ મહારાજ કામરૂપેશ્વર પ્રભો ।
મદ્ભક્તસ્ત્વં વિશેષેણ કુરુ મદ્ભજનં રતેઃ ॥ ૬૪॥

દૈત્યં ભીમાહ્વયં દુષ્ટં બ્રહ્મપ્રાપ્તવરોર્જિતમ્ ।
હનિષ્યામિ ન સન્દેહસ્ત્વત્તિરસ્કારકારિણમ્ ॥ ૬૫॥

સૂત ઉવાચ ।
અથ તે નિર્જરાઃ સર્વે તત્ર ગત્વા મુદાન્વિતાઃ ।
તસ્મૈ મહાનૃપાયોચુર્યદુક્તં શમ્ભુના ચ તત્ ॥ ૬૬॥

તમિત્યુક્ત્વા ચ વૈ દેવા આનન્દં પરમં ગતાઃ ।
મહર્ષયશ્ચ તે સર્વે યયુઃ શીઘ્રં નિજાશ્રમાન્ ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ભીમેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યે ભીમાસુરકૃતોપદ્રવવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૪.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૧. એકવિંશોઽધ્યાયઃ । ભીમેશ્વરજ્યોતિર્લિઙ્ગોત્પત્તિસ્તન્માહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
શિવોઽપિ ચ ગણૈઃ સાર્ધં જગામ હિતકામ્યયા ।
સ્વભક્તનિકટં ગુપ્તસ્તસ્થૌ રક્ષાર્થમાદરાત્ ॥ ૧॥

એતસ્મિન્નન્તરે તત્ર કામરૂપેશ્વરેણ ચ ।

અત્યન્તં ધ્યાનમારબ્ધં પાર્થિવસ્ય પુરસ્તદા ॥ ૨॥

કેનચિત્તત્ર ગત્વા ચ રાક્ષસાય નિવેદિતમ્ ।
રાજા કિઞ્ચિત્કરોત્યેવં ત્વદર્થં હ્યાભિચારિકમ્ ॥ ૩॥

સૂત ઉવાચ ।
રાક્ષસઃ સ ચ તચ્છ્રુત્વા ક્રુદ્ધસ્તદ્ હનનેચ્છયા ।
ગૃહીત્વા કરવાલં ચ જગામ નૃપતિં પ્રતિ ॥ ૪॥

તદ્ દૃષ્ટ્વા રાક્ષસસ્તત્ર પાર્થિવાદિ સ્થિતં ચ યત્ ।
તદર્થં તત્સ્વરૂપં ચ દૃષ્ટ્વા કિઞ્ચિત્કરોત્યસૌ ॥ ૫॥

અત એનં બલાદદ્ય હન્મિ સોપસ્કરં નૃપમ્ ।
વિચાર્યેતિ મહાક્રુદ્ધો રાક્ષસઃ પ્રાહ તં નૃપમ્ ॥ ૬॥

ભીમ ઉવાચ ।
રે રે પાર્થિવ દુષ્ટાત્મન્ ક્રિયતે કિં ત્વયાધુના ।
સત્યં વદ ન હન્યાં ત્વામન્યથા હન્મિ નિશ્ચિતમ્ ॥ ૭॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય કામરૂપેશ્વરશ્ચ સઃ ।
મનસીતિ ચિચિન્તાશુ શિવવિશ્વાસપૂરિતઃ ॥ ૮॥

ભવિષ્યં યદ્ભવત્યેવ નાસ્તિ તસ્ય નિવર્તકઃ ।
પ્રારબ્ધાધીનમેવાત્ર પ્રારબ્ધઃ સ શિવઃ સ્મૃતઃ ॥ ૯॥

કૃપાલુઃ શઙ્કરશ્ચાત્ર પાર્થિવે વર્તતે ધ્રુવમ્ ।
મદર્થં ન કરોતીહ કુતઃ કોઽયં ચ રાક્ષસઃ ॥ ૧૦॥

સ્વાનુરૂપાં પ્રતિજ્ઞાં સ સત્યં ચૈવ કરિષ્યતિ ।
સત્યપ્રતિજ્ઞો ભગવાન્ શિવશ્ચેતિ શ્રુતૌ શ્રુતઃ ॥ ૧૧॥

મમ ભક્તં યદા કશ્ચિત્પીડયત્યતિદારુણઃ ।
તદાહં તસ્ય રક્ષાર્થં દુષ્ટં હન્મિ ન સંશયઃ ॥ ૧૨॥

એવં ધૈર્યં સમાલમ્બ્ય ધ્યાત્વા દેવં ચ શઙ્કરમ્ ।
પ્રાર્થયામાસ સદ્ભક્ત્યા મનસૈવ રસેશ્વરઃ ॥ ૧૩॥

ત્વદીયોઽસ્મિ મહારાજ યથેચ્છસિ તથા કુરુ ।
સત્યં ચ વચનં હ્યત્ર બ્રવીમિ કુરુ મે હિતમ્ ॥ ૧૪॥

એવં મનસિ સ ધ્યાત્વા સત્યપાશેન યન્ત્રિતઃ ।
પ્રાહ સત્યં વચો રાજા રાક્ષસં ચાવમાનયન્ ॥ ૧૫॥

નૃપ ઉવાચ ।
ભજામિ શઙ્કરં દેવં સ્વભક્તપરિપાલકમ્ ।
ચરાચરાણાં સર્વેષામીશ્વરં નિર્વિકારકમ્ ॥ ૧૬॥

સૂત ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા કામરૂપેશ્વરસ્ય સઃ ।
ક્રોધેન પ્રચલદ્ગાત્રો ભીમો વચનમબ્રવીત્ ॥ ૧૭॥

ભીમ ઉવાચ ।
શઙ્કરસ્તે મયા જ્ઞાતઃ કિં કરિષ્યતિ વૈ મમ ।
યો મે પિતૃવ્યકેનૈવ સ્થાપિતઃ કિઙ્કરો યથા ॥ ૧૮॥

તદ્બલં હિ સમાશ્રિત્ય વિજેતું ત્વં સમીહસે ।
તર્હિ ત્વયા જિતં સર્વં નાત્ર કાર્યા વિચારણા ॥ ૧૯॥

યાવન્મયા ન દૃષ્ટો હિ શઙ્કરસ્ત્વત્પ્રપાલકઃ ।
તાવત્ત્વં સ્વામિનં મત્વા સેવસે નાન્યથા ક્વચિત્ ॥ ૨૦॥

મયા દૃષ્ટે ચ તત્સર્વં સ્ફુટં સ્યાત્સર્વથા નૃપ ।
તસ્માત્ત્વં વૈ શિવસ્યેદં રૂપં દૂરતરં કુરુ ॥ ૨૧॥

અન્યથા હિ ભયં તેઽદ્ય ભવિષ્યતિ ન સંશયઃ ।
સ્વામિનસ્તે કરં તીક્ષ્ણં દાસ્યેઽહં ભીમવિક્રમઃ ॥ ૨૨॥

સૂત ઉવાચ ।
ઇતિ તદ્વચનં શ્રુત્વા કામરૂપેશ્વરો નૃપઃ ।
દૃઢં શઙ્કરવિશ્વાસો દ્રુતં વાક્યમુવાચ તમ્ ॥ ૨૩॥

રાજોવાચ ।
અહં ચ પામરો દુષ્ટો ન મોક્ષ્યે શઙ્કરં પુનઃ ।
સર્વોત્કૃષ્ટશ્ચ મે સ્વામી ન માં મુઞ્ચતિ કર્હિચિત્ ॥ ૨૪॥

સૂત ઉવાચ ।
એવં વચસ્તદા શ્રુત્વા તસ્ય રાજ્ઞઃ શિવાત્મનઃ ।
તં પ્રહસ્ય દ્રુતં ભીમો ભૂપતિં રાક્ષસોઽબ્રવીત્ ॥ ૨૫॥

ભીમ ઉવાચ ।
મત્તો ભિક્ષયતે નિત્યં સ કિં જાનાતિ સ્વાકૃતિમ્ ।
યોગિનાં કા ચ નિષ્ઠા વૈ ભક્તાનાં પ્રતિપાલને ॥ ૨૬॥

ઇતિ કૃત્વા મતિં ત્વં ચ દૂરતો ભવ સર્વથા ।
અહં ચ તવ સ સ્વામી યુદ્ધં વૈ કરવાવહે ॥ ૨૭॥

સૂત ઉવાચ ।
ઇત્યુક્તઃ સ નૃપશ્રેષ્ઠઃ શમ્ભુભક્તો દૃઢવ્રતઃ ।
પ્રત્યુવાચાભયો ભીમં દુઃખદં જગતાં સદા ॥ ૨૮॥

રાજોવાચ ।
શ ृણુ રાક્ષસ દુષ્ટાત્મન્મયા કર્તું ન શક્યતે ।
ત્વયા વિક્રિયતે તર્હિ કુતસ્ત્વં શક્તિમાનસિ ॥ ૨૯॥

સૂત ઉવાચ ।
ઇત્યુક્તઃ સૈન્યમાદાય રાજાનં પરિભર્ત્સ્ય તમ્ ।
કરાલં કરવાલં ચ પાર્થિવે પ્રાક્ષિપત્તદા ॥ ૩૦॥

પશ્ય ત્વં સ્વામિનોઽદ્યૈવ બલં ભક્તસુખાવહમ્ ।
ઇત્યુવાચ વિહસ્યૈવ રાક્ષસૈઃ સ મહાબલઃ ॥ ૩૧॥

કરવાલઃ પાર્થિવં ચ યાવત્સ્પૃશતિ નો દ્વિજાઃ ।
તાવચ્ચ પાર્થિવાત્તસ્માદાવિરાસીત્સ્વયં હરઃ ॥ ૩૨॥

પશ્ય ભીમેશ્વરોઽહં ચ રક્ષાર્થં પ્રકટોઽભવમ્ ।
મમ પૂર્વવ્રતં હ્યેતદ્રક્ષ્યો ભક્તો મયા સદા ॥ ૩૩॥

એતસ્માત્પશ્ય મે શીઘ્રં બલં ભક્તસુખાવહમ્ ।
ઇત્યુક્ત્વા સ પિનાકેન કરવાલો દ્વિધા કૃતઃ ॥ ૩૪॥

પુનશ્ચૈવ ત્રિશૂલં સ્વં ચિક્ષિપે તેન રક્ષસા ।
તચ્છૂલં શતધા નીતમપિ દુષ્ટસ્ય શમ્ભુના ॥ ૩૫॥

પુનઃ શક્તિશ્ચ નિઃક્ષિપ્તા તેન શમ્ભૂપરિ દ્વિજાઃ ।
શમ્ભુના સાપિ બાણૈઃ સ્વૈર્લક્ષધા ચ કૃતા દ્રુતમ્ ॥ ૩૬॥

પટ્ટિશશ્ચ તતસ્તેન નિઃક્ષિપ્તો હિ શિવોપરિ ।
શિવેન સ ત્રિશૂલેન તિલશશ્ચ કૃતં ક્ષણાત્ ॥ ૩૭॥

તતઃ શિવગણાનાં ચ રાક્ષસાનાં પરસ્પરમ્ ।
યુદ્ધમાસીત્તદા ઘોરં પશ્યતાં દુઃખકાવહમ્ ॥ ૩૮॥

તતશ્ચ પૃથિવી સર્વા વ્યાકુલા ચાભવત્ક્ષણાત્ ।
સમુદ્રાશ્ચ તદા સર્વે ચુક્ષુભુઃ સમહીધરાઃ ॥ ૩૯॥

દેવાશ્ચ ઋષયઃ સર્વે બભૂવુર્વિકલા અતિ ।
ઊચુઃ પરસ્પરં ચેતિ વ્યર્થં વૈ પ્રાર્થિતઃ શિવઃ ॥ ૪૦॥

નારદશ્ચ સમાગત્ય શઙ્કરં દુઃખદાહકમ્ ।
પ્રાર્થયામાસ તત્રૈવ સાઞ્જલિર્નતમસ્તકઃ ॥ ૪૧॥

નારદ ઉવાચ ।
ક્ષમ્યતાં ક્ષમ્યતાં નાથ ત્વયા વિભ્રમકારક ।
તૃણે કશ્ચ કુઠારો વૈ હન્યતાં શીઘ્રમેવ હિ ॥ ૪૨॥

ઇતિ સમ્પ્રાર્થિતઃ શમ્ભુઃ સર્વાન્ રક્ષોગણાન્પ્રભુઃ ।
હુઙ્કારેણૈવ ચાસ્ત્રેણ ભસ્મસાત્કૃતવાંસ્તદા ॥ ૪૩॥

સર્વે તે રાક્ષસા દગ્ધાઃ શઙ્કરેણ ક્ષણં મુને ।
બભૂવુસ્તત્ર સર્વેષાં દેવાનાં પશ્યતાં દ્રુતમ્ ॥ ૪૪॥

દાવાનલગતો વહ્નિર્યથા ચ વનમાદહેત્ ।
તથા શિવેન ક્રુદ્ધેન રાક્ષસાનાં બલં ક્ષણાત્ ॥ ૪૫॥

ભીમસ્યૈવ ચ કિં ભસ્મ ન જ્ઞાતં કેનચિત્તદા ।
પરિવારયુતો દગ્ધો નામ ન શ્રૂયતે ક્વચિત્ ॥ ૪૬॥

તતઃ શિવસ્ય કૃપયા શાન્તિં પ્રાપ્તા મુનીશ્વરાઃ ।
દેવાઃ સર્વે ચ શક્રાદ્યાઃ સ્વાસ્થ્યં પ્રાપાખિલં જગત્ ॥ ૪૭॥

ક્રોધજ્વાલા મહેશસ્ય નિઃસસાર વનાદ્વનમ્ ।
રાક્ષસાનાં ચ તદ્ભસ્મ સર્વં વ્યાપ્તં વનેઽખિલમ્ ॥ ૪૮॥

તતશ્ચૌષધયો જાતા નાનાકાર્યકરાસ્તથા ।
રૂપાન્તરં તતો નૃણાં ભવેદ્વેષાન્તરં તથા ॥ ૪૯॥

ભૂતપ્રેતપિશાચાદિ દૂરતશ્ચ તતો વ્રજેત્ ।
તન્ન કાર્યં ચ યચ્ચૈવ તતો ન ભવતિ દ્વિજાઃ ॥ ૫૦॥

તૈર્દેવૈઃ પ્રાર્થિતઃ શમ્ભુર્મુનિભિશ્ચ વિશેષતઃ ।

સ્થાતવ્યં સ્વામિના હ્યત્ર લોકાનાં સુખહેતવે ॥ ૫૧॥

અયં વૈ કુત્સિતો દેશ અયોધ્યાલોકદુઃખદઃ ।
ભવન્તં ચ તદા દૃષ્ટ્વા કલ્યાણં સમ્ભવિષ્યતિ ॥ ૫૨॥

ભીમશઙ્કરનામા ત્વં ભવિતા સર્વસાધકઃ ।
એતલ્લિઙ્ગં સદા પૂજ્યં સર્વાપદ્વિનિવારકમ્ ॥ ૫૩॥

સૂત ઉવાચ ।
ઇત્યેવં પ્રાર્થિતઃ શમ્ભુર્લોકાનાં હિતકારકઃ ।
તત્રૈવાસ્થિતવાન્પ્રીત્યા સ્વતન્ત્રો ભક્તવત્સલઃ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ભીમેશ્વરજ્યોતિર્લિઙ્ગોત્પત્તિસ્તન્માહાત્મ્યવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૪.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૨. દ્વાવિંશોઽધ્યાયઃ । કાશ્યાં રુદ્રાગમનવર્ણનમ્ ।

સૂત ઉવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ શ્રૂયતામૃષિસત્તમાઃ ।
વિશ્વેશ્વરસ્ય માહાત્મ્યં મહાપાતકનાશનમ્ ॥ ૧॥

યદિદં દૃશ્યતે કિઞ્ચિજ્જગત્યાં વસ્તુમાત્રકમ્ ।
ચિદાનન્દસ્વરૂપં ચ નિર્વિકારં સનાતનમ્ ॥ ૨॥

તસ્યૈવ કૈવલ્યરતેર્દ્વિતીયેચ્છા તતોઽભવત્ ।
સ એવ સગુણો જાતઃ શિવ ઇત્યભિધીયતે ॥ ૩॥

સ એવ હિ દ્વિધા જાતઃ પુંસ્ત્રીરૂપપ્રભેદતઃ ।
યઃ પુમાન્સ શિવઃ ખ્યાતઃ સ્ત્રી શક્તિઃ સા હિ કથ્યતે ॥ ૪॥

ચિદાનન્દસ્વરૂપાભ્યાં પુરુષાવપિ નિર્મિતૌ ॥ ૫॥

અદૃષ્ટાભ્યાં તદા તાભ્યાં સ્વભાવાન્મુનિસત્તમાઃ ।
તાવદૃષ્ટ્વા તદા તૌ ચ સ્વમાતૃપિતરૌ દ્વિજાઃ ॥ ૬॥

મહાસંશયમાપન્નૌ પ્રકૃતિઃ પુરુષશ્ચ તૌ ।
તદા વાણી સમુત્પન્ના નિર્ગુણાત્પરમાત્મનઃ ।
તપશ્ચૈવ પ્રકર્તવ્યં તતઃ સૃષ્ટિરનુત્તમા ॥ ૭॥

પ્રકૃતિપુરુષાવૂચતુઃ ।
તપસસ્તુ સ્થલં નાસ્તિ કુત્રાવાભ્યાં પ્રભોઽધુના ।
સ્થિત્વા તપઃ પ્રકર્તવ્યં તવ શાસનતઃ શિવ ॥ ૮॥

તતશ્ચ તેજસઃ સારં પઞ્ચક્રોશાત્મકં શુભમ્ ।
સર્વોપકરણૈર્યુક્તં સુન્દરં નગરં તથા ॥ ૯॥

નિર્માય પ્રેષિતં તત્સ્વં નિર્ગુણેન શિવેન ચ ।
અન્તરિક્ષે સ્થિતં તચ્ચ પુરુષસ્ય સમીપતઃ ॥ ૧૦॥

તદધિષ્ઠાય હરિણા સૃષ્ટિકામનયા તતઃ ।
બહુકાલં તપસ્તપ્તં તદ્ધ્યાનમવલમ્બ્ય ચ ॥ ૧૧॥

શ્રમેણ જલધારાશ્ચ વિવિધાશ્ચાભવંસ્તદા ।
તાભિર્વ્યાપ્તં ચ તચ્છૂન્યં નાન્યત્કિઞ્ચિદદૃશ્યત ॥ ૧૨॥

તતશ્ચ વિષ્ણુના દૃષ્ટં કિમેતદ્ દૃશ્યતેઽદ્ભુતમ્ ।
ઇત્યાશ્ચર્યં તદા દૃષ્ટ્વા શિરસઃ કમ્પનં કૃતમ્ ॥ ૧૩॥

તતશ્ચ પતિતઃ કર્ણાન્મણિશ્ચ પુરતઃ પ્રભોઃ ।
તદ્ બભૂવ મહત્તીર્થં નામતો મણિકર્ણિકા ॥ ૧૪॥

જલૌઘે પ્લાવ્યમાના સા પઞ્ચક્રોશી યદાભવત્ ।
નિર્ગુણેન શિવેનાશુ ત્રિશૂલેન ધૃતા તદા ॥ ૧૫॥

વિષ્ણુસ્તત્રૈવ સુષ્વાપ પ્રકૃત્યા સ્વસ્ત્રિયા સહ ।
તન્નાભિકમલાજ્જાતો બ્રહ્મા શઙ્કરશાસનાત્ ॥ ૧૬॥

શિવાજ્ઞાં સ સમાસાદ્ય સૃષ્ટિં ચક્રેઽદ્ભુતાં તદા ।
ચતુર્દશમિતા લોકા બ્રહ્માણ્ડે યત્ર નિર્મિતાઃ ॥ ૧૭॥

યોજનાનાં ચ પઞ્ચાશત્કોટિસઙ્ખ્યાપ્રમાણતઃ ।
બ્રહ્માણ્ડસ્યૈવ વિસ્તારો મુનિભિઃ પરિકીર્તિતઃ ॥ ૧૮॥

બ્રહ્માણ્ડે કર્મણા બદ્ધાઃ પ્રાણિનો માં કથં પુનઃ ।
પ્રાપ્સ્યન્તીતિ વિચિન્ત્યૈતત્પઞ્ચક્રોશી વિમોચિતા ॥ ૧૯॥

ઇયં ચ શુભદા લોકે કર્મનાશકરી મતા ।
મોક્ષપ્રકાશિકા કાશી જ્ઞાનદા મમ સુપ્રિયા ॥ ૨૦॥

અવિમુક્તં સ્વયં લિઙ્ગં સ્થાપિતં પરમાત્મના ।
ન કદાપિ ત્વયા ત્યાજ્યમિદં ક્ષેત્રં મમાંશક ॥ ૨૧॥

ઇત્યુક્ત્વા ચ ત્રિશૂલાત્સ્વાદવતાર્ય હરઃ સ્વયમ્ ।
મોચયામાસ ભુવને મર્ત્યલોકે હિ કાશિકામ્ ॥ ૨૨॥

બ્રહ્મણશ્ચ દિને સા હિ ન વિનશ્યતિ નિશ્ચિતમ્ ।
તદા શિવસ્ત્રિશૂલેન દધાતિ મુનયશ્ચ તામ્ ॥ ૨૩॥

પુનશ્ચ બ્રહ્મણા સૃષ્ટૌ કૃતાયાં સ્થાપ્યતે દ્વિજાઃ ।
કર્મણાં કર્ષણાચ્ચૈવ કાશીતિ પરિપઠ્યતે ॥ ૨૪॥

અવિમુક્તેશ્વરં લિઙ્ગં કાશ્યાં તિષ્ઠતિ સર્વદા ।
મુક્તિદાતૃ ચ લોકાનાં મહાપાતકિનામપિ ॥ ૨૫॥

અન્યત્ર પ્રાપ્યતે મુક્તિઃ સારૂપ્યાદિર્મુનીશ્વરાઃ ।
અત્રૈવ પ્રાપ્યતે જીવૈઃ સાયુજ્યા મુક્તિરુત્તમા ॥ ૨૬॥

યેષાં ક્વાપિ ગતિર્નાસ્તિ તેષાં વારાણસી પુરી ।
પઞ્ચક્રોશી મહાપુણ્યા હત્યાકોટિવિનાશની ॥ ૨૭॥

અમરા મરણં સર્વે વાઞ્છન્તીહ પરે ચ કે ।
ભુક્તિમુક્તિપ્રદા ચૈષા સર્વદા શઙ્કરપ્રિયા ॥ ૨૮॥

બ્રહ્મા ચ શ્લાઘતે ચામું વિષ્ણુઃ સિદ્ધાશ્ચ યોગિનઃ ।
મુનયશ્ચ તથૈવાન્યે ત્રિલોકસ્થા જનાઃ સદા ॥ ૨૯॥

કાશ્યાશ્ચ મહિમાનં વૈ વક્તું વર્ષશતૈરપિ ।
શક્નોમ્યહં ન સર્વં હિ યથાશક્તિ બ્રુવે તતઃ ॥ ૩૦॥

કૈલાસસ્ય પતિર્યો વૈ હ્યન્તઃ સત્ત્વો બહિસ્તમાઃ ।
કાલાગ્નિર્નામતઃ ખ્યાતો નિર્ગુણો ગુણવાન્ભવઃ ।
પ્રણિપાતૈરનેકૈશ્ચ વચનં ચેદમબ્રવીત્ ॥ ૩૧॥

રુદ્ર ઉવાચ ।
વિશ્વેશ્વર મહેશાન ત્વદીયોઽસ્મિ ન સંશયઃ ।
કૃપાં કુરુ મહાદેવ મયિ ત્વં સામ્બ આત્મજે ॥ ૩૨॥

સ્થાતવ્યં ચ સદાત્રૈવ લોકાનાં હિતકામ્યયા ।
તારયસ્વ જગન્નાથ પ્રાર્થયામિ જગત્પતે ॥ ૩૩॥

સૂત ઉવાચ ।
અવિમુક્તોઽપિ દાન્તાત્મા તં સમ્પ્રાર્થ્ય પુનઃ પુનઃ ।
નેત્રાશ્રૂણિ પ્રમુચ્યૈવ પ્રીતઃ પ્રોવાચ શઙ્કરમ્ ॥ ૩૪॥

અવિમુક્ત ઉવાચ ।
દેવદેવ મહાદેવ કાલામયસુભેષજ ।
ત્વં ત્રિલોકપતિઃ સત્યં સેવ્યો બ્રહ્માચ્યુતાદિભિઃ ॥ ૩૫॥

કાશ્યાં પુર્યાં ત્વયા દેવ રાજધાની પ્રગૃહ્યતામ્ ।
મયા ધ્યાનિતયા સ્થેયમચિન્ત્યસુખહેતવે ॥ ૩૬॥

મુક્તિદાતા ભવાનેહ કામદશ્ચ ન ચાપરઃ ।
તસ્માત્ત્વમુપકારાય તિષ્ઠોમાસહિતઃ સદા ॥ ૩૭॥

જીવાન્ભવાબ્ધેરખિલાંસ્તારય ત્વં સદાશિવ ।
ભક્તકાર્યં કુરુ હર પ્રાર્થયામિ પુનઃપુનઃ ॥ ૩૮॥

સૂત ઉવાચ ।
ઇત્યેવં પ્રાર્થિતસ્તેન વિશ્વનાથેન શઙ્કરઃ ।
લોકાનામુપકારાર્થં તસ્થૌ તત્રાપિ સર્વરાટ્ ॥ ૩૯॥

યદ્દિનં હિ સમારભ્ય હરઃ કાશ્યામુપાગતઃ ।
તદારભ્ય ચ સા કાશી સર્વશ્રેષ્ઠતરાભવત્ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં વિશ્વેશ્વરમાહાત્મ્યે કાશ્યાં રુદ્રાગમનવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૪.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૩. ત્રયોવિંશોઽધ્યાયઃ । કાશીવિશ્વેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનમ્ ।

ઋષય ઊચુઃ ।

એવં વારાણસી પુણ્યા યદિ સૂત મહાપુરી ।
તત્પ્રભાવં વદાસ્માકમવિમુક્તસ્ય ચ પ્રભો ॥ ૧॥

સૂત ઉવાચ ।
વક્ષ્યે સઙ્ક્ષેપતઃ સમ્યગ્વારાણસ્યાઃ સુશોભનમ્ ।
વિશ્વેશ્વરસ્ય માહાત્મ્યં શ્રૂયતાં ચ મુનીશ્વરાઃ ॥ ૨॥

કદાચિત્પાર્વતી દેવી શઙ્કરં પરયા મુદા ।
લોકકામનયાપૃચ્છન્માહાત્મ્યમવિમુક્તયોઃ ॥ ૩॥

પાર્વત્યુવાચ ।
અસ્ય ક્ષેત્રસ્ય માહાત્મ્યં વક્તુમર્હસ્યશેષતઃ ।
મમોપરિ કૃપાં કૃત્વા લોકાનાં હિતકામ્યયા ॥ ૪॥

સૂત ઉવાચ ।
દેવ્યાસ્તદ્વચનં શ્રુત્વા દેવદેવો જગત્પ્રભુઃ ।
પ્રત્યુવાચ ભવાનીં તાં જીવાનાં પ્રિયહેતવે ॥ ૫॥

પરમેશ્વર ઉવાચ ।
સાધુ પૃષ્ટં ત્વયા ભદ્રે લોકાનાં સુખદં શુભમ્ ।
કથયામિ યથાર્થં વૈ માહાત્મ્યમવિમુક્તયોઃ ॥ ૬॥

ઇદં ગુહ્યતમં ક્ષેત્રં સદા વારાણસી મમ ।
સર્વેષામેવ જન્તૂના હેતુર્મોક્ષસ્ય સર્વથા ॥ ૭॥

અસ્મિન્સિદ્ધાઃ સદા ક્ષેત્રે મદીયં વ્રતમાશ્રિતાઃ ।
નાનાલિઙ્ગધરા નિત્યં મમ લોકાભિકાઙ્ક્ષિણઃ ॥ ૮॥

અભ્યસ્યન્તિ મહાયોગં જિતાત્માનો જિતેન્દ્રિયાઃ ।
પરં પાશુપતં શ્રૌતં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૯॥

રોચતે મે સદા વાસો વારાણસ્યાં મહેશ્વરિ ।
હેતુના યેન સર્વાણિ વિહાય શૃણુ તદ્ ધ્રુવમ્ ॥ ૧૦॥

યો મે ભક્તશ્ચ વિજ્ઞાની તાવુભૌ મુક્તિભાગિનૌ ।
તીર્થાપેક્ષા ચ ન તયોર્વિહિતાવિહિતે સમૌ ॥ ૧૧॥

જીવન્મુક્તૌ તુ તૌ જ્ઞેયૌ યત્ર કુત્રાપિ વૈ મૃતૌ ।
પ્રાપ્નુતો મોક્ષમાશ્વેવ મયોક્તં નિશ્ચિતં વચઃ ॥ ૧૨॥

અત્ર તીર્થે વિશેષોઽસ્ત્યવિમુક્તાખ્યે પરોત્તમે ।
શ્રૂયતાં તત્ત્વયા દેવિ પરશક્તે સુચિત્તયા ॥ ૧૩॥

સર્વે વર્ણા આશ્રમાશ્ચ બાલયૌવનવાર્ધકાઃ ।
અસ્યાં પુર્યાં મૃતાશ્ચેત્સ્યુર્મુક્તા એવ ન સંશયઃ ॥ ૧૪॥

અશુચિશ્ચ શુચિર્વાપિ કન્યા પરિણતા તથા ।
વિધવા વાથ વા વન્ધ્યા રજોદોષયુતાપિ વા ॥ ૧૫॥

પ્રસૂતાસંસ્કૃતા કાપિ યાદૃશી તાદૃશી દ્વિજાઃ ।
અત્ર ક્ષેત્રે મૃતા ચેત્સ્યાન્મોક્ષભાઙ્નાત્ર સંશયઃ ॥ ૧૬॥

સ્વેદજશ્ચાણ્ડજો વાપિ હ્યુદ્ભિજ્જોઽથ જરાયુજઃ ।
મૃતો મોક્ષમવાપ્નોતિ યથાત્ર ન તથા ક્વચિત્ ॥ ૧૭॥

જ્ઞાનાપેક્ષા ન ચાત્રૈવ ભક્ત્યપેક્ષા ન વૈ પુનઃ ।
કર્માપેક્ષા ન દેવ્યત્ર દાનાપેક્ષા ન ચૈવ હિ ॥ ૧૮॥

સંસ્કૃત્યપેક્ષા નૈવાત્ર ધ્યાનાપેક્ષા ન કર્હિચિત્ ।
નામાપેક્ષાર્ચનાપેક્ષા સુજાતીનાં તથાત્ર ન ॥ ૧૯॥

મમ ક્ષેત્રે મોક્ષદે હિ યો વા વસતિ માનવઃ ।
યથા તથા મૃતઃ સ્યાચ્ચેન્મોક્ષમાપ્નોતિ નિશ્ચિતમ્ ॥ ૨૦॥

એતન્મમ પુરં દિવ્યં ગુહ્યાદ્ ગુહ્યતરં પ્રિયે ।
બ્રહ્માદયોઽપિ જાનન્તિ માહાત્મ્યં નાસ્ય પાર્વતિ ॥ ૨૧॥

મહત્ક્ષેત્રમિદં તસ્માદવિમુક્તમિતિ સ્મૃતમ્ ।
સર્વેભ્યો નૈમિષાદિભ્યઃ પરં મોક્ષપ્રદં મૃતે ॥ ૨૨॥

ધર્મસ્યોપનિષત્સત્યં મોક્ષસ્યોપનિષત્સમમ્ ।
ક્ષેત્રતીર્થોપનિષદમવિમુક્તં વિદુર્બુધાઃ ॥ ૨૩॥

કામં ભુઞ્જન્સ્વપન્ક્રીડન્કુર્વન્હિ વિવિધાઃ ક્રિયાઃ ।
અવિમુક્તે ત્યજન્પ્રાણાઞ્જન્તુર્મોક્ષાય કલ્પતે ॥ ૨૪॥

કૃત્વા પાપસહસ્રાણિ પિશાચત્વં વરં નૃણામ્ ।
ન ચ ક્રતુસહસ્રત્વં સ્વર્ગે કાશીં પુરીં વિના ॥ ૨૫॥

તસ્માત્સર્વપ્રયત્નેન સેવ્યતે કાશિકા પુરી ।
અવ્યક્તલિઙ્ગં મુનિભિર્ધ્યાયતે ચ સદાશિવઃ ॥ ૨૬॥

યદ્યત્ફલં સમુદ્દિશ્ય તપન્ત્યત્ર નરાઃ પ્રિયે ।
તેભ્યશ્ચાહં પ્રયચ્છામિ સમ્યક્તત્તત્ફલં ધ્રુવમ્ ॥ ૨૭॥

સાયુજ્યમાત્મનઃ પશ્ચાદીપ્સિતં સ્થાનમેવ ચ ।
ન કુતશ્ચિત્કર્મબન્ધસ્ત્યજતામત્ર વૈ તનુમ્ ॥ ૨૮॥

બ્રહ્મા દેવર્ષિભિઃ સાર્ધં વિષ્ણુર્વાપિ દિવાકરઃ ।
ઉપાસતે મહાત્માનઃ સર્વે મામિહ ચાપરે ॥ ૨૯॥

વિષયાસક્તચિત્તોઽપિ ત્યક્તધર્મરુચિર્નરઃ ।
ઇહ ક્ષેત્રે મૃતો યો વૈ સંસારં ન પુનર્વિશેત્ ॥ ૩૦॥

કિં પુનર્નિર્મમા ધીરાઃ સત્ત્વસ્થા દમ્ભવર્જિતાઃ ।
કૃતિનશ્ચ નિરારમ્ભાઃ સર્વે તે મયિ ભાવિતાઃ ॥ ૩૧॥

જન્માન્તરસહસ્રેષુ જન્મ યોગી સમાપ્નુયાત્ ।
તદિહૈવ પરં મોક્ષં મરણાદધિગચ્છતિ ॥ ૩૨॥

અત્ર લિઙ્ગાન્યનેકાનિ ભક્તૈઃ સંસ્થાપિતાનિ હિ ।
સર્વકામપ્રદાનીહ મોક્ષદાનિ ચ પાર્વતિ ॥ ૩૩॥

પઞ્ચક્રોશં ચતુર્દિક્ષુ ક્ષેત્રમેતત્પ્રકીર્તિતમ્ ।
સમન્તાચ્ચ તથા જન્તોર્મૃતિકાલેઽમૃતપ્રદમ્ ॥ ૩૪॥

અપાપશ્ચ મૃતો યો વૈ સદ્યો મોક્ષં સમશ્નુતે ।
સપાપશ્ચ મૃતો યઃ સ્યાત્કાયવ્યૂહાન્સમશ્નુતે ॥ ૩૫॥

યાતનાં સોઽનુભૂયૈવ પશ્ચાન્મોક્ષમવાપ્નુયાત્ ।
પાતકં યોઽવિમુક્તાખ્યે ક્ષેત્રેઽસ્મિન્કુરુતે ધ્રુવમ્ ॥ ૩૬॥

ભૈરવીં યાતનાં પ્રાપ્ય વર્ષાણામયુતે પુનઃ ।
તતો મોક્ષમવાપ્નોતિ ભુક્ત્વા પાપં ચ સુન્દરિ ॥ ૩૭॥

ઇતિ તે ચ સમાખ્યાતા પાપાચારે ચ યા ગતિઃ ।
એવં જ્ઞાત્વા નરઃ સમ્યક્સેવયેદવિમુક્તકમ્ ॥ ૩૮॥

કૃતકર્મક્ષયો નાસ્તિ કલ્પકોટિશતૈરપિ ।
અવશ્યમેવ ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ॥ ૩૯॥

કેવલં ચાશુભં કર્મ નરકાય ભવેદિહ ।

શુભં સ્વર્ગાય જાયેત દ્વાભ્યાં માનુષ્યમીરિતમ્ ॥ ૪૦॥

જન્મ સમ્યગસમ્યક્ ચ ન્યૂનાધિક્યે ભવેદિહ ।
ઉભયોશ્ચ ક્ષયો મુક્તિર્ભવેત્સત્યં હિ પાર્વતિ ॥ ૪૧॥

કર્મ ચ ત્રિવિધં પ્રોક્તં કર્મકાણ્ડે મહેશ્વરિ ।
સઞ્ચિતં ક્રિયમાણં ચ પ્રારબ્ધં ચેતિ બન્ધકૃત્ ॥ ૪૨॥

પૂર્વજન્મસમુદ્ભૂતં સઞ્ચિતં સમુદાહૃતમ્ ।
ભુજ્યતે ચ શરીરેણ પ્રારબ્ધં પરિકીર્તિતમ્ ॥ ૪૩॥

અનેન જન્મના યચ્ચ ક્રિયતે કર્મ સામ્પ્રતમ્ ।
શુભાશુભં ચ દેવેશિ ક્રિયમાણં વિદુર્બુધાઃ ॥ ૪૪॥

પ્રારબ્ધકર્મણો ભોગાત્ક્ષયશ્ચૈવ ન ચાન્યથા ।
ઉપાયેન દ્વયોર્નાશઃ કર્મણોઃ પૂજનાદિના ॥ ૪૫॥

સર્વેષાં કર્મણાં નાશો નાસ્તિ કાશીં પુરીં વિના ।
સર્વં ચ સુલભં તીર્થં દુર્લભા કાશિકા પુરી ॥ ૪૬॥

પૂર્વજન્મકૃતં ચેદ્વૈ કાશીદર્શનમાદરાત્ ।
તદા કાશીં ચ સમ્પ્રાપ્ય લભેન્મૃત્યું ન ચાન્યથા ॥ ૪૭॥

કાશીં પ્રાપ્ય નરો યસ્તુ ગઙ્ગાયાં સ્નાનમાચરેત્ ।
તદા ચ ક્રિયમાણસ્ય સઞ્ચિતસ્યાપિ સઙ્ક્ષયઃ ॥ ૪૮॥

પ્રારબ્ધં ન વિના ભોગં નશ્યતીતિ સુનિશ્ચિતમ્ ।
મૃતિશ્ચ તસ્ય સઞ્જાતા તદા તસ્ય ક્ષયો ભવેત્ ॥ ૪૯॥

પૂર્વં ચૈવ કૃતા કાશી પશ્ચાત્પાપં સમાચરેત્ ।
તદ્બીજેન બલવતા નીયતે કાશિકા પુનઃ ॥ ૫૦॥

તદા સર્વાણિ પાપાનિ ભસ્મસાચ્ચ ભવન્તિ હિ ।
તસ્માત્કાશીં નરઃ સેવેત્કર્મનિર્મૂલનીં ધ્રુવમ્ ॥ ૫૧॥

એકોઽપિ બ્રાહ્મણો યેન કાશ્યાં સંવાસિતઃ પ્રિયે ।
કાશીવાસમવાપ્યૈવ તતો મુક્તિં સ વિન્દતિ ॥ ૫૨॥

કાશ્યાં યો વૈ મૃતશ્ચૈવ તસ્ય જન્મ પુનર્ન હિ ।
સમુદ્દિશ્ય પ્રયાગે ચ મૃતસ્ય કામનાફલમ્ ॥ ૫૩॥

સંયોગશ્ચ તયોશ્ચેત્સ્યાત્કાશીજન્યં ફલં વૃથા ।
યદિ ન પ્રાપ્યતે તચ્ચ તીર્થરાજફલં વૃથા ॥ ૫૪॥

તસ્માન્મચ્છાસનાદ્વિષ્ણુઃ સૃષ્ટિં સાક્ષાદ્ધિ નૂતનામ્ ।
વિધાય મનસોદ્દિષ્ટાં તત્સિદ્ધિં યચ્છતિ ધ્રુવમ્ ॥ ૫૫॥

સૂત ઉવાચ ।
ઇત્યાદિ બહુમાહાત્મ્યં કાશ્યા વૈ મુનિસત્તમાઃ ।
તથા વિશ્વેશ્વરસ્યાપિ ભુક્તિમુક્તિપ્રદં સતામ્ ॥ ૫૬॥

અતઃ પરં પ્રવક્ષ્યામિ માહાત્મ્યં ત્ર્યમ્બકસ્ય ચ ।
યચ્છ્રુત્વા સર્વપાપેભ્યો મુચ્યતે માનવઃ ક્ષણાત્ ॥ ૫૭॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં કાશીવિશ્વેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૪.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૪. ચતુર્વિંશોઽધ્યાયઃ । ગૌતમપ્રભાવવર્ણનમ્ ।

સૂત ઉવાચ ।
શ્રૂયતામૃષયઃ શ્રેષ્ઠાઃ કથાં પાપપ્રણાશિનીમ્ ।
કથયામિ યથા વ્યાસાત્સદ્ગુરોશ્ચ શ્રુતા મયા ॥ ૧॥

પુરા ઋષિવરશ્ચાસીદ્ગૌતમો નામ વિશ્રુતઃ ।
અહલ્યા નામ તસ્યાસીત્પત્ની પરમધાર્મિકી ॥ ૨॥

દક્ષિણસ્યાં દિશિ હિ યો ગિરિર્બ્રહ્મેતિ સંજ્ઞકઃ ।
તત્ર તેન તપસ્તપ્તં વર્ષાણામયુતં તથા ॥ ૩॥

કદાચિચ્ચ હ્યનાવૃષ્ટિરભવત્તત્ર સુવ્રતાઃ ।
વર્ષાણાં ચ શતં રૌદ્રી લોકા દુઃખમુપાગતાઃ ॥ ૪॥

આર્દ્રં ચ પલ્લવં ન સ્મ દૃશ્યતે પૃથિવીતલે ।
કુતો જલં વિદૃશ્યેત જીવાનાં પ્રાણધારકમ્ ॥ ૫॥

તદા તે મુનયશ્ચૈવ મનુષ્યાઃ પશવસ્તથા ।
પક્ષિણશ્ચ મૃગાસ્તત્ર ગતાશ્ચૈવ દિશો દશ ॥ ૬॥

તાં દૃષ્ટ્વા ચર્ષયો વિપ્રાઃ પ્રાણાયામપરાયણાઃ ।
ધ્યાનેન ચ તદા કેચિત્કાલં નિન્યુઃ સુદારુણમ્ ॥ ૭॥

ગૌતમોઽપિ સ્વયં તત્ર વરુણાર્થે તપઃ શુભમ્ ।
ચકાર ચૈવ ષણ્માસં પ્રાણાયામપરાયણઃ ॥ ૮॥

તતશ્ચ વરુણસ્તસ્મૈ વરં દાતું સમાગતઃ ।
પ્રસન્નોઽસ્મિ વરં બ્રૂહિ દદામિ ચ વચોઽબ્રવીત્ ॥ ૯॥

તતશ્ચ ગૌતમસ્તં વૈ વૃષ્ટિં ચ પ્રાર્થયત્તદા ।
તતઃ સ વરુણસ્તં વૈ પ્રત્યુવાચ મુનિં દ્વિજાઃ ॥ ૧૦॥

વરુણ ઉવાચ ।
દેવાજ્ઞાં ચ સમુલ્લઙ્ઘ્ય કથં કુર્યામહં ચ તામ્ ।
અન્યત્પ્રાર્થય સુજ્ઞોઽસિ યદહં કરવાણિ તે ॥ ૧૧॥

સૂત ઉવાચ ।
ઇત્યેતદ્વચનં તસ્ય વરુણસ્ય મહાત્મનઃ ।
પરોપકારી તચ્છ્રુત્વા ગૌતમો વાક્યમબ્રવીત્ ॥ ૧૨॥

ગૌતમ ઉવાચ ।
યદિ પ્રસન્નો દેવેશ યદિ દેયો વરો મમ ।
યદહં પ્રાર્થયામ્યદ્ય કર્તવ્યં હિ ત્વયા તથા ॥ ૧૩॥

યતસ્ત્વં જલરાશીશસ્તસ્માદ્દેયં જલં મમ ।
અક્ષયં સર્વદેવેશ દિવ્યં નિત્યફલપ્રદમ્ ॥ ૧૪॥

સૂત ઉવાચ ।
ઇતિ સમ્પ્રાર્થિતસ્તેન વરુણો ગૌતમેન વૈ ।
ઉવાચ વચનં તસ્મૈ ગર્તશ્ચ ક્રિયતાં ત્વયા ॥ ૧૫॥

ઇત્યુક્તે ચ કૃતસ્તેન ગર્તો હસ્તપ્રમાણતઃ ।
જલેન પૂરિતસ્તેન દિવ્યેન વરુણેન સઃ ॥ ૧૬॥

અથોવાચ મુનિં દેવો વરુણો હિ જલાધિપઃ ।
ગૌતમં મુનિશાર્દૂલં પરોપકૃતિશાલિનમ્ ॥ ૧૭॥

વરુણ ઉવાચ ।
અક્ષયં ચ જલં તેઽસ્તુ તીર્થભૂતં મહામુને ।
તવ નામ્ના ચ વિખ્યાતં ક્ષિતાવેતદ્ભવિષ્યતિ ॥ ૧૮॥

અત્ર દત્તં હુતં તપ્તં સુરાણાં યજનં કૃતમ્ ।
પિતૃણાં ચ કૃતં શ્રાદ્ધં સર્વમેવાક્ષયં ભવેત્ ॥ ૧૯॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વાન્તર્દધે દેવઃ સ્તુતસ્તેન મહર્ષિણા ।
ગૌતમોઽપિ સુખં પ્રાપ કૃત્વાન્યોપકૃતિં મુનિઃ ॥ ૨૦॥

મહતો હ્યાશ્રયઃ પુંસાં મહત્ત્વાયોપજાયતે ।
મહાન્તસ્તત્સ્વરૂપં ચ પશ્યન્તિ નેતરેઽશુભાઃ ॥ ૨૧॥

યાદૃઙ્નરં ચ સેવેત તાદૃશં ફલમશ્નુતે ।
મહતઃ સેવયોચ્ચત્વં ક્ષુદ્રસ્ય ક્ષુદ્રતાં તથા ॥ ૨૨॥

સિંહસ્ય મન્દિરે સેવા મુક્તાફલકરી મતા ।
શ ૃગાલમન્દિરે સેવા ત્વસ્થિલાભકરી સ્મૃતા ॥ ૨૩॥

ઉત્તમાનાં સ્વભાવોઽયં પરદુઃખાસહિષ્ણુતા ।
સ્વયં દુઃખં ચ સમ્પ્રાપ્તં મન્યતેઽન્યસ્ય વાર્યતે ॥ ૨૪॥

વૃક્ષાશ્ચ હાટકં ચૈવ ચન્દનં ચેક્ષુકસ્તથા ।
એતે ભુવિ પરાર્થે ચ દક્ષા એવં ન કેચન ॥ ૨૫॥

દયાલુરમદસ્પર્શ ઉપકારી જિતેન્દ્રિયઃ ।
એતૈશ્ચ પુણ્યસ્તમ્ભૈસ્તુ ચતુર્ભિર્ધાર્યતે મહી ॥ ૨૬॥

તતશ્ચ ગૌતમસ્તત્ર જલં પ્રાપ્ય સુદુર્લભમ્ ।
નિત્યનૈમિત્તિકં કર્મ ચકાર વિધિવત્તદા ॥ ૨૭॥

તતો વ્રીહીન્ યવાંશ્ચૈવ નીવારાનપ્યનેકધા ।
વાપયામાસ તત્રૈવ હવનાર્થં મુનીશ્વરઃ ॥ ૨૮॥

ધાન્યાનિ વિવિધાનીહ વૃક્ષાશ્ચ વિવિધાસ્તથા ।
પુષ્પાણિ ચ ફલાન્યેવ હ્યાસંસ્તત્રાપ્યનેકશઃ ॥ ૨૯॥

તચ્છ્રુત્વા ઋષયશ્ચાન્યે તત્રાયાતાઃ સહસ્રશઃ ।
પશવઃ પક્ષિણશ્ચાન્યે જીવાશ્ચ બહવોઽગમન્ ॥ ૩૦॥

તદ્વનં સુન્દરં હ્યાસીત્પૃથિવ્યાં મણ્ડલે પરમ્ ।
તદક્ષયજલાયોગાદનાવૃષ્ટિર્ન દુઃખદા ॥ ૩૧॥

ઋષયોઽપિ વને તત્ર શુભકર્મપરાયણાઃ ।
વાસં ચક્રુરનેકે ચ શિષ્યભાર્યાસુતાન્વિતાઃ ॥ ૩૨॥

ધાન્યાનિ વાપયામાસુઃ કાલક્રમણહેતવે ।
આનન્દસ્તદ્વને હ્યાસીત્પ્રભાવાદ્ગૌતમસ્ય ચ ॥ ૩૩॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ત્ર્યમ્બકેશ્વરમાહાત્મ્યે ગૌતમપ્રભાવવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૪.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । ગૌતમવ્યવસ્થાવર્ણનમ્ ।

સૂત ઉવાચ ।
કદાચિદ્ગૌતમેનૈવ જલાર્થં પ્રેષિતા નિજાઃ ।
શિષ્યાસ્તત્ર ગતા ભક્ત્યા કમણ્ડલુકરા દ્વિજાઃ ॥ ૧॥

શિષ્યાન્ જલસમીપે તુ ગતાન્દૃષ્ટ્વા ન્યષેધયન્ ।
જલાર્થમાગતાસ્તત્ર ચર્ષિપત્ન્યોઽપ્યનેકશઃ ॥ ૨॥

ઋષિપત્ન્યો વયં પૂર્વં ગ્રહીષ્યામો વિદૂરતઃ ।
પશ્ચાચ્ચૈવ જલં ગ્રાહ્યમિત્યેવં પર્યભર્ત્સયન્ ॥ ૩॥

પરાવૃત્ય તદા તૈશ્ચ ઋષિપત્ન્યૈ નિવેદિતમ્ ।
સા ચાપિ તાન્સમાદાય સમાશ્વાસ્ય ચ તૈઃ સ્વયમ્ ॥ ૪॥

જલં નીત્વા દદૌ તસ્મૈ ગૌતમાય તપસ્વિની ।
નિત્યં નિર્વાહયામાસ જલેન ઋષિસત્તમઃ ॥ ૫॥

તાશ્ચૈવમૃષિપત્ન્યસ્તુ ક્રુદ્ધાસ્તાં પર્યભર્ત્સયન્ ।
પરાવૃત્ય ગતાઃ સર્વાસ્તૂટજાન્કુટિલાશયાઃ ॥ ૬॥

સ્વામ્યગ્રે વિપરીતં ચ તદ્વૃત્તં નિખિલં તતઃ ।

દુષ્ટાશયાભિઃ સ્ત્રીભિશ્ચ તાભિર્વૈ વિનિવેદિતમ્ ॥ ૭॥

અથ તાસાં વચઃ શ્રુત્વા ભાવિકર્મવશાત્તદા ।
ગૌતમાય ચ સઙ્ક્રુદ્ધાશ્ચાસંસ્તે પરમર્ષયઃ ॥ ૮॥

વિઘ્નાર્થં ગૌતમસ્યૈવ નાનાપૂજોપહારકૈઃ ।
ગણેશં પૂજયામાસુઃ સઙ્ક્રુદ્ધાસ્તે કુબુદ્ધયઃ ॥ ૯॥

આવિર્બભૂવ ચ તદા પ્રસન્નો હિ ગણેશ્વરઃ ।
ઉવાચ વચનં તત્ર ભક્તાધીનઃ ફલપ્રદઃ ॥ ૧૦॥

ગણેશ ઉવાચ ।
પ્રસન્નોઽસ્મિ વરં બ્રૂત યૂયં કિં કરવાણ્યહમ્ ।
તદીયં તદ્વચઃ શ્રુત્વા ઋષયસ્તેઽબ્રુવંસ્તદા ॥ ૧૧॥

ઋષય ઊચુઃ ।
ત્વયા યદિ વરો દેયો ગૌતમઃ સ્વાશ્રમાદ બહિઃ ।
નિષ્કાશ્યમાનો ઋષિભિઃ પરિભર્ત્સ્ય તથા કુરુ ॥ ૧૨॥

સૂત ઉવાચ ।
સ એવં પ્રાર્થિતસ્તૈસ્તુ વિહસ્ય વચનં પુનઃ ।
પ્રોવાચેભમુખઃ પ્રીત્યા બોધયંસ્તાન્સતાં ગતિઃ ॥ ૧૩॥

ગણેશ ઉવાચ ।
શ્રૂયતામૃષયઃ સર્વે યુક્તં ન ક્રિયતેઽધુના ।
અપરાધં વિના તસ્મૈ ક્રુધ્યતાં હાનિરેવ ચ ॥ ૧૪॥

ઉપસ્કૃતં પુરા યૈસ્તુ તેભ્યો દુઃખં હિતં ન હિ ।
યદા ચ દીયતે દુઃખં તદા નાશો ભવેદિહ ॥ ૧૫॥

ઈદૃશં ચ તપઃ કૃત્વા સાધ્યતે ફલમુત્તમમ્ ।
શુભં ફલં સ્વયં હિત્વા સાધ્યતે નાહિતં પુનઃ ॥ ૧૬॥

સૂત ઉવાચ ।
ઇત્યેવં વચનં શ્રુત્વા તસ્ય તે મુનિસત્તમાઃ ।
બુદ્ધિમોહં તદા પ્રાપ્તા ઇદમેવ વચોઽબ્રુવન્ ॥ ૧૭॥

ઋષય ઊચુઃ ॥

કર્તવ્યં હિ ત્વયા સ્વામિન્નિદમેવ ન ચાન્યથા ।

ઇત્યુક્તસ્તુ તદા દેવો ગણેશો વાક્યમબ્રવીત્ ॥ ૧૮॥

ગણેશ ઉવાચ ।
અસાધુઃ સાધુતાં ચૈવ સાધુશ્ચાસાધુતાં તથા ।
કદાચિદપિ નાપ્નોતિ બ્રહ્મોક્તમિતિ નિશ્ચિતમ્ ॥ ૧૯॥

યદા ચ ભવતાં દુઃખં જાતં ચાનશનાત્પુરા ।
તદા સુખં પ્રદત્તં વૈ ગૌતમેન મહર્ષિણા ॥ ૨૦॥

ઇદાનીં વૈ ભવદ્ભિશ્ચ તસ્મૈ દુઃખં પ્રદીયતે ।
નૈતદ્યુક્તતમં લોકે સર્વથા સુવિચાર્યતામ્ ॥ ૨૧॥

સ્ત્રીબલાન્મોહિતા યૂયં ન મે વાક્યં કરિષ્યથ ।
એતદ્ધિતતમં તસ્ય ભવિષ્યતિ ન સંશયઃ ॥ ૨૨॥

પુનશ્ચાયમૃષિશ્રેષ્ઠો દાસ્યતે વઃ સુખં ધ્રુવમ્ ।
તારણં ન ચ યુક્તં સ્યાદ્વરમન્યં વૃણીત વૈ ॥ ૨૩॥

સૂત ઉવાચ ।
ઇત્યેવં વચનં તેન ગણેશેન મહાત્મના ।
યદ્યપ્યુક્તમૃષિભ્યશ્ચ તદપ્યેતે ન મેનિરે ॥ ૨૪॥

ભક્તાધીનતયા સોઽથ શિવપુત્રોઽબ્રવીત્તદા ।
ઉદાસીનેન મનસા તાનૃષીન્દુષ્ટશેમુષીન્ ॥ ૨૫॥

ગણેશ ઉવાચ ।
ભવદ્ભિઃ પ્રાર્થ્યતે યચ્ચ કરિષ્યેઽહં તથા ખલુ ।
પશ્ચાદ્ભાવિ ભવેદેવ ઇત્યુક્ત્વાન્તર્દધે પુનઃ ॥ ૨૬॥

ગૌતમઃ સ ન જાનાતિ મુનીનાં વૈ દુરાશયમ્ ।
આનન્દમનસા નિત્યં પત્ન્યા કર્મ ચકાર તત્ ॥ ૨૭॥

તદન્તરે ચ યજ્જાતં ચરિત્રં વરયોગતઃ ।
તદ્દુષ્ટર્ષિપ્રભાવાત્તુ શ્રૂયતાં તન્મુનીશ્વરાઃ ॥ ૨૮॥

ગૌતમસ્ય ચ કેદારે તત્રાસન્વ્રીહયો યવાઃ ।
ગણેશસ્તત્ર ગૌર્ભૂત્વા જગામ કિલ દુર્બલા ॥ ૨૯॥

કમ્પમાના ચ સા ગત્વા તત્ર તદ્વરયોગતઃ ।
વ્રીહીન્સમ્ભક્ષયામાસ યવાંશ્ચ મુનિસત્તમાઃ ॥ ૩૦॥

એતસ્મિન્નન્તરે દૈવાદ્ ગૌતમસ્તત્ર ચાગતઃ ।
સ દયાલુસ્તૃણસ્તમ્બૈર્વારયામાસ તાં તદા ॥ ૩૧॥

તૃણસ્તમ્બેન સા સ્પૃષ્ટા પપાત પૃથિવીતલે ।
મૃતા ચ તત્ક્ષણાદેવ તદૃષેઃ પશ્યતસ્તદા ॥ ૩૨॥

ઋષયશ્છન્નરૂપાસ્તે ઋષિપત્ન્યસ્તથાશુભાઃ ।
ઊચુસ્તત્ર તદા સર્વે કિં કૃતં ગૌતમેન ચ ॥ ૩૩॥

ગૌતમોઽપિ તથાહલ્યામાહૂયાસીત્સુવિસ્મિતઃ ।
ઉવાચ દુઃખતો વિપ્રા દૂયમાનેન ચેતસા ॥ ૩૪॥

ગૌતમ ઉવાચ ।
કિં જાતં ચ કથં દેવિ કુપિતઃ પરમેશ્વરઃ ।
કિં કર્તવ્યં ક્વ ગન્તવ્યં હત્યા ચ સમુપસ્થિતા ॥ ૩૫॥

સૂત ઉવાચ ।
એતસ્મિન્નન્તરે વિપ્રા ગૌતમં પર્યભર્ત્સયન્ ।
વિપ્રપત્ન્યસ્તથાહલ્યાં દુર્વચોભિર્વ્યથાં દદુઃ ॥ ૩૬॥

દુર્બુદ્ધયશ્ચ તચ્છિષ્યાઃ સુતાસ્તેષાં તથૈવ ચ ।
ગૌતમં પરિભર્ત્સ્યૈવ પ્રત્યૂચુર્ધિગ્વચો મુહુઃ ॥ ૩૭॥

ઋષય ઊચુઃ ।
મુખં ન દર્શનીયં તે ગમ્યતાં ગમ્યતામિતિ ।
દૃષ્ટ્વા ગોઘ્નમુખં સદ્યઃ સચૈલં સ્નાનમાચરેત્ ॥ ૩૮॥

યાવદાશ્રમમધ્યે ત્વં તાવદેવ હવિર્ભુજઃ ।
પિતરશ્ચ ન ગૃહ્ણન્તિ હ્યસ્મદ્દત્તં હિ કિઞ્ચન ॥ ૩૯॥

તસ્માદ્ગચ્છાન્યતસ્ત્વં ચ પરિવારસમન્વિતઃ ।
વિલમ્બં કુરુ નૈવ ત્વં ધેનુહન્પાપકારક ॥ ૪૦॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા તે ચ તં સર્વે પાષાણૈઃ સમતાડયન્ ।
વ્યથાં દદુરતીવાસ્મૈ ત્વહલ્યાં ચ દુરુક્તિભિઃ ॥ ૪૧॥

તાડિતો ભર્ત્સિતો દુષ્ટૈર્ગૌતમો ગિરમબ્રવીત્ ।
ઇતો ગચ્છામિ મુનયો હ્યન્યત્ર નિવસામ્યહમ્ ॥ ૪૨॥

ઇત્યુક્ત્વા ગૌતમસ્તસ્માત્સ્થાનાચ્ચ નિર્ગતસ્તદા ।
ગત્વા ક્રોશં તદા ચક્રે હ્યાશ્રમં તદનુજ્ઞયા ॥ ૪૩॥

યાવચ્ચૈવાભિશાપો વૈ તાવત્કાર્યં ન કિઞ્ચન ।
ન કર્મણ્યધિકારોઽસ્તિ દૈવે પિત્ર્યેઽથ વૈદિકે ॥ ૪૪॥

માસાર્ધં ચ તતો નીત્વા મુનીન્સમ્પ્રાર્થયત્તદા ।
ગૌતમો મુનિવર્યઃ સ તેન દુઃખેન દુખિતઃ ॥ ૪૫॥

ગૌતમ ઉવાચ ।
અનુકમ્પ્યો ભવદ્ભિશ્ચ કથ્યતાં ક્રિયતે મયા ।
યથા મદીયં પાપં ચ ગચ્છત્વિતિ નિવેદ્યતામ્ ॥ ૪૬॥

સૂત ઉવાચ ।
ઇત્યુક્તાસ્તે તદા વિપ્રા નોચુશ્ચૈવ પરસ્પરમ્ ।
અત્યન્તં સેવયા પૃષ્ટા મિલિતા હ્યેકતઃ સ્થિતાઃ ॥ ૪૭॥

ગૌતમો દૂરતઃ સ્થિત્વા નત્વા તાનૃષિસત્તમાન્ ।
પપ્રચ્છ વિનયાવિષ્ટઃ કિં કાર્યં હિ મયાધુના ॥ ૪૮॥

ઇત્યુક્તે મુનિના તેન ગૌતમેન મહાત્મના ।
મિલિતાઃ સકલાસ્તે વૈ મુનયો વાક્યમબ્રુવન્ ॥ ૪૯॥

ઋષય ઊચુઃ ।
નિષ્કૃતિં હિ વિના શુદ્ધિર્જાયતે ન કદાચન ।
તસ્માત્ત્વં દેહશુદ્ધ્યર્થં પ્રાયશ્ચિત્તં સમાચર ॥ ૫૦॥

ત્રિવારં પૃથિવીં સર્વાં ક્રમ પાપં પ્રકાશયન્ ।
પુનરાગત્ય ચાત્રૈવ ચર માસવ્રતં તથા ॥ ૫૧॥

શતમેકોત્તરં ચૈવ બ્રહ્મણોઽસ્ય ગિરેસ્તથા ।
પ્રક્રમણં વિધાયૈવં શુદ્ધિસ્તે ચ ભવિષ્યતિ ॥ ૫૨॥

અથવા ત્વં સમાનીય ગઙ્ગાસ્નાનં સમાચર ।
પાર્થિવાનાં તથા કોટિં કૃત્વા દેવં નિષેવય ॥ ૫૩॥

ગઙ્ગાયાં ચ તતઃ સ્નાત્વા પુતશ્ચૈવ ભવિષ્યસિ ।
પુરા દશ તથા ચૈકં ગિરેસ્ત્વં ક્રમણં કુરુ ॥ ૫૪॥

શતકુમ્ભૈસ્તથા સ્નાત્વા પાર્થિવં નિષ્કૃતિર્ભવેત્ ।

ઇતિ તૈરૃષિભિઃ પ્રોક્તસ્તથેત્યોમિતિ તદ્વચઃ ॥ ૫૫॥

પાર્થિવાનાં તથા પૂજાં ગિરેઃ પ્રક્રમણં તથા ।
કરિષ્યામિ મુનિશ્રેષ્ઠા આજ્ઞયા શ્રીમતામિહ ॥ ૫૬॥

ઇત્યુક્ત્વા સર્ષિવર્યશ્ચ કૃત્વા પ્રક્રમણં ગિરેઃ ।
પૂજયામાસ નિર્માય પાર્થિવાન્મુનિસત્તમઃ ॥ ૫૭॥

અહલ્યા ચ તતઃ સાધ્વી તચ્ચ સર્વં ચકાર સા ।
શિષ્યાશ્ચ પ્રતિશિષ્યાશ્ચ ચક્રુઃ સેવાં તયોસ્તદા ॥ ૫૮॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ગૌતમવ્યવસ્થાવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૪.૨૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૬. ષડ્વિંશોઽધ્યાયઃ । ત્ર્યમ્બકેશ્વરમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
એવં કૃતે તુ ઋષિણા સસ્ત્રીકેન દ્વિજાઃ શિવઃ ।
આવિર્બભૂવ સશિવઃ પ્રસન્નઃ સગણસ્તદા ॥ ૧॥

અથ પ્રસન્નઃ સશિવો વરં બ્રૂહિ મહામુને ।
પ્રસન્નોઽહં સુભક્ત્યા ત ઇત્યુવાચ કૃપાનિધિઃ ॥ ૨॥

તદા તત્સુન્દરં રૂપં દૃષ્ટ્વા શમ્ભોર્મહાત્મનઃ ।
પ્રણમ્ય શઙ્કરં ભક્ત્યા સ્તુતિં ચક્રે મુદાન્વિતઃ ॥ ૩॥

સ્તુત્વા બહુ પ્રણમ્યેશં બદ્ધાઞ્જલિપુટઃ સ્થિતઃ ।
નિષ્પાપં કુરુ માં દેવાબ્રવીદિતિ સ ગૌતમઃ ॥ ૪॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય ગૌતમસ્ય મહાત્મનઃ ।
સુપ્રસન્નતરો ભૂત્વા શિવો વાક્યમુપાદદે ॥ ૫॥

શિવ ઉવાચ ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ નિષ્પાપોઽસિ સદા મુને ।

એતૈર્દુષ્ટૈઃ કિલ ત્વં ચ છલિતોઽસિ ખલાત્મભિઃ ॥ ૬॥

ત્વદીયદર્શનાલ્લોકા નિષ્પાપાશ્ચ ભવન્તિ હિ ।
કિં પુનસ્ત્વં સપાપોઽસિ મદ્ભક્તિનિરતઃ સદા ॥ ૭॥

ઉપદ્રવસ્ત્વયિ મુને યૈઃ કૃતસ્તુ દુરાત્મભિઃ ।
તે પાપાશ્ચ દુરાચારા હત્યાવન્તસ્ત એવ હિ ॥ ૮॥

એતેષાં દર્શનાદન્યે પાપિષ્ઠાઃ સમ્ભવન્તુ ચ ।
કૃતઘ્નાશ્ચ તથા જાતા નૈતેષાં નિષ્કૃતિઃ ક્વચિત્ ॥ ૯॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા શઙ્કરસ્તસ્મૈ તેષાં દુશ્ચરિતં તદા ।
બહૂવાચ પ્રભુર્વિપ્રાઃ સત્કદોઽસત્સુ દણ્ડદઃ ॥ ૧૦॥

શર્વોક્તમિતિ સ શ્રુત્વા સુવિસ્મિતમના ઋષિઃ ।
સુપ્રણમ્ય શિવં ભક્ત્યા સાઞ્જલિઃ પુનરબ્રવીત્ ॥ ૧૧॥

ગૌતમ ઉવાચ ।
ઋષિભિસ્તૈર્મહેશાન હ્યુપકારઃ કૃતો મહાન્ ।
યદ્યેવં ન કૃતં તૈસ્તુ દર્શનં તે કુતો ભવેત્ ॥ ૧૨॥

ધન્યાસ્તે ઋષયો યૈસ્તુ મહ્યં શુભતરં કૃતમ્ ।
તદ્દુરાચરણાદેવ મમ સ્વાર્થો મહાનભૂત્ ॥ ૧૩॥

સૂત ઉવાચ ।
ઇત્યેવં તદ્વચઃ શ્રુત્વા સુપ્રસન્નો મહેશ્વરઃ ।
ગૌતમં પ્રત્યુવાચાશુ કૃપાદૃષ્ટ્યા વિલોક્ય ચ ॥ ૧૪॥

શિવ ઉવાચ ।
ઋષિર્ધન્યોઽસિ વિપ્રેન્દ્ર ઋષિશ્રેષ્ઠતરોઽસિ વૈ ।
જ્ઞાત્વા માં સુપ્રસન્નં હિ વૃણુ ત્વં વરમુત્તમમ્ ॥ ૧૫॥

સૂત ઉવાચ ।
ગૌતમોઽપિ વિચાર્યૈવં લોકે વિશ્રુતમિત્યુત ।
અન્યથા ન ભવેદેવ તસ્માદુક્તં સમાચરેત્ ॥ ૧૬॥

નિશ્ચિત્યૈવં મુનિશ્રેષ્ઠો ગૌતમઃ શિવભક્તિમાન્ ।
સાઞ્જલિર્નતશીર્ષો હિ શઙ્કરં વાક્યમબ્રવીત્ ॥ ૧૭॥

ગૌતમ ઉવાચ ।
સત્યં નાથ બ્રવીષિ ત્વં તથાપિ પઞ્ચભિઃ કૃતમ્ ।
નાન્યથા ભવતીત્યત્ર યજ્જાતં જાયતાં તુ તત્ ॥ ૧૮॥

યદિ પ્રસન્નો દેવેશ ગઙ્ગા ચ દીયતાં મમ ।
કુરુ લોકોપકારં હિ નમસ્તેઽસ્તુ નમોઽસ્તુ તે ॥ ૧૯॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા વચનં તસ્ય ધૃત્વા વૈ પાદપઙ્કજમ્ ।
નમશ્ચકાર દેવેશં ગૌતમો લોકકામ્યયા ॥ ૨૦॥

તતસ્તુ શઙ્કરો દેવઃ પૃથિવ્યાશ્ચ દિવશ્ચ સઃ ।
સારં ચૈવ સમુદ્ધૃત્ય રક્ષિતં પૂર્વમેવ તત્ ॥ ૨૧॥

વિવાહે બ્રહ્મણા દત્તમવશિષ્ટં ચ કિઞ્ચન ।
તત્તસ્મૈ દત્તવાન્ શમ્ભુર્મુનયે ભક્તવત્સલઃ ॥ ૨૨॥

ગઙ્ગાજલં તદા તત્ર સ્ત્રીરૂપમભવત્પરમ્ ।
તસ્યાશ્ચૈવ ઋષિશ્રેષ્ઠઃ સ્તુતિં કૃત્વા નતિં વ્યધાત્ ॥ ૨૩॥

ગૌતમ ઉવાચ ।
ધન્યાસિ કૃતકૃત્યાસિ પાવિતં ભુવનં ત્વયા ।
માં ચ પાવય ગઙ્ગે ત્વં પતન્તં નિરયે ધ્રુવમ્ ॥ ૨૪॥

સૂત ઉવાચ ।
શમ્ભુશ્ચાપિ તદોવાચ સર્વેષાં હિતકૃચ્છૃણુ ।
ગઙ્ગે ગૌતમમેનં ત્વં પાવયસ્વ મદાજ્ઞયા ॥ ૨૫॥

ઇતિ શ્રુત્વા વચસ્તસ્ય શમ્ભોશ્ચ ગૌતમસ્ય ચ ।
ઉવાચૈવ શિવં ગઙ્ગા શિવશક્તિર્હિ પાવની ॥ ૨૬॥

ગઙ્ગોવાચ ।
ઋષિં તુ પાવયિત્વાહં પરિવારયુતં પ્રભો ।
ગમિષ્યામિ નિજસ્થાનં વચઃ સત્યં બ્રવીમિ હ ॥ ૨૭॥

સૂત ઉવાચ ।
ઇત્યુક્તં ગઙ્ગયા તત્ર મહેશો ભક્તવત્સલઃ ।
લોકોપકરણાર્થાય પુનર્ગઙ્ગાં વચોઽબ્રવીત્ ॥ ૨૮॥

શિવ ઉવાચ ।
ત્વયા સ્થાતવ્યમત્રૈવાવ્રજેદ્યાવત્કલિર્યુગઃ ।
વૈવસ્વતો મનુર્દેવિ હ્યષ્ટાવિંશત્તમો ભવેત્ ॥ ૨૯॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય સ્વામિનઃ શઙ્કરસ્ય તત્ ।
પ્રત્યુવાચ પુનર્ગઙ્ગા પાવની સા સરિદ્વરા ॥ ૩૦॥

ગઙ્ગોવાચ ।
માહાત્મ્યમધિકં ચેત્સ્યાન્મમ સ્વામિન્મહેશ્વર ।
સર્વેભ્યશ્ચ તદા સ્થાસ્યે ધરાયાં ત્રિપુરાન્તક ॥ ૩૧॥

કિઞ્ચાન્યચ્ચ શ‍ૃણુ સ્વામિન્વપુષા સુન્દરેણ હ ।
તિષ્ઠ ત્વં મત્સમીપે વૈ સગણઃ સામ્બિકઃ પ્રભો ॥ ૩૨॥

સૂત ઉવાચ ।
એવં તસ્યા વચઃ શ્રુત્વા શઙ્કરો ભક્તવત્સલઃ ।
લોકોપકરણાર્થાય પુનર્ગઙ્ગાં વચોઽબ્રવીત્ ॥ ૩૩॥

શિવ ઉવાચ ।
ધન્યાસિ શ્રૂયતાં ગઙ્ગે હ્યહં ભિન્નસ્ત્વયા ન હિ ।
તથાપિ સ્થીયતે હ્યત્ર સ્થીયતાં ચ ત્વયાપિ હિ ॥ ૩૪॥

સૂત ઉવાચ ।
ઇત્યેવં વચનં શ્રુત્વા સ્વામિનઃ પરમેશિતુઃ ।
પ્રસન્નમાનસા ભૂત્વા ગઙ્ગા ચ પ્રત્યપૂજયત્ ॥ ૩૫॥

એતસ્મિન્નન્તરે દેવા ઋષયશ્ચ પુરાતનાઃ ।
સુતીર્થાન્યપ્યનેકાનિ ક્ષેત્રાણિ વિવિધાનિ ચ ॥ ૩૬॥

આગત્ય ગૌતમં સર્વે ગઙ્ગાં ચ ગિરિશં તથા ।
જય જયેતિ ભાષન્તઃ પૂજયામાસુરાદરાત્ ॥ ૩૭॥

તતસ્તે નિર્જરાઃ સર્વે તેષાં ચક્રુઃ સ્તુતિં મુદા ।
કરાન્ બધ્વા નતસ્કન્ધા હરિબ્રહ્માદયસ્તદા ॥ ૩૮॥

ગઙ્ગા પ્રસન્ના તેભ્યશ્ચ ગિરિશશ્ચોચતુસ્તદા ।
વરં બ્રૂત સુરશ્રેષ્ઠા દદ્વો વઃ પ્રિયકામ્યયા ॥ ૩૯॥

દેવા ઊચુઃ ।
યદિ પ્રસન્નો દેવેશ પ્રસન્ના ત્વં સરિદ્વરે ।
સ્થાતવ્યમત્ર કૃપયા નઃ પ્રિયાર્થં તથા નૃણામ્ ॥ ૪૦॥

ગઙ્ગોવાચ ।
યૂયં સર્વપ્રિયાર્થં ચ તિષ્ઠથાત્ર ન કિં પુનઃ ।
ગૌતમં ક્ષાલયિત્વાહં ગમિષ્યામિ યથાગતમ્ ॥ ૪૧॥

ભવત્સુ મે વિશેષોઽત્ર જ્ઞેયશ્ચૈવ કથં સુરાઃ ।
તત્પ્રમાણં કૃતં ચેત્સ્યાત્તદા તિષ્ઠામ્યસંશયમ્ ॥ ૪૨॥

સર્વે ઊચુઃ ।
સિંહરાશૌ યદા સ્યાદ્વૈ ગુરુઃ સર્વસુહૃત્તમઃ ।
તદા વયં ચ સર્વે ત્વાગમિષ્યામો ન સંશયઃ ॥ ૪૩॥

એકાદશ ચ વર્ષાણિ લોકાનાં પાતકં ત્વિહ ।
ક્ષાલિતં યદ્ભવેદેવં મલિનાઃ સ્મઃ સરિદ્વરે ॥ ૪૪॥

તસ્યૈવ ક્ષાલનાય ત્વાયાસ્યામઃ સર્વથા પ્રિયે ।
ત્વત્સકાશં મહાદેવિ પ્રોચ્યતે સત્યમાદરાત્ ॥ ૪૫॥

અનુગ્રહાય લોકાનામસ્માકં પ્રિયકામ્યયા ।
સ્થાતવ્યં શઙ્કરેણાપિ ત્વયા ચૈવ સરિદ્વરે ॥ ૪૬॥

યાવત્સિંહે ગુરુશ્ચૈવ સ્થાસ્યામસ્તાવદેવ હિ ।
ત્વયિ સ્નાનં ત્રિકાલં ચ શઙ્કરસ્ય ચ દર્શનમ્ ॥ ૪૭॥

કૃત્વા સ્વપાપં નિખિલં વિમોક્ષ્યામો ન સંશયઃ ।
સ્વદેશાંશ્ચ ગમિષ્યામો ભવચ્છાસનતો વયમ્ ॥ ૪૮॥

સૂત ઉવાચ ।
ઇત્યેવં પ્રાર્થિતસ્તૈસ્તુ ગૌતમેન મહર્ષિણા ।
સ્થિતોઽસૌ શઙ્કરઃ પ્રીત્યા સ્થિતા સા ચ સરિદ્વરા ॥ ૪૯॥

સા ગઙ્ગા ગૌતમી નામ્ના લિઙ્ગં ત્ર્યમ્બકમીરિતમ્ ।
ખ્યાતાખ્યાતં બભૂવાથ મહાપાતકનાશનમ્ ॥ ૫૦॥

તદ્દિનં હિ સમારભ્ય સિંહસ્થે ચ બૃહસ્પતૌ ।
આયાન્તિ સર્વતીર્થાનિ ક્ષેત્રાણિ દૈવતાનિ ચ ॥ ૫૧॥

સરાંસિ પુષ્કરાદીનિ ગઙ્ગાદ્યાઃ સરિતસ્તથા ।
વાસુદેવાદયો દેવાઃ સન્તિ વૈ ગૌતમીતટે ॥ ૫૨॥

યાવત્તત્ર સ્થિતાનીહ તાવત્તેષાં ફલં ન હિ ।
સ્વપ્રદેશે સમાયાતાસ્તર્હ્યેતેષાં ફલં ભવેત્ ॥ ૫૩॥

જ્યોતિર્લિઙ્ગમિદં પ્રોક્તં ત્ર્યમ્બકં નામ વિશ્રુતમ્ ।
સ્થિતં તટે હિ ગૌતમ્યા મહાપાતકનાશનમ્ ॥ ૫૪॥

યઃ પશ્યેદ્ભક્તિતો જ્યોતિર્લિઙ્ગં ત્ર્યમ્બકનામકમ્ ।
પૂજયેત્પ્રણમેત્સ્તુત્વા સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૫૫॥

જ્યોતિર્લિઙ્ગં ત્ર્યમ્બકં હિ પૂજિતં ગૌતમેન હ ।
સર્વકામપ્રદં ચાત્ર પરત્ર પરમુક્તિદમ્ ॥ ૫૬॥

ઇતિ વશ્ચ સમાખ્યાતં યત્પૃષ્ટોઽહં મુનીશ્વરાઃ ।
કિમન્યદિચ્છથ શ્રોતું તદ્ બ્રૂયાં વો ન સંશયઃ ॥ ૫૭॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ત્ર્યમ્બકેશ્વરમાહાત્મ્યવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૪.૨૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૭. સપ્તવિંશોઽધ્યાયઃ । ત્ર્યમ્બકેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનમ્ ।

ઋષય ઊચુઃ ।
ગઙ્ગા ચ જલરૂપેણ કુતો જાતા વદ પ્રભો ।
તન્માહાત્મ્યં વિશેષેણ કુતો જાતં વદ પ્રભો ॥ ૧॥

યૈર્વિપ્રૈર્ગૌતમાયૈવ દુઃખં દત્તં દુરાત્મભિઃ ।
તેષાં કિં ચ તતો જાતમુચ્યતાં વ્યાસસદ્ગુરો ॥ ૨॥

સૂત ઉવાચ ।
એવં સમ્પ્રાર્થિતા ગઙ્ગા ગૌતમેન તદા સ્વયમ્ ।
બ્રહ્મણશ્ચ ગિરેર્વિપ્રા દ્રુતં તસ્માદવાતરત્ ॥ ૩॥

ઔદુમ્બરસ્ય શાખાયાસ્તત્પ્રવાહો વિનિઃસૃતઃ ।

તત્ર સ્નાનં મુદા ચક્રે ગૌતમો વિશ્રુતો મુનિઃ ॥ ૪॥

ગૌતમસ્ય ચ યે શિષ્યા અન્યે ચૈવ મહર્ષયઃ ।
સમાગતાશ્ચ તે તત્ર સ્નાનં ચક્રુર્મુદાન્વિતાઃ ॥ ૫॥

ગઙ્ગાદ્વારં ચ તન્નામ પ્રસિદ્ધમભવત્તદા ।
સર્વપાપહરં રમ્યં દર્શનાન્મુનિસત્તમાઃ ॥ ૬॥

ગૌતમસ્પર્દ્ધિનસ્તે ચ ઋષયસ્તત્ર ચાગતાઃ ।
સ્નાનાર્થં તાંશ્ચ સા દૃષ્ટ્વા હ્યન્તર્ધાનં ગતા દ્રુતમ્ ॥ ૭॥

મા મેતિ ગૌતમસ્તત્ર વ્યાજહાર વચો દ્રુતમ્ ।
મુહુર્મુહુઃ સ્તુવન્ ગઙ્ગાં સાઞ્જલિર્નતમસ્તકઃ ॥ ૮॥

ગૌતમ ઉવાચ ।
ઇમે ચ શ્રીમદાન્ધાશ્ચ સાધવો વાપ્યસાધવઃ ।
એતત્પુણ્યપ્રભાવેણ દર્શનં દીયતાં ત્વયા ॥ ૯॥

સૂત ઉવાચ ।
તતો વાણી સમુત્પન્ના ગઙ્ગાયા વ્યોમમણ્ડલાત્ ।
તચ્છૃણુધ્વમૃષિશ્રેષ્ઠા ગઙ્ગાવચનમુત્તમમ્ ॥ ૧૦॥

એતે દુષ્ટતમાશ્ચૈવ કૃતઘ્નાઃ સ્વામિદ્રોહિણઃ ।
જાલ્માઃ પાખણ્ડિનશ્ચૈવ દ્રષ્ટું વર્જ્યાશ્ચ સર્વદા ॥ ૧૧॥

ગૌતમ ઉવાચ ।
માતશ્ચ શ્રૂયતામેતન્મહતાં ગિર એવ ચ ।
તસ્માત્ત્વયા ચ કર્ત્તવ્યં સત્યં ચ ભગવદ્ વચઃ ॥ ૧૨॥

અપકારિષુ યો લોક ઉપકારં કરોતિ વૈ ।
તેન પૂતો ભવામ્યત્ર ભગવદ્વચનં ત્વિદમ્ ॥ ૧૩॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા મુનેર્વાક્યં ગૌતમસ્ય મહાત્મનઃ ।
પુનર્વાણી સમુત્પન્ના ગઙ્ગાયા વ્યોમમણ્ડલાત્ ॥ ૧૪॥

કથ્યતે હિ ત્વયા સત્યં ગૌતમર્ષે શિવં વચઃ ।
તથાપિ સઙ્ગ્રહાર્થં ચ પ્રાયશ્ચિત્તં ચરન્તુ વૈ ॥ ૧૫॥

શતમેકોત્તરં ચાત્ર કાર્યં પ્રક્રમણં ગિરેઃ ।

ભવચ્છાસનતસ્ત્વેતૈસ્ત્વદધીનૈર્વિશેષતઃ ॥ ૧૬॥

તતશ્ચૈવાધિકારશ્ચ જાયતે દુષ્ટકારિણામ્ ।
મદ્દર્શને વિશેષેણ સત્યમુક્તં મયા મુને ॥ ૧૭॥

ઇતિ શ્રુત્વા વચસ્તસ્યાશ્ચક્રુર્વૈ તે તથાખિલાઃ ।
સમ્પ્રાર્થ્ય ગૌતમં દીનાઃ ક્ષન્તવ્યો નોઽપરાધકઃ ॥ ૧૮॥

એવં કૃતે તદા તેન ગૌતમેન તદાજ્ઞયા ।
કુશાવર્તં નામ ચક્રે ગઙ્ગાદ્વારાદધોગતમ્ ॥ ૧૯॥

તતઃ પ્રાદુરભૂત્તત્ર સા તસ્ય પ્રીતયે પુનઃ ।
કુશાવર્તં ચ વિખ્યાતં તીર્થમાસીદનુત્તમમ્ ॥ ૨૦॥

તત્ર સ્નાતો નરો યસ્તુ મોક્ષાય પરિકલ્પતે ।
ત્યક્ત્વા સર્વાનઘાન્સદ્યો વિજ્ઞાનં પ્રાપ્ય દુર્લભમ્ ॥ ૨૧॥

ગૌતમો ઋષયશ્ચાન્યે મિલિતાશ્ચ પરસ્પરમ્ ।
લજ્જિતાસ્તે તદા યે ચ કૃતઘ્ના હ્યભવન્પુરા ॥ ૨૨॥

ઋષય ઊચુઃ ॥

અસ્માભિરન્યથા સૂત શ્રુતં તદ્વર્ણયામહે ।
ગૌતમસ્તાન્દ્વિજાન્ ક્રુદ્ધઃ શશાપેતિ પ્રબુધ્યતામ્ ॥ ૨૩॥

સૂત ઉવાચ ।
દ્વિજાસ્તદપિ સત્યં વૈ કલ્પભેદસમાશ્રયાત્ ।
વર્ણયામિ વિશેષેણ તાં કથામપિ સુવ્રતાઃ ॥ ૨૪॥

ગૌતમોઽપિ ઋષીન્દૃષ્ટ્વા તદા દુર્ભિક્ષપીડિતાન્ ।
તપશ્ચકાર સુમહદ્વરુણસ્ય મહાત્મનઃ ॥ ૨૫॥

અક્ષય્યં કલ્પયામાસ જલં વરુણદાયયા ।
તતો વ્રીહીન્ યવાંશ્ચૈવ વાપયામાસ ભૂરિશઃ ॥ ૨૬॥

એવં પરોપકારી સ ગૌતમો મુનિસત્તમઃ ।
આહારં કલ્પયામાસ તેભ્યઃ સ્વતપસો બલાત્ ॥ ૨૭॥

કદાચિત્તત્સ્ત્રિયો દુષ્ટા જલાર્થમપમાનિતાઃ ।
ઊચુઃ પતિભ્યસ્તાઃ ક્રુદ્ધા ગૌતમેર્ષ્યાકરં વચઃ ॥ ૨૮॥

તતસ્તે ભિન્નમતયો ગાં કૃત્વા કૃત્રિમાં દ્વિજાઃ ।
તદ્ધાન્યભક્ષણાસક્તાં ચક્રુસ્તાં કુટિલાશયાઃ ॥ ૨૯॥

સ્વધાન્યભક્ષણાસક્તાં ગાં દૃષ્ટ્વા ગૌતમસ્તદા ।
તૃણેન તાડયામાસ શનૈસ્તાં સન્નિવારયન્ ॥ ૩૦॥

તૃણસંસ્પર્શમાત્રેણ સા ભૂમૌ પતિતા ચ ગૌઃ ।
મૃતા હ્યભૂત્ક્ષણં વિપ્રા ભાવિકર્મવશાત્તદા ॥ ૩૧॥

ગૌર્હતા ગૌતમેનેતિ તદા તે કુટિલાશયાઃ ।
એકત્રીભૂય તત્રત્યાઃ સકલા ઋષયોઽવદન્ ॥ ૩૨॥

તતઃ સ ગૌતમો ભીતો ગૌર્હતેતિ બભૂવ હ ।
ચકાર વિસ્મયં નાર્યહલ્યાશિષ્યૈઃ શિવાનુગઃ ॥ ૩૩॥

તતઃ સ ગૌતમો જ્ઞાત્વા તાં ગાં ક્રોધસમાકુલઃ ।
શશાપ તાનૃષીન્ સર્વાન્ ગૌતમો મુનિસત્તમઃ ॥ ૩૪॥

ગૌતમ ઉવાચ ।
યૂયં સર્વે દુરાત્માનો દુઃખદા મે વિશેષતઃ ।
શિવભક્તસ્ય સતતં સ્યુર્વેદવિમુખાઃ સદા ॥ ૩૫॥

અદ્યપ્રભૃતિ વેદોક્તે સત્કર્મણિ વિશેષતઃ ।
મા ભૂયાદ્ભવતાં શ્રદ્ધા શૈવમાર્ગે વિમુક્તિદે ॥ ૩૬॥

અદ્યપ્રભૃતિ દુર્માર્ગે તત્ર શ્રદ્ધા ભવેત્તુ વઃ ।
મોક્ષમાર્ગવિહીને હિ સદા શ્રુતિબહિર્મુખે ॥ ૩૭॥

અદ્યપ્રભૃતિ ભાલાનિ મૃલ્લિપ્તાનિ ભવન્તુ વઃ ।
સ્રંસધ્વં નરકે યૂયં ભાલમૃલ્લેપના દ્વિજાઃ ॥ ૩૮॥

ભવન્તો મા ભવિષ્યન્તુ શિવૈકપરદૈવતાઃ ।
અન્યદેવ સમત્વેન જાનન્તુ શિવમદ્વયમ્ ॥ ૩૯॥

મા ભૂયાદ્ભવતાં પ્રીતિઃ શિવપૂજાદિકર્મણિ ।
શિવનિષ્ઠેષુ ભક્તેષુ શિવપર્વસુ સર્વદા ॥ ૪૦॥

અદ્ય દત્તા મયા શાપા યાવન્તો દુઃખદાયકાઃ ।
તાવન્તઃ સન્તુ ભવતાં સન્તતાવપિ સર્વદા ॥ ૪૧॥

અશૈવાઃ સન્તુ ભવતાં પુત્રપૌત્રાદયો દ્વિજાઃ ।

પુત્રૈઃ સહૈવ તિષ્ઠન્તુ ભવન્તો નરકે ધ્રુવમ્ ॥ ૪૨॥

તતો ભવન્તુ ચાણ્ડાલા દુઃખદારિદ્ર્યપીડિતાઃ ।
શઠા નિન્દાકરાઃ સર્વે તપ્તમુદ્રાઙ્કિતાઃ સદા ॥ ૪૩॥

સૂત ઉવાચ ।
ઇતિ શપ્ત્વા મુનીન્ સર્વાન્ ગૌતમઃ સ્વાશ્રમં યયૌ ।
શિવભક્તિં ચકારાતિ સ બભૂવ સુપાવનઃ ॥ ૪૪॥

તતસ્તૈઃ ખિન્નહૃદયા ઋષયસ્તેઽખિલા દ્વિજાઃ ।
કાઞ્ચ્યાં ચક્રુર્નિવાસં હિ શૈવધર્મબહિષ્કૃતાઃ ॥ ૪૫॥

તત્પુત્રાશ્ચાભવન્સર્વે શૈવધર્મબહિષ્કૃતાઃ ।
અગ્રે તદ્વદ્ભવિષ્યન્તિ કલૌ બહુજનાઃ ખલાઃ ॥ ૪૬॥

ઇતિ પ્રોક્તમશેષેણ તદ્વૃત્તં મુનિસત્તમાઃ ।
પૂર્વવૃત્તમપિ પ્રાજ્ઞાઃ શ્રુતં સર્વૈસ્તુ ચાદરાત્ ॥ ૪૭॥

ઇતિ વશ્ચ સમાખ્યાતો ગૌતમ્યાશ્ચ સમુદ્ભવઃ ।
માહાત્મ્યમુત્તમં ચૈવ સર્વપાપહરં પરમ્ ॥ ૪૮॥

ત્ર્યમ્બકસ્ય ચ માહાત્મ્યં જ્યોતિર્લિઙ્ગસ્ય કીર્તિતમ્ ।
યચ્છ્રુત્વા સર્વપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૪૯॥

અતઃ પરં પ્રવક્ષ્યામિ વૈદ્યનાથેશ્વરસ્ય હિ ।
જ્યોતિર્લિઙ્ગસ્ય માહાત્મ્યં શ્રૂયતાં પાપહારકમ્ ॥ ૫૦॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ત્ર્યમ્બકેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૪.૨૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૮. અષ્ટાવિંશોઽધ્યાયઃ । વૈદ્યનાથેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણમ્ ।

સૂત ઉવાચ ।
રાવણો રાક્ષસશ્રેષ્ઠો માની માનપરાયણઃ ।

આરરાધ હરં ભક્ત્યા કૈલાસે પર્વતોત્તમે ॥ ૧॥

આરાધિતઃ કિયત્કાલં ન પ્રસન્નો હરો યદા ।
તદા ચાન્યત્તપશ્ચક્રે પ્રસાદાર્થં શિવસ્ય સઃ ॥ ૨॥

તતશ્ચાયં હિમવતઃ સિદ્ધિસ્થાનસ્ય વૈ ગિરેઃ ।
પૌલસ્ત્યો રાવણઃ શ્રીમાન્ દક્ષિણે વૃક્ષખણ્ડકે ॥ ૩॥

ભૂમૌ ગર્તં વરં કૃત્વા તત્રાગ્નિં સ્થાપ્ય સ દ્વિજાઃ ।
તત્સન્નિધૌ શિવં સ્થાપ્ય હવનં સ ચકાર હ ॥ ૪॥

ગ્રીષ્મે પઞ્ચાગ્નિમધ્યસ્થો વર્ષાસુ સ્થણ્ડિલેશયઃ ।
શીતે જલાન્તરસ્થો હિ ત્રિધા ચક્રે તપશ્ચ સઃ ॥ ૫॥

ચકારૈવં બહુ તપો ન પ્રસન્નસ્તદાપિ હિ ।
પરમાત્મા મહેશાનો દુરારાધ્યો દુરાત્મભિઃ ॥ ૬॥

તતઃ શિરાંસિ છિત્ત્વા ચ પૂજનં શઙ્કરસ્ય વૈ ।
પ્રારબ્ધં દૈત્યપતિના રાવણેન મહાત્મના ॥ ૭॥

એકૈકં ચ શિરશ્છિન્નં વિધિના શિવપૂજને ।
એવં સત્ક્રમતસ્તેન છિન્નાનિ નવ વૈ યદા ॥ ૮॥

એકસ્મિન્નવશિષ્ટે તુ પ્રસન્નઃ શઙ્કરસ્તદા ।
આવિર્બભૂવ તત્રૈવ સન્તુષ્ટો ભક્તવત્સલઃ ॥ ૯॥

શિરાંસિ પૂર્વવત્કૃત્વા નીરુજાનિ તથા પ્રભુઃ ।
મનોરથં દદૌ તસ્મૈ ચાતુલં બલમુત્તમમ્ ॥ ૧૦॥

પ્રસાદં તસ્ય સમ્પ્રાપ્ય રાવણઃ સ ચ રાક્ષસઃ ।
પ્રત્યુવાચ શિવં શમ્ભું નતસ્કન્ધઃ કૃતાઞ્જલિઃ ॥ ૧૧॥

રાવણ ઉવાચ ।
પ્રસન્નો ભવ દેવેશ લઙ્કાં ચ ત્વાં નયામ્યહમ્ ।
સફલં કુરુ મે કામં ત્વામહં શરણં ગતઃ ॥ ૧૨॥

સૂત ઉવાચ ।
ઇત્યુક્તશ્ચ તદા તેન શમ્ભુર્વૈ રાવણેન સઃ ।
પ્રત્યુવાચ વિચેતસ્કઃ સઙ્કટં પરમં ગતઃ ॥ ૧૩॥

શિવ ઉવાચ ।

શ્રૂયતાં રાક્ષસશ્રેષ્ઠ વચો મે સારવત્તયા ।
નીયતાં સ્વગૃહે મે હિ સદ્ભક્ત્યા લિઙ્ગમુત્તમમ્ ॥ ૧૪॥

ભૂમૌ લિઙ્ગં યદા ત્વં ચ સ્થાપયિષ્યસિ યત્ર વૈ ।
સ્થાસ્યત્યત્ર ન સન્દેહો યથેચ્છસિ તથા કુરુ ॥ ૧૫॥

સૂત ઉવાચ ।
ઇત્યુક્તઃ શમ્ભુના તેન રાવણો રાક્ષસેશ્વરઃ ।
તથેતિ તત્સમાદાય જગામ ભવનં નિજમ્ ॥ ૧૬॥

આસીન્મૂત્રોત્સર્ગકામો માર્ગે હિ શિવમાયયા ।
તત્સ્તમ્ભિતું ન શક્તોઽભૂત્પૌલસ્ત્યો રાવણઃ પ્રભુઃ ॥ ૧૭॥

દૃષ્ટ્વૈકં તત્ર વૈ ગોપં પ્રાર્થ્ય લિઙ્ગં દદૌ ચ તત્ ।
મુહૂર્તકે હ્યતિક્રાન્તે ગોપોઽભૂદ્વિકલસ્તદા ॥ ૧૮॥

ભૂમૌ સંસ્થાપયામાસ તદ્ભારેણાતિપીડિતઃ ।
તત્રૈવ તત્સ્થિતં લિઙ્ગં વજ્રસારસમુદ્ભવમ્ ।
સર્વકામપ્રદં ચૈવ દર્શનાત્પાપહારકમ્ ॥ ૧૯॥

વૈદ્યનાથેશ્વરં નામ્ના તલ્લિઙ્ગમભવન્મુને ।
પ્રસિદ્ધં ત્રિષુ લોકેષુ ભુક્તિમુક્તિપ્રદં સતામ્ ॥ ૨૦॥

જ્યોતિર્લિઙ્ગમિદં શ્રેષ્ઠં દર્શનાત્પૂજનાદપિ ।
સર્વપાપહરં દિવ્યં મુક્તિવર્ધનમુત્તમમ્ ॥ ૨૧॥

તસ્મિઁલિઙ્ગે સ્થિતે તત્ર સર્વલોકહિતાય વૈ ।
રાવણઃ સ્વગૃહં ગત્વા વરં પ્રાપ્ય મહોત્તમમ્ ।
પ્રિયાયૈ સર્વમાચખ્યૌ સુખેનાતિ મહાસુરઃ ॥ ૨૨॥

તચ્છ્રુત્વા સકલા દેવાઃ શક્રાદ્યા મુનયસ્તથા ।
પરસ્પરં સમામન્ત્ર્ય શિવાસક્તધિયોઽમલાઃ ॥ ૨૩॥

તસ્મિન્કાલે સુરાઃ સર્વે હરિબ્રહ્માદયો મુને ।
આજગ્મુસ્તત્ર સુપ્રીત્યા પૂજાં ચક્રુર્વિશેષતઃ ॥ ૨૪॥

પ્રત્યક્ષં તં તદા દૃષ્ટ્વા પ્રતિષ્ઠાપ્ય ચ તે સુરાઃ ।
વૈદ્યનાથેતિ સમ્પ્રોચ્ય નત્વા નુત્વા દિવં યયુઃ ॥ ૨૫॥

ઋષય ઊચુઃ ।

તસ્મિઁલ્લિઙ્ગે સ્થિતે તત્ર રાવણે ચ ગૃહં ગતે ।
કિં ચરિત્રમભૂત્તાત તતસ્તદ્વદ વિસ્તરાત્ ॥ ૨૬॥

સૂત ઉવાચ ।
રાવણોઽપિ ગૃહં ગત્વા વરં પ્રાપ્ય મહોત્તમમ્ ।
પ્રિયાયૈ સર્વમાચખ્યૌ મુમોદાતિ મહાસુરઃ ॥ ૨૭॥

તચ્છ્રુત્વા સકલં દેવાઃ શક્રાદ્યા મુનયસ્તથા ।
પરસ્પરં સમૂચુસ્તે સમુદ્વિગ્ના મુનીશ્વરાઃ ॥ ૨૮॥

દેવાદય ઊચુઃ ॥

રાવણોઽયં દુરાત્મા હિ દેવદ્રોહી ખલઃ કુધીઃ ।
શિવાદ્ વરં ચ સમ્પ્રાપ્ય દુઃખં દાસ્યતિ નોઽતિ સઃ ॥ ૨૯॥

કિં કુર્મઃ ક્વ ચ ગચ્છામઃ કિં ભવિષ્યતિ વા પુનઃ ।
દુષ્ટશ્ચ દક્ષતાં પ્રાપ્તઃ કિં કિં નો સાધયિષ્યતિ ॥ ૩૦॥

ઇતિ દુઃખં સમાપન્નાઃ શક્રાદ્યા મુનયઃ સુરાઃ ।
નારદં ચ સમાહૂય પપ્રચ્છુર્વિકલાસ્તદા ॥ ૩૧॥

દેવા ઊચુઃ ।
સર્વં કાર્યં સમર્થોઽસિ કર્તું ત્વં મુનિસત્તમ ।
ઉપાયં કુરુ દેવર્ષે દેવાનાં દુઃખનાશને ॥ ૩૨॥

રાવણોઽયં મહાદુષ્ટઃ કિં કિં નૈવ કરિષ્યતિ ।
ક્વ યાસ્યામો વયં ચાત્ર દુષ્ટેનાપીડિતા વયમ્ ॥ ૩૩॥

નારદ ઉવાચ ।
દુઃખં ત્યજત ભો દેવા યુક્તિં કૃત્વા ચ યામ્યહમ્ ।
દેવકાર્યં કરિષ્યામિ કૃપયા શઙ્કરસ્ય વૈ ॥ ૩૪॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા સ તુ દેવર્ષિરગમદ્રાવણાલયમ્ ।
સત્કારં સમનુપ્રાપ્ય પ્રીત્યોવાચાખિલં ચ તત્ ॥ ૩૫॥

નારદ ઉવાચ ।
રાક્ષસોત્તમ ધન્યસ્ત્વં શૈવવર્યસ્તપોધન ।
ત્વાં દૃષ્ટ્વા ચ મનો મેઽદ્ય પ્રસન્નમતિ રાવણ ॥ ૩૬॥

સ્વવૃત્તં બ્રૂહ્યશેષેણ શિવારાધનસમ્ભવમ્ ।
ઇતિ પૃષ્ટસ્તદા તેન રાવણો વાક્યમબ્રવીત્ ॥ ૩૭॥

રાવણ ઉવાચ ।
ગત્વા મયા તુ કૈલાસે તપોઽર્થં ચ મહામુને ।
તત્રૈવ બહુકાલં વૈ તપસ્તપ્તં સુદારુણમ્ ॥ ૩૮॥

યદા ન શઙ્કરસ્તુષ્ટસ્તતશ્ચ પરિવર્તિતમ્ ।
આગત્ય વૃક્ષખણ્ડે વૈ પુનસ્તપ્તં મયા મુને ॥ ૩૯॥

ગ્રીષ્મે પઞ્ચાગ્નિમધ્યે તુ વર્ષાસુ સ્થણ્ડિલેશયઃ ।
શીતે જલાન્તરસ્થો હિ કૃતં ચૈવ ત્રિધા તપઃ ॥ ૪૦॥

એવં મયા કૃતં તત્ર તપોઽત્યુગ્રં મુનીશ્વર ।
તથાપિ શઙ્કરો મહ્યં ન પ્રસન્નોઽભવન્મનાક્ ॥ ૪૧॥

તદા મયા તુ ક્રુદ્ધેન ભૂમૌ ગર્તં વિધાય ચ ।
તત્રાગ્નિં ચ સમાધાય પાર્થિવં ચ પ્રકલ્પ્ય ચ ॥ ૪૨॥

ગન્ધૈશ્ચ ચન્દનૈશ્ચૈવ ધૂપૈશ્ચ વિવિધૈસ્તદા ।
નૈવેદ્યૈઃ પૂજિતઃ શમ્ભુરારાર્તિકવિધાનતઃ ॥ ૪૩॥

પ્રણિપાતૈઃ સ્તવૈઃ પુણ્યૈસ્તોષિતઃ શઙ્કરો મયા ।
ગીતૈર્નૃત્યૈશ્ચ વાદ્યૈશ્ચ મુખાઙ્ગુલિસમર્પણૈઃ ॥ ૪૪॥

એતૈશ્ચ વિવિધૈશ્ચાન્યૈરુપાયૈર્ભૂરિભિર્મુને ।
શાસ્ત્રોક્તેન વિધાનેન પૂજિતો ભગવાન્ હરઃ ॥ ૪૫॥

ન તુષ્ટઃ સમ્મુખો જાતો યદા ચ ભગવાન્ હરઃ ।
તદાહં દુઃખિતોઽભૂવં તપસોઽપ્રાપ્ય સત્ફલમ્ ॥ ૪૬॥

ધિક્ શરીરં બલં ચૈવ ધિક્ તપઃકરણં મમ ।
ઇત્યુક્ત્વા તુ મયા તત્ર સ્થાપિતેઽગ્નૌ હુતં બહુ ॥ ૪૭॥

પુનશ્ચેતિ વિચાર્યૈવ ત્યક્ષામ્યગ્નૌ નિજાં તનુમ્ ।
સઞ્છિન્નાનિ શિરાંસ્યેવ તસ્મિન્ પ્રજ્વલિતે શુચૌ ॥ ૪૮॥

સુચ્છિત્વૈકૈકશસ્તાનિ કૃત્વા શુદ્ધાનિ સર્વશઃ ।
શઙ્કરાયાર્પિતાન્યેવ નવસઙ્ખ્યાનિ વૈ મયા ॥ ૪૯॥

યાવચ્ચ દશમં છેત્તું પ્રારબ્ધમૃષિસત્તમ ।

તાવદાવિરભૂત્તત્ર જ્યોતીરૂપો હરઃ સ્વયમ્ ॥ ૫૦॥

મા મેતિ વ્યાહરત્ પ્રીત્યા દ્રુતં વૈ ભક્તવત્સલઃ ।
પ્રસન્નશ્ચ વરં બ્રૂહિ દદામિ મનસેપ્સિતમ્ ॥ ૫૧॥

ઇત્યુક્તે ચ તદા તેન મયા દૃષ્ટો મહેશ્વરઃ ।
પ્રણતઃ સંસ્તુતશ્ચૈવ કરૌ બધ્વા સુભક્તિતઃ ॥ ૫૨॥

તદા વૃતં મયૈતચ્ચ દેહિ મે હ્યતુલં બલમ્ ।
યદિ પ્રસન્નો દેવેશ દુર્લભં કિં ભવેન્મમ ॥ ૫૩॥

શિવેન પરિતુષ્ટેન સર્વં દત્તં કૃપાલુના ।
મહ્યં મનોઽભિલષિતં ગિરા પ્રોચ્ય તથાસ્ત્વિતિ ॥ ૫૪॥

અમોઘયા સુદૃષ્ટ્યા વૈ વૈદ્યવદ્યોજિતાનિ મે ।
શિરાંસિ સન્ધયિત્વા તુ દૃષ્ટાનિ પરમાત્મના ॥ ૫૫॥

એવં કૃતે તદા તત્ર શરીરં પૂર્વવન્મમ ।
જાતં તસ્ય પ્રસાદાચ્ચ સર્વં પ્રાપ્તં ફલં મયા ॥ ૫૬॥

તદા ચ પ્રાર્થિતો મે સંસ્થિતોઽસૌ વૃષભધ્વજઃ ।
વૈદ્યનાથેશ્વરો નામ્ના પ્રસિદ્ધોઽભૂજ્જગત્ત્રયે ॥ ૫૭॥

દર્શનાત્પૂજનાજ્જ્યોતિર્લિઙ્ગરૂપો મહેશ્વરઃ ।
ભુક્તિમુક્તિપ્રદો લોકે સર્વેષાં હિતકારકઃ ॥ ૫૮॥

જ્યોતિર્લિઙ્ગમહં તદ્વૈ પૂજયિત્વા વિશેષતઃ ।
પ્રણિપત્યાગતશ્ચાત્ર વિજેતું ભુવનત્રયમ્ ॥ ૫૯॥

સૂત ઉવાચ ।
તદીયં તદ્વચઃ શ્રુત્વા દેવર્ષિર્જાતસમ્ભ્રમઃ ।
વિહસ્ય ચ મનસ્યેવ રાવણં નારદોઽબ્રવીત્ ॥ ૬૦॥

નારદ ઉવાચ ।
શ્રૂયતાં રાક્ષસશ્રેષ્ઠ કથયામિ હિતં તવ ।
ત્વયા તદેવ કર્ત્તવ્યં મદુક્તં નાન્યથા ક્વચિત્ ॥ ૬૧॥

ત્વયોક્તં યચ્છિવેનૈવ હિતં દત્તં મમાધુના ।
તત્સર્વં ચ ત્વયા સત્યં ન મન્તવ્યં કદાચન ॥ ૬૨॥

અયં વૈ વિકૃતિં પ્રાપ્તઃ કિં કિં નૈવ બ્રવીતિ ચ ।

સત્યં નૈવ ભવેત્તદ્વૈ કથં જ્ઞેયં પ્રિયોઽસિ મે ॥ ૬૩॥

ઇતિ ગત્વા પુનઃ કાર્યં કુરુ ત્વં હ્યહિતાય વૈ ।
કૈલાસોદ્ધરણે યત્નઃ કર્તવ્યશ્ચ ત્વયા પુનઃ ॥ ૬૪॥

યદિ ચૈવોદ્ધૃતશ્ચાયં કૈલાસો હિ ભવિષ્યતિ ।
તદૈવ સફલં સર્વં ભવિષ્યતિ ન સંશયઃ ॥ ૬૫॥

પૂર્વવત્સ્થાપયિત્વા ત્વં પુનરાગચ્છ વૈ સુખમ્ ।
નિશ્ચયં પરમં ગત્વા યથેચ્છસિ તથા કુરુ ॥ ૬૬॥

સૂત ઉવાચ ।
ઇત્યુક્તઃ સ હિતં મેને રાવણો વિધિમોહિતઃ ।
સત્યં મત્વા મુનેર્વાક્યં કૈલાસમગમત્તદા ॥ ૬૭॥

ગત્વા તત્ર સમુદ્ધારં ચક્રે તસ્ય ગિરેઃ સ ચ ।
તત્રસ્થં ચૈવ તત્સર્વં વિપર્યસ્તં પરસ્પરમ્ ॥ ૬૮॥

ગિરીશોઽપિ તદા દૃષ્ટ્વા કિં જાતમિતિ સોઽબ્રવીત્ ।
ગિરિજા ચ તદા શમ્ભું પ્રત્યુવાચ વિહસ્ય તમ્ ॥ ૬૯॥

ગિરિજોવાચ ।
સચ્છિષ્યસ્ય ફલં જાતં સમ્યગ્જાતં તુ શિષ્યતઃ ।
શાન્તાત્મને સુવીરાય દત્તં યદતુલં બલમ્ ॥ ૭૦॥

સૂત ઉવાચ ।
ગિરિજાયાશ્ચ સાકૂતં વચઃ શ્રુત્વા મહેશ્વરઃ ।
કૃતઘ્નં રાવણં મત્વા શશાપ બલદર્પિતમ્ ॥ ૭૧॥

મહાદેવ ઉવાચ ।
રે રે રાવણ દુર્ભક્ત મા ગર્વં વહ દુર્મતે ।
શીઘ્રં ચ તવ હસ્તાનાં દર્પઘ્નશ્ચ ભવેદિહ ॥ ૭॥

સૂત ઉવાવ ।
ઇતિ તત્ર ચ યજ્જાતં નારદઃ શ્રુતવાંસ્તદા ।
રાવણોઽપિ પ્રસન્નાત્માગાત્સ્વધામ યથાગતમ્ ॥ ૭૩॥

નિશ્ચયં પરમં કૃત્વા બલી બલવિમોહિતઃ ।
જગદ્વશં હિ કૃતવાન્ રાવણઃ પરદર્પહા ॥ ૭૪॥

શિવાજ્ઞયા ચ પ્રાપ્તેન દિવ્યાસ્ત્રેણ મહૌજસા ।
રાવણસ્ય પ્રતિભટો નાલં કશ્ચિદભૂત્તદા ॥ ૭૫॥

ઇત્યેતચ્ચ સમાખ્યાતં વૈદ્યનાથેશ્વરસ્ય ચ ।
માહાત્મ્યં શ‍ૃણ્વતાં પાપં નૃણાં ભવતિ ભસ્મસાત્ ॥ ૭૬॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં વૈદ્યનાથેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૪.૨૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૨૯. એકોનત્રિંશોઽધ્યાયઃ । દારુકાવનરાક્ષસોપદ્રવવર્ણનમ્ ।

સૂત ઉવાચ ।
અથાતઃ સમ્પ્રવક્ષ્યામિ નાગેશાખ્યં પરાત્મનઃ ।
જ્યોતીરૂપં યથા જાતં પરમં લિઙ્ગમુત્તમમ્ ॥ ૧॥

દારુકા રાક્ષસી કાચિત્પાર્વતીવરદર્પિતા ।
દારુકશ્ચ પતિસ્તસ્યા બભૂવ બલવત્તરઃ ॥ ૨॥

બહુભી રાક્ષસૈસ્તત્ર ચકાર કદનં સતામ્ ।
યજ્ઞધ્વંસં ચ લોકાનાં ધર્મધ્વંસં તદાકરોત્ ॥ ૩॥

પશ્ચિમે સાગરે તસ્ય વનં સર્વસમૃદ્ધિમત્ ।
યોજનાનાં ષોડશભિર્વિસ્તૃતં સર્વતો દિશમ્ ॥ ૪॥

દારુકા સ્વવિલાસાર્થં યત્ર ગચ્છતિ તદ્વનમ્ ।
ભૂમ્યા ચ તરુભિસ્તત્ર સર્વોપકરણૈર્યુતમ્ ॥ ૫॥

દારુકાયૈ દદૌ દેવી તદ્વનસ્યાવલોકનમ્ ।
પ્રયાતિ તદ્વનં સા હિ પત્યા સહ યદૃચ્છયા ॥ ૬॥

તત્ર સ્થિત્વા તદા સોઽપિ સર્વેષાં ચ ભયં દદૌ ।
દારુકો રાક્ષસઃ પત્ન્યા તયા દારુકયા સહ ॥ ૭॥

તે સર્વે પીડિતા લોકા ઔર્વસ્ય શરણં યયુઃ ।

નત્વા પ્રીત્યા વિશેષેણ તમૂચુર્નતમસ્તકાઃ ॥ ૮॥

લોકા ઊચુઃ ।
મહર્ષે શરણં દેહિ નો ચેદ્દુષ્ટૈશ્ચ મારિતાઃ ।
સર્વં કર્તું સમર્થોઽસિ તેજસા દીપ્તિમાનસિ ॥ ૯॥

પૃથ્વ્યાં ન વર્તતે કશ્ચિત્ત્વાં વિના શરણં ચ નઃ ।
યામો યસ્ય સમીપે તુ સ્થિત્વા સુખમવાપ્નુમઃ ॥ ૧૦॥

ત્વાં દૃષ્ટ્વા રાક્ષસાઃ સર્વે પલાયન્તે વિદૂરતઃ ।
ત્વયિ શૈવં સદા તેજો વિભાતિ જ્વલનો યથા ॥ ૧૧॥

સૂત ઉવાચ ।
ઇત્યેવં પ્રાર્થિતો લોકૈરૌર્વો હિ મુનિસત્તમઃ ।
શોચમાનઃ શરણ્યશ્ચ રક્ષાયૈ હિ વચોઽબ્રવીત્ ॥ ૧૨॥

ઔર્વ ઉવાચ ।
પૃથિવ્યાં યદિ રક્ષાંસિ હિંસ્યુર્વૈ પ્રાણિનસ્તદા ।
સ્વયં પ્રાણૈર્વિયુજ્યેયૂ રાક્ષસા બલવત્તરાઃ ॥ ૧૩॥

યદા યજ્ઞાશ્ચ હન્યેરંસ્તદા પ્રાણૈર્વિયોજિતાઃ ।
ભવન્તુ રાક્ષસાઃ સર્વે સત્યમેતન્મયોચ્યતે ॥ ૧૪॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા વચનં તેભ્યઃ સમાશ્વાસ્ય પ્રજાઃ પુનઃ ।
તપશ્ચકાર વિવિધમૌર્વો લોકસુખાવહઃ ॥ ૧૫॥

દેવાસ્તદા તે વિજ્ઞાય શાપસ્ય કારણં હિ તત્ ।
યુદ્ધાય ચ સમુદ્યોગં ચક્રુર્દેવારિભિઃ સહ ॥ ૧૬॥

સર્વૈશ્ચૈવ પ્રયત્નૈશ્ચ નાનાયુધધરાઃ સુરાઃ ।
સર્વે શક્રાદયસ્તત્ર યુદ્ધાર્થં સમુપાગતાઃ ॥ ૧૭॥

તાન્દૃષ્ટ્વા રાક્ષસાસ્તત્ર વિચારે તત્પરાઃ પુનઃ ।
બભૂવુસ્તેઽખિલા દુષ્ટા મિથો યે યત્ર સંસ્થિતાઃ ॥ ૧૮॥

રાક્ષસા ઊચુઃ ।
કિં કર્તવ્યં ક્વ ગન્તવ્યં સઙ્કટં સમુપાગતાઃ ।
યુદ્ધ્યતે મ્રિયતે ચૈવ યુદ્ધ્યતે ન વિહન્યતે ॥ ૧૯॥

તથૈવ સ્થીયતે ચેદ્વૈ ભક્ષ્યતે કિં પરસ્પરમ્ ।
દુઃખં હિ સર્વથા જાતં ક એનં વિનિવારયેત્ ॥ ૨૦॥

સૂત ઉવાચ ।
વિચાર્યેતિ ચ તે તત્ર દારુકાદ્યાશ્ચ રાક્ષસાઃ ।
ઉપાયં ન વિજાનન્તો દુઃખં પ્રાપ્તાઃ સદા હિ વૈ ॥ ૨૧॥

દારુકા રાક્ષસી ચાપિ જ્ઞાત્વા દુઃખં સમાગતમ્ ।
ભવાન્યાશ્ચ વરં તં ચ કથયામાસ સા તદા ॥ ૨૨॥

દારુકોવાચ ।
મયા હ્યારાધિતા પૂર્વં ભવપત્ની વરં દદૌ ।
વનં ગચ્છ નિજૈઃ સાર્ધં યત્ર ગન્તું ત્વમિચ્છસિ ॥ ૨૩॥

તદ્વરશ્ચ મયા પ્રાપ્તઃ કથં દુઃખં વિષહ્યતે ।
જલે વનં ચ નીત્વા વૈ સુખં સ્થેયં તુ રાક્ષસૈઃ ॥ ૨૪॥

સૂત ઉવાચ ।
તસ્યાસ્તદ્વચનં શ્રુત્વા રાક્ષસ્યા હર્ષમાગતાઃ ।
ઊચુઃ સર્વે મિથસ્તે હિ રાક્ષસા નિર્ભયાસ્તદા ॥ ૨૫॥

ધન્યેયં કૃતકૃત્યેયં રાજ્ઞ્યા વૈ જીવિતાઃ સ્વયમ્ ।
નત્વા તસ્યૈ ચ તત્સર્વં કથયામાસુરાદરાત્ ॥ ૨૬॥

યદિ ગન્તું ભવેચ્છક્તિર્ગમ્યતાં કિં વિચાર્યતે ।
તત્ર ગત્વા જલે દેવિ સુખં સ્થાસ્યામ નિત્યશઃ ॥ ૨૭॥

એતસ્મિન્નન્તરે લોકા દેવૈઃ સાર્ધં સમાગતાઃ ।
યુદ્ધાય વિવિધૈર્દુઃખૈઃ પીડિતા રાક્ષસૈઃ પુરા ॥ ૨૮॥

પીડિતાશ્ચ તદા તસ્યા ભવાન્યા બલમાશ્રિતાઃ ।
સમગ્રં નગરં નીત્વા જલસ્થલસમન્વિતમ્ ॥ ૨૯॥

જય જયેતિ દેવ્યાસ્તુ સ્તુતિમુચ્ચાર્ય રાક્ષસી ।
તત ઉડ્ડીયનં કૃત્વા સપક્ષો ગિરિરાડ્યથા ॥ ૩૦॥

સમુદ્રસ્ય ચ મધ્યે સા સંસ્થિતા નિર્ભયા તદા ।
સકલૈઃ પરિવારૈશ્ચ મુમુદેતિ શિવાનુગા ॥ ૩૧॥

તત્ર સિન્ધૌ ચ તે સ્થિત્વા નગરે ચ વિલાસિનઃ ।

રાક્ષસાશ્ચ સુખં પ્રાપુર્નિર્ભયાશ્ચ વિજહ્રિરે ॥ ૩૨॥

રાક્ષસાશ્ચ પૃથિવ્યાં વૈ નાજગ્મુશ્ચ કદાચન ।
મુનેઃ શાપભયાદેવ બભ્રમુસ્તે ચલે તદા ॥ ૩૩॥

નૌષુ સ્થિતાન્ જનાન્નીત્વા નગરે તત્ર તાંસ્તદા ।
ચિક્ષિપુર્બન્ધનાગારે કાંશ્ચિજ્જઘ્નુસ્તદા હિ તે ॥ ૩૪॥

યથા યથા પુનઃ પીડાં ચક્રુસ્તે રાક્ષસાસ્તદા ।
તત્ર સ્થિતા ભવાન્યાશ્ચ વરદાનાચ્ચ નિર્ભયાઃ ॥ ૩૫॥

યથા પૂર્વં સ્થલે લોકે ભયં ચાસીન્નિરન્તરમ્ ।
તથા ભયં જલે તેષામાસીન્નિત્યં મુનીશ્વરાઃ ॥ ૩૬॥

કદાચિદ્રાક્ષસી સા ચ નિઃસૃતા નગરાજ્જલે ।
રુદ્ધ્વા માર્ગં સ્થિતા લોકપીડાર્થં ધરણૌ ચ હિ ॥ ૩૭॥

એતસ્મિન્નન્તરે તત્ર નાવો બહુતરાઃ શુભાઃ ।
આગતા બહુધા તત્ર સર્વતો લોકસંવૃતાઃ ॥ ૩૮॥

તા નાવશ્ચ તદા દૃષ્ટ્વા હર્ષં સમ્પ્રાપ્ય રાક્ષસાઃ ।
દ્રુતં ગત્વા હિ તત્રસ્થાન્વેગાત્સન્દધ્રિરે ખલાઃ ॥ ૩૯॥

આજગ્મુર્નગરં તે ચ તાનાદાય મહાબલાઃ ।
ચિક્ષિપુર્બન્ધનાગારે બદ્ધ્વા હિ નિગડૈર્દૃઢૈઃ ॥ ૪૦॥

બદ્ધાસ્તે નિગડૈર્લોકાઃ સંસ્થિતા બન્ધનાલયે ।
અતીવ દુઃખમાજગ્મુર્ભર્ત્સિતાસ્તે મુહુર્મુહુઃ ॥ ૪૧॥

તેષાં મધ્યે ચ યોઽધીશઃ સ વૈશ્યઃ સુપ્રિયાભિધઃ ।
શિવપ્રિયઃ શુભાચારઃ શૈવશ્ચાસીત્સદાતનઃ ॥ ૪૨॥

વિના ચ શિવપૂજાં વૈ ન તિષ્ઠતિ કદાચન ।
સર્વથા શિવધર્મા હિ ભસ્મરુદ્રાક્ષભૂષણઃ ॥ ૪૩॥

યદિ પૂજા ન જાતા ચેન્ન ભુનક્તિ તદા તુ સઃ ।
અતસ્તત્રાપિ વૈશ્યોઽસૌ ચકાર શિવપૂજનમ્ ॥ ૪૪॥

કારાગૃહગતઃ સોઽપિ બહૂંશ્ચાશિક્ષયત્તદા ।
શિવમન્ત્રં ચ પૂજાં ચ પાર્થિવીમૃષિસત્તમાઃ ॥ ૪૫॥

તે સર્વે ચ તદા તત્ર શિવપૂજાં સ્વકામદામ્ ।
ચક્રિરે વિધિવત્તત્ર યથાદૃષ્ટં યથાશ્રુતમ્ ॥ ૪૬॥

કેચિત્તત્ર સ્થિતા ધ્યાને બદ્ધ્વાસનમનુત્તમમ્ ।
માનસીં શિવપૂજાં ચ કેચિચ્ચક્રુર્મુદાન્વિતાઃ ॥ ૪૭॥

તદાધીશેન તત્રૈવ પ્રત્યક્ષં શિવપૂજનમ્ ।
કૃતં ચ પાર્થિવસ્યૈવ વિધાનેન મુનીશ્વરાઃ ॥ ૪૮॥

અન્યે ચ યે ન જાનન્તિ વિધાનં સ્મરણં પરમ્ ।
નમઃ શિવાય મન્ત્રેણ ધ્યાયન્તઃ શઙ્કરં સ્થિતાઃ ॥ ૪૯॥

સુપ્રિયો નામ યશ્ચાસીદ્વૈશ્યવર્યઃ શિવપ્રિયઃ ।
ધ્યાયઁશ્ચ મનસા તત્ર ચકાર શિવપૂજનમ્ ॥ ૫૦॥

યથોક્તરૂપી શમ્ભુશ્ચ પ્રત્યક્ષં સર્વમાદદે ।
સોઽપિ સ્વયં ન જાનાતિ ગૃહ્યતે ન શિવેન વૈ ॥ ૫૧॥

એવં ચ ક્રિયમાણસ્ય વૈશ્યસ્ય શિવપૂજનમ્ ।
વ્યતીયુસ્તત્ર ષણ્માસા નિર્વિઘ્નેન મુનીશ્વરાઃ ॥ ૫૨॥

અતઃ પરં ચ યજ્જાતં ચરિતં શશિમૌલિનઃ ।
તચ્છૃણુધ્વમૃષિશ્રેષ્ઠાઃ સાવધાનેન ચેતસા ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં નાગેશ્વરજ્યોતિર્લિઙ્ગમાહાત્મ્યે દારુકાવનરાક્ષસોપદ્રવવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૪.૨૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૦. ત્રિંશોઽધ્યાયઃ । નાગેશ્વરજ્યોતિર્લિઙ્ગોદ્ભવમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
કદાચિત્સેવકસ્તસ્ય રાક્ષસસ્ય દુરાત્મનઃ ।
તદગ્રે સુન્દરં રૂપં શઙ્કરસ્ય દદર્શ હ ॥ ૧॥

તસ્મૈ નિવેદિતં રાજ્ઞે રાક્ષસાનાં યથાર્થકમ્ ।

સર્વં તચ્ચરિતં તેન સકૌતુકમથાદ્ભુતમ્ ॥ ૨॥

રાજાપિ તત્ર ચાગત્ય રાક્ષસાનાં સ દારુકઃ ।
વિહ્વલઃ સબલઃ શીઘ્રં પર્યપૃચ્છચ્ચ તં શિવમ્ ॥ ૩॥

દારુક ઉવાચ ।
કિં ધ્યાયસિ હિ વૈશ્ય ત્વં સત્યં વદ મમાગ્રતઃ ।
એવં સતિ ન મૃત્યુસ્તે મમ વાક્યં ચ નાન્યથા ॥ ૪॥

સૂત ઉવાચ ।
તેનોક્તં ચ ન જાનામિ તચ્છ્રુત્વા કુપિતઃ સ વૈ ।
રાક્ષસાન્પ્રેરયામાસ હન્યતાં રાક્ષસા અયમ્ ॥ ૫॥

તદુક્તાસ્તે તદા હન્તું નાનાયુધધરા ગતાઃ ।
દ્રુતં તં વૈશ્યશાર્દૂલં શઙ્કરાસક્તચેતસમ્ ॥ ૬॥

તાનાગતાંસ્તદા દૃષ્ટ્વા ભયવિત્રસ્તલોચનઃ ।
શિવં સસ્માર સુપ્રીત્યા તન્નામાનિ જગૌ મુહુઃ ॥ ૭॥

વૈશ્યપતિરુવાચ ।
પાહિ શઙ્કર દેવેશ પાહિ શમ્ભો શિવેતિ ચ ।
દુષ્ટાદસ્માત્ત્રિલોકેશ ખલહન્ ભક્તવત્સલ ॥ ૮॥

સર્વસ્વં ચ ભવાનદ્ય મમ દેવ ત્વમેવ હિ ।
ત્વદધીનસ્ત્વદીયોઽહં ત્વત્પ્રાણઃ સર્વદા પ્રભો ॥ ૯॥

સૂત ઉવાચ ।
ઇતિ સમ્પ્રાર્થિતઃ શમ્ભુર્વિવરાન્નિર્ગતસ્તદા ।
ભવનેનોત્તમેનાથ ચતુર્દ્વારયુતેન ચ ॥ ૧૦॥

મધ્ય જ્યોતિઃસ્વરૂપં ચ શિવરૂપં તદદ્ભુતમ્ ।
પરિવારસમાયુક્તં દૃષ્ટ્વા ચાપૂજયત્સ વૈ ॥ ૧૧॥

પૂજિતશ્ચ તદા શમ્ભુઃ પ્રસન્નો હ્યભવત્સ્વયમ્ ।
અસ્ત્રં પાશુપતં નામ દત્ત્વા રાક્ષસપુઙ્ગવાન્ ॥ ૧૨॥

જઘાન સોપકરણાંસ્તાન્સર્વાન્સગણાન્દ્રુતમ્ ।
અરક્ષચ્ચ સ્વભક્તં વૈ દુષ્ટહા સ હિ શઙ્કરઃ ॥ ૧૩॥

સર્વાંસ્તાંશ્ચ તદા હત્વા વરં પ્રાદાદ્વનસ્ય ચ ।

અત્યદ્ભુતકરઃ શમ્ભુઃ સ્વલીલાત્તસુવિગ્રહઃ ॥ ૧૪॥

અસ્મિન્વને સદા વર્ણધર્મા વૈ સમ્ભવન્તુ ચ ।
બ્રાહ્મણક્ષત્રિયવિશાં શૂદ્રાણાં હિ તથૈવ ચ ॥ ૧૫॥

ભવન્ત્વત્ર મુનિશ્રેષ્ઠાસ્તામસા ન કદાચન ।
શિવધર્મપ્રવક્તારઃ શિવધર્મપ્રવર્તકાઃ ॥ ૧૬॥

સૂત ઉવાચ ।
એતસ્મિન્સમયે સા વૈ રાક્ષસી દારુકાહ્વયા ।
દેવ્યાઃ સ્તુતિં ચકારાસૌ પાર્વત્યા દીનમાનસા ॥ ૧૭॥

પ્રસન્ના ચ તદા દેવી કિં કરોમીત્યુવાચ હિ ।
સાપ્યુવાચ પુનસ્તત્ર વંશો મે રક્ષ્યતાં ત્વયા ॥ ૧૮॥

રક્ષયિષ્યામિ તે વંશં સત્યં ચ કથ્યતે મયા ।
ઇત્યુક્ત્વા ચ શિવેનૈવ વિગ્રહં સા ચકાર હ ॥ ૧૯॥

શિવોઽપિ કુપિતાં દેવીં દૃષ્ટ્વા વરવશઃ પ્રભુઃ ।
પ્રત્યુવાચેતિ સુપ્રીત્યા યથેચ્છસિ તથા કુરુ ॥ ૨૦॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય સ્વપતેઃ શઙ્કરસ્ય વૈ ।
સુપ્રસન્ના વિહસ્યાશુ પાર્વતી વાક્યમબ્રવીત્ ॥ ૨૧॥

પાર્વત્યુવાચ ।
ભવદીયં વચસ્તથ્યં યુગાન્તે સમ્ભવિષ્યતિ ।
તાવચ્ચ તામસી સૃષ્ટિર્ભવત્વિતિ મતં મમ ॥ ૨૨॥

અન્યથા પ્રલયઃ સ્યાદ્વૈ સત્યં મે વ્યાહૃતં શિવ ।
પ્રમાણીક્રિયતાં નાથ ત્વદીયાસ્મિ ત્વદાશ્રયા ॥ ૨૩॥

ઇયં ચ દારુકા દેવી રાક્ષસી શક્તિકા મમ ।
બલિષ્ઠા રાક્ષસીનાં ચ રક્ષોરાજ્યં પ્રશાસ્તુ ચ ॥ ૨૪॥

ઇમા રાક્ષસપત્ન્યસ્તુ પ્રસવિષ્યન્તિ પુત્રકાન્ ।
તે સર્વે મિલિતાશ્ચૈવ વને વાસાય મે મતાઃ ॥ ૨૫॥

સૂત ઉવાચ ।
ઇત્યેવં વચનં શ્રુત્વા પાર્વત્યાઃ સ્વસ્ત્રિયાઃ પ્રભુઃ ।

પ્રસન્નમાનસો ભૂત્વા શઙ્કરો વાક્યમબ્રવીત્ ॥ ૨૬॥

શઙ્કર ઉવાચ ।
ઇતિ બ્રવીષિ ત્વં વૈ ચેચ્છૃણુ મદ્વચનં પ્રિયે ।
સ્થાસ્યામ્યસ્મિન્વને પ્રીત્યા ભક્તાનાં પાલનાય ચ ॥ ૨૭॥

અત્ર મે વર્ણધર્મસ્થો દર્શનં પ્રીતિસંયુતમ્ ।
કરિષ્યતિ ચ યો વૈ સ ચક્રવર્તી ભવિષ્યતિ ॥ ૨૮॥

અન્યથા કલિપર્યાયે સત્યસ્યાદૌ નૃપેશ્વરઃ ।
મહાસેનયુતો યો વૈ વીરસેનેતિ વિશ્રુતઃ ॥ ૨૯॥

સ મે ભક્ત્યાતિવિક્રાન્તો દર્શનં મે કરિષ્યતિ ।
દર્શનં મે સ કૃત્વૈવ ચક્રવર્તી ભવિષ્યતિ ॥ ૩૦॥

સૂત ઉવાચ ।
ઇત્યેવં દમ્પતી તૌ ચ કૃત્વા હાસ્યં પરસ્પરમ્ ।
સ્થિતૌ તત્ર સ્વયં સાક્ષાન્મહોતીકારકૌ દ્વિજાઃ ॥ ૩૧॥

જ્યોતિર્લિઙ્ગસ્વરૂપો હિ નામ્ના નાગેશ્વરઃ શિવઃ ।
નાગેશ્વરી શિવા દેવી બભૂવ ચ સતાં પ્રિયૌ ॥ ૩૨॥

ઋષય ઊચુઃ ।
વીરસેનઃ કથં તત્ર યાસ્યતે દારુકાવને ।
કથમર્ચિષ્યતિ શિવં ત્વં તદ્વદ મહામતે ॥ ૩૩॥

સૂત ઉવાચ ।
નિષધે સુન્દરે દેશે ક્ષત્રિયાણાં કુલે ચ સઃ ।
મહાસેનસુતો વીરસેનશ્ચૈવ શિવપ્રિયઃ ॥ ૩૪॥

પાર્થિવેશાર્ચનં કૃત્વા તપઃ પરમદુષ્કરમ્ ।
ચકાર વીરસેનો વૈ વર્ષાણાં દ્વાદશાવધિઃ ॥ ૩૫॥

તતઃ પ્રસન્નો દેવેશઃ પ્રત્યક્ષં પ્રાહ શઙ્કરઃ ।
કાષ્ઠસ્ય મત્સ્યિકાં કૃત્વા ત્રપુધાતુવિલેપનામ્ ॥ ૩૬॥

વિધાય યોગમાયાં ચ દાસ્યામિ વીરસેનક ।
તાં ગૃહીત્વા પ્રવિશ્યૈનં નૌભિઃ સહ વ્રજાધુના ॥ ૩૭॥

તતસ્ત્વં તત્ર ગત્વા ચ વિવરે ચ કૃતે મયા ।

પ્રવિશ્ય ચ તદા પૂજાં કૃત્વા નાગેશ્વરસ્ય ચ ॥ ૩૮॥

તતઃ પાશુપતં પ્રાપ્ય હત્વા ચ રાક્ષસીમુખાન્ ।
મયિ દૃષ્ટે તદા કિઞ્ચિન્ન્યૂનં તે ન ભવિષ્યતિ ॥ ૩૯॥

પાર્વત્યાશ્ચ બલં ચૈવ સમ્પૂર્ણં વૈ ભવિષ્યતિ ।
અન્યે ચ મ્લેચ્છરૂપા યે ભવિષ્યન્તિ વને શુભાઃ ॥ ૪૦॥

ઇત્યુક્ત્વા શઙ્કરસ્તત્ર વીરસેનં હિ દુઃખહા ।
કૃત્વા કૃપાં ચ મહતીં તત્રૈવાન્તર્દધે પ્રભુઃ ॥ ૪૧॥

ઇતિ દત્તવરઃ સોઽપિ શિવેન પરમાત્મના ।
શક્તઃ સર્વં તદા કર્તું સમ્બભૂવ ન સંશયઃ ॥ ૪૨॥

એવં નાગેશ્વરો દેવ ઉત્પન્નો જ્યોતિષાં પતિઃ ।
લિઙ્ગરૂપસ્ત્રિલોકસ્ય સર્વકામપ્રદઃ સદા ॥ ૪૩॥

એતદ્યઃ શ‍ૃણુયાન્નિત્યં નાગેશોદ્ભવમાદરાત્ ।
સર્વાન્કામાનિયાદ્ધીમાન્મહાપાતકનાશનાન્ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં નાગેશ્વરજ્યોતિર્લિઙ્ગોદ્ભવમાહાત્મ્યવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૪.૩૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૧. એકત્રિંશોઽધ્યાયઃ । રામેશ્વરમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ લિઙ્ગં રામેશ્વરાભિધમ્ ।
ઉત્પન્નં ચ યથા પૂર્વમૃષયઃ શ‍ૃણુતાદરાત્ ॥ ૧॥

પુરા વિષ્ણુઃ પૃથિવ્યાં ચાવતતાર સતાં પ્રિયઃ ॥ ૨॥

તત્ર સીતા હૃતા વિપ્રા રાવણેનોરુમાયિના ।
પ્રાપિતા સ્વગૃહં સા હિ લઙ્કાયાં જનકાત્મજા ॥ ૩॥

અન્વેષણપરસ્તસ્યાઃ કિષ્કિન્ધાખ્યાં પુરીમગાત્ ।

સુગ્રીવહિતકૃદ્ભૂત્વા વાલિનં સઞ્જઘાન હ ॥ ૪॥

તત્ર સ્થિત્વા કિયત્કાલં તદન્વેષણતત્પરઃ ।
સુગ્રીવાદ્યૈર્લક્ષ્મણેન વિચારં કૃતવાન્સ વૈ ॥ ૫॥

કપીન્ સમ્પ્રેષયામાસ ચતુર્દિક્ષુ નૃપાત્મજઃ ।
હનુમત્પ્રમુખાન્ રામસ્તદન્વેષણહેતવે ॥ ૬॥

અથ જ્ઞાત્વા ગતાં લઙ્કાં સીતાં કપિવરાનનાત્ ।
સીતાચૂડામણિં પ્રાપ્ય મુમુદે સોઽતિ રાઘવઃ ॥ ૭॥

સકપીશસ્તદા રામો લક્ષ્મણેન યુતો દ્વિજાઃ ।
સુગ્રીવપ્રમુખૈઃ પુણ્યૈર્વાનરૈર્બલવત્તરૈઃ ॥ ૮॥

પદ્મૈરષ્ટાદશાખ્યૈશ્ચ યયૌ તીરં પયોનિધેઃ ।
દક્ષિણે સાગરે યો વૈ દૃશ્યતે લવણાકરઃ ॥ ૯॥

તત્રાગત્ય સ્વયં રામો વેલાયાં સંસ્થિતો હિ સઃ ।
વાનરૈઃ સેવ્યમાનસ્તુ લક્ષ્મણેન શિવપ્રિયઃ ॥ ૧૦॥

હા જાનકિ કુતો યાતા કદા ચેયં મિલિષ્યતિ ।
અગાધઃ સાગરશ્ચૈવાતાર્યા સેના ચ વાનરી ॥ ૧૧॥

રાક્ષસો ગિરિધર્તા ચ મહાબલપરાક્રમઃ ।
લઙ્કાખ્યો દુર્ગમો દુર્ગ ઇન્દ્રજિત્તનયોઽસ્ય વૈ ॥ ૧૨॥

ઇત્યેવં સ વિચાર્યૈવ તટે સ્થિત્વા સલક્ષ્મણઃ ।
આશ્વાસિતો વનૌકોભિરઙ્ગદાદિપુરઃ સરૈઃ ॥ ૧૩॥

એતસ્મિન્નન્તરે તત્ર રાઘવઃ શૈવસત્તમઃ ।
ઉવાચ ભ્રાતરં પ્રીત્યા જલાર્થી લક્ષ્મણાભિધમ્ ॥ ૧૪॥

શ્રીરામ ઉવાચ ।
ભ્રાતર્લક્ષ્મણ વીરેશાહં જલાર્થી પિપાસિતઃ ।
તદાનય દ્રુતં પાથો વાનરૈઃ કૈશ્ચિદેવ હિ ॥ ૧૫॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા વાનરાસ્તત્ર હ્યધાવન્ત દિશો દશ ।
નીત્વા જલં ચ તે પ્રોચુઃ પ્રણિપત્ય પુરઃ સ્થિતાઃ ॥ ૧૬॥

વાનરા ઊચુઃ ।

જલં ચ ગૃહ્યતાં સ્વામિન્નાનીતં તત્ત્વદાજ્ઞયા ।
મહોત્તમં ચ સુસ્વાદુ શીતલં પ્રાણતર્પણમ્ ॥ ૧૭॥

સૂત ઉવાચ ।
સુપ્રસન્નતરો ભૂત્વા કૃપાદૃષ્ટ્યા વિલોક્ય તાન્ ।
તચ્છ્રુત્વા રામચન્દ્રોઽસૌ સ્વયં જગ્રાહ તજ્જલમ્ ॥ ૧૮॥

સ શૈવસ્તજ્જલં નીત્વા પાતુમારબ્ધવાન્યદા ।
તદા ચ સ્મરણં જાતમિત્થમસ્ય શિવેચ્છયા ॥ ૧૯॥

ન કૃતં દર્શનં શમ્ભોર્ગૃહ્યતે ચ જલં કથમ્ ।
સ્વસ્વામિનઃ પરેશસ્ય સર્વાનન્દપ્રદસ્ય વૈ ॥ ૨૦॥

ઇત્યુક્ત્વા ચ જલં મુક્તં તદા રઘુવરેણ ચ ।
પશ્ચાચ્ચ પાર્થિવીં પૂજાં ચકાર રઘુનન્દનઃ ॥ ૨૧॥

આવાહનાદિકાંશ્ચૈવ હ્યુપચારાન્પ્રકલ્પ્ય વૈ ।
વિધિવત્ષોડશં પ્રીત્યા દેવમાનર્ચ શઙ્કરમ્ ॥ ૨૨॥

પ્રણિપાતૈઃ સ્તવૈર્દિવ્યૈઃ શિવં સન્તોષ્ય યત્નતઃ ।
પ્રાર્થયામાસ સદ્ભક્ત્યા સ રામઃ શઙ્કરં મુદા ॥ ૨૩॥

શ્રીરામ ઉવાચ ।
સ્વામિન્ શમ્ભો મહાદેવ સર્વદા ભક્તવત્સલ ।
પાહિ માં શરણાપન્નં ત્વદ્ભક્તં દીનમાનસમ્ ॥ ૨૪॥

એતજ્જલમગાધં ચ વારિધેર્ભવતારણ ।
રાવણાખ્યો મહાવીરો રાક્ષસો બલવત્તરઃ ॥ ૨૫॥

વાનરાણાં બલં હ્યેતચ્ચઞ્ચલં યુદ્ધસાધનમ્ ।
મમ કાર્યં કથં સિદ્ધં ભવિષ્યતિ પ્રિયાપ્તયે ॥ ૨૬॥

તસ્મિન્દેવ ત્વયા કાર્યં સાહાય્યં મમ સુવ્રત ।
સાહાય્યં તે વિના નાથ મમ કાર્યં હિ દુર્લભમ્ ॥ ૨૭॥

ત્વદીયો રાવણોઽપીહ દુર્જયઃ સર્વથાખિલૈઃ ।
ત્વદ્દત્તવરદૃપ્તશ્ચ મહાવીરસ્ત્રિલોકજિત્ ॥ ૨૮॥

અપ્યહં તવ દાસોઽસ્મિ ત્વદધીનશ્ચ સર્વથા ।
વિચાર્યેતિ ત્વયા કાર્યઃ પક્ષપાતઃ સદાશિવ ॥ ૨૯॥

સૂત ઉવાચ ।
ઇત્યેવં સ ચ સમ્પ્રાર્થ્ય નમસ્કૃત્ય પુનઃ પુનઃ ।
તદા જય જયેત્યુચ્ચૈરુદ્ઘોષૈઃ શઙ્કરેતિ ચ ॥ ૩૦॥

ઇતિ સ્તુત્વા શિવં તત્ર મન્ત્રધ્યાનપરાયણઃ ।
પુનઃ પૂજાં તતઃ કૃત્વા સ્વામ્યગ્રે સ નનર્ત હ ॥ ૩૧॥

પ્રેમવિક્લિન્નહૃદયો ગલ્લનાદં યદાકરોત્ ।
તદા ચ શઙ્કરો દેવઃ સુપ્રસન્નો બભૂવ હ ॥ ૩૨॥

સાઙ્ગઃ સપરિવારશ્ચ જ્યોતીરૂપો મહેશ્વરઃ ।
યથોક્તરૂપમમલં કૃત્વાવિરભવદ્ દ્રુતમ્ ॥ ૩૩॥

તતઃ સન્તુષ્ટહૃદયો રામભક્ત્યા મહેશ્વરઃ ।
શિવમસ્તુ વરં બ્રૂહિ રામેતિ સ તદાબ્રવીત્ ॥ ૩૪॥

તદ્રૂપં ચ તદા દૃષ્ટ્વા સર્વે પૂતાસ્તતઃ સ્વયમ્ ।
કૃતવાન્ રાઘવઃ પૂજાં શિવધર્મપરાયણઃ ॥ ૩૫॥

સ્તુતિં ચ વિવિધાં કૃત્વા પ્રણિપત્ય શિવં મુદા ।
જયં ચ પ્રાર્થયામાસ રાવણાજૌ તદાત્મનઃ ॥ ૩૬॥

તતઃ પ્રસન્નહૃદયો રામભક્ત્યા મહેશ્વરઃ ।
જયોઽસ્તુ તે મહારાજ પ્રીત્યા સ પુનરબ્રવીત્ ॥ ૩૭॥

શિવદત્તં જયં પ્રાપ્ય હ્યનુજ્ઞાં સમવાપ્ય ચ ।
પુનશ્ચ પ્રાર્થયામાસ સાઞ્જલિર્નતમસ્તકઃ ॥ ૩૮॥

શ્રીરામ ઉવાચ ।
ત્વયા સ્થેયમિહ સ્વામિંલ્લોકાનાં પાવનાય ચ ।
પરેષામુપકારાર્થં યદિ તુષ્ટોઽસિ શઙ્કર ॥ ૩૯॥

સૂત ઉવાચ ।
ઇત્યુક્તસ્તુ શિવસ્તત્ર લિઙ્ગરૂપોઽભવત્તદા ।
રામેશ્વરશ્ચ નામ્ના વૈ પ્રસિદ્ધો જગતીતલે ॥ ૪૦॥

રામસ્તુ તત્પ્રભાવાદ્વૈ સિન્ધુમુત્તીર્ય ચાઞ્જસા ।
રાવણાદીન્નિહત્યાશુ રાક્ષસાન્પ્રાપ તાં પ્રિયામ્ ॥ ૪૧॥

રામેશ્વરસ્ય મહિમાદ્ભુતોઽભૂદ્ભુવિ ચાતુલઃ ।

ભુક્તિમુક્તિપ્રદશ્ચૈવ સર્વદા ભક્તકામદઃ ॥ ૪૨॥

દિવ્યગઙ્ગાજલેનૈવ સ્નાપયિષ્યતિ યઃ શિવમ્ ।
રામેશ્વરં ચ સદ્ભક્ત્યા સ જીવન્મુક્ત એવ હિ ॥ ૪૩॥

ઇહ ભુક્ત્વાખિલાન્ભોગાન્દેવાનાં દુર્લભાનપિ ।
અન્તે પ્રાપ્ય પરં જ્ઞાનં કૈવલ્યં પ્રાપ્નુયાદ્ ધ્રુવમ્ ॥ ૪૪॥

ઇતિ વશ્ચ સમાખ્યાતં જ્યોતિર્લિંગં શિવસ્ય તુ ।
રામેશ્વરાભિધં દિવ્યં શૃણ્વતાં પાપહારકમ્ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં રામેશ્વરમાહાત્મ્યવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૪.૩૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૨. દ્વાત્રિંશોઽધ્યાયઃ । સુદેહાસુધર્માચરિતવર્ણનમ્ ।

સૂત ઉવાચ ।
અતઃ પરં ચ ઘુશ્મેશં જ્યોતિર્લિઙ્ગમુદાહૃતમ્ ।
તસ્યૈવ ચ સુમાહાત્મ્યં શ્રૂયતામૃષિસત્તમાઃ ॥ ૧॥

દક્ષિણસ્યાં દિશિ શ્રેષ્ઠો ગિરિર્દેવેતિ સંજ્ઞકઃ ।
મહાશોભાન્વિતો નિત્યં રાજતેઽદ્ભુતદર્શનઃ ॥ ૨॥

તસ્યૈવ નિકટે કશ્ચિદ્ભારદ્વાજકુલોદ્ભવઃ ।
સુધર્મા નામ વિપ્રશ્ચ ન્યવસદ્ બ્રહ્મવિત્તમઃ ॥ ૩॥

તસ્ય પ્રિયા સુદેહા ચ શિવધર્મપરાયણા ।
પતિસેવાપરા નિત્યં ગૃહકર્મવિચક્ષણા ॥ ૪॥

સુધર્મા ચ દ્વિજશ્રેષ્ઠો દેવતાતિથિપૂજકઃ ।
વેદમાર્ગપરો નિત્યમગ્નિસેવાપરાયણઃ ॥ ૫॥

ત્રિકાલસન્ધ્યયા યુક્તઃ સૂર્યરૂપસમદ્યુતિઃ ।
શિષ્યાણાં પાઠકશ્ચૈવ વેદશાસ્ત્રવિચક્ષણઃ ॥ ૬॥

ધનવાંશ્ચ પરો દાતા સૌજન્યગુણભાજનઃ ।

શિવકર્મરતો નિત્યં શૈવઃ શૈવજનપ્રિયઃ ॥ ૭॥

આયુર્બહુ વ્યતીયાય તસ્ય ધર્મં પ્રકુર્વતઃ ।
પુત્રશ્ચ નાભવત્તસ્ય ઋતુઃ સ્યાદફલઃ સ્ત્રિયાઃ ॥ ૮॥

તેન દુઃખં કૃતં નૈવ વસ્તુજ્ઞાનપરેણ હિ ।
આત્મનસ્તારકશ્ચાત્મા હ્યાત્મનઃ પાવનશ્ચ સઃ ॥ ૯॥

ઇત્યેવં માનસં ધૃત્વા દુઃખં ન કૃતવાન્સ્તદા ।
સુદેહા ચ તદા દુઃખં ચકારાપુત્રસમ્ભવમ્ ॥ ૧૦॥

નિત્યં ચ સ્વામિનં સા વૈ પ્રાર્થયદ્યત્નસાધને ।
પુત્રોત્પાદનહેતોશ્ચ સર્વવિદ્યાવિશારદમ્ ॥ ૧૧॥

સોઽપિ સ્ત્રિયં તદાભર્ત્સ્ય કિં પુત્રશ્ચ કરિષ્યતિ ।
કા માતા કઃ પિતા પુત્રઃ કો બન્ધુશ્ચ પ્રિયશ્ચ કઃ ॥ ૧૨॥

સર્વં સ્વાર્થપરં દેવિ ત્રિલોક્યાં નાત્ર સંશયઃ ।
જાનીહિ ત્વં વિશેષેણ બુદ્ધ્યા શોકં ન વૈ કુરુ ॥ ૧૩॥

તસ્માદ્દેવિ ત્વયા દુઃખં ત્યજનીયં સુનિશ્ચિતમ્ ।
નિત્યં મહ્યં ત્વયા નૈવ કથનીયં શુભવ્રતે ॥ ૧૪॥

એવં તાં સન્નિવાર્યૈવ ભગવદ્ધર્મતત્પરઃ ।
આસીત્પરમસન્તુષ્ટો દ્વન્દ્વદુઃખં સમત્યજત્ ॥ ૧૫॥

કદાચિચ્ચ સુદેહા વૈ ગેહે ચ સહવાસિનઃ ।
જગામ પ્રિયગોષ્ઠ્યર્થં વિવાદસ્તત્ર સઙ્ગતઃ ॥ ૧૬॥

તત્પત્ની સ્ત્રીસ્વભાવાચ્ચ ભર્ત્સિતા સા તયા તદા ।
ઉક્તા ચેતિ દુરુક્ત્યા વૈ સુદેહા વિપ્રકામિની ॥ ૧૭॥

પત્ન્યુવાચ ।
અપુત્રિણિ કથં ગર્વં કુરુષે પુત્રિણી હ્યહમ્ ।
મદ્ધનં ભોક્ષ્યતે પુત્રો ધનં તે કશ્ચ ભોક્ષ્યતે ॥ ૧૮॥

નૂનં હરિષ્યતે રાજા ત્વદ્ધનં નાત્ર સંશયઃ ।
ધિગ્ધિક્ત્વાં તે ધનં ધિક્ચ ધિક્ તે માનં હિ વન્ધ્યકે ॥ ૧૯॥

સૂત ઉવાચ ।
ભર્ત્સિતા તાભિરિતિ સા ગૃહમાગત્ય દુઃખિતા ।

સ્વામિને કથયામાસ તદુક્તં સર્વમાદરાત્ ॥ ૨૦॥

બ્રાહ્મણોઽપિ તદા દુઃખં ન ચકાર સુબુદ્ધિમાન્ ।
કથિતં કથ્યતામેવ યદ્ભાવિ તદ્ભવેત્પ્રિયે ॥ ૨૧॥

ઇત્યેવં ચ તદા તેન હ્યાશ્વસ્તાપિ પુનઃ પુનઃ ।
ન તદા સાત્યજદ્દુઃખં હ્યાગ્રહં કૃતવત્યસૌ ॥ ૨૨॥

સુદેહોવાચ ॥

યથા તથા ત્વયા પુત્રઃ સમુત્પાદ્યઃ પ્રિયોઽસિ મે ।
ત્યક્ષ્યામિ હ્યન્યથાહં ચ દેહં દેહભૃતાં વર ॥ ૨૩॥

સૂત ઉવાચ ।
એવમુક્તં તયા શ્રુત્વા સુધર્મા બ્રાહ્મણોત્તમઃ ।
શિવં સસ્માર મનસા તદાગ્રહનિપીડિતઃ ॥ ૨૪॥

અગ્નેરગ્રેઽક્ષિપત્પુષ્પદ્વયં વિપ્રો હ્યતન્દ્રિતઃ ।
મનસા દક્ષિણં પુષ્પં તન્મેને પુત્રકામદમ્ ॥ ૨૫॥

એવં કૃત્વા પણં પત્નીમુવાચ બ્રાહ્મણઃ સ ચ ।
અનયોર્ગ્રાહ્યમેકં તે પુષ્પં પુત્રફલાપ્તયે ॥ ૨૬॥

તયા ચ મનસા ધૃત્વા પુત્રશ્ચૈવ ભવેન્મમ ।
તદા ચ સ્વામિના યચ્ચ ધૃતં પુષ્પં સમેતુ મામ્ ॥ ૨૭॥

ઇત્યુક્ત્વા ચ તયા તત્ર નમસ્કૃત્ય શિવં તદા ।
નત્વા ચાગ્નિં પુનઃ પ્રાર્થ્ય ગૃહીતં પુષ્પમેકકમ્ ॥ ૨૮॥

સ્વામિના ચિન્તિતં યચ્ચ તદ્ ગૃહીતં તયા ન હિ ।
સુદેહયા વિમોહેન શિવેચ્છાસમ્ભવેન વૈ ॥ ૨૯॥

તદ્ દૃષ્ટ્વા પુરુષશ્ચૈવ નિઃશ્વાસં પર્યમોચયત્ ।
સ્મૃત્વા શિવપદામ્ભોજમુવાચ નિજકામિનીમ્ ॥ ૩૦॥

સુધર્મોવાચ ।
નિર્મિતં ચેશ્વરેણૈવ કથં ચૈવાન્યથા ભવેત્ ।
આશાં ત્યજ પ્રિયે ત્વં ચ પરિચર્યાં કુરુ પ્રભોઃ ॥ ૩૧॥

ઇત્યુક્ત્વા તુ સ્વયં વિપ્ર આશાં પરિવિહાય ચ ।
ધર્મકાર્યરતઃ સોઽભૂચ્છઙ્કરધ્યાનતત્પરઃ ॥ ૩૨॥

સા સુદેહાગ્રહં નૈવ મુમોચાત્મજકામ્યયા ।
પ્રત્યુવાચ પતિં પ્રેમ્ણા સાઞ્જલિર્નતમસ્તકા ॥ ૩૩॥

સુદેહોવાચ ।
મયિ પુત્રો ન ચાસ્ત્વન્યાં પત્નીં કુરુ મદાજ્ઞયા ।
તસ્યાં નૂનં સુતશ્ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૩૪॥

સૂત ઉવાચ ।
તદૈવ પ્રર્થિતો વૈ સ બ્રહ્મણઃ શૈવસત્તમઃ ।
ઉવાચ સ્વપ્રિયાં તાં ચ સુદેહાં ધર્મતત્પરઃ ॥ ૩૫॥

સુધર્મોવાચ ।
ત્વદીયં ચ મદીયં ચ સર્વં દુઃખં ગતં ધ્રુવમ્ ।
તસ્માત્ત્વં ધર્મવિઘ્નં ચ પ્રિયે મા કુરુ સામ્પ્રતમ્ ॥ ૩૬॥

સૂત ઉવાચ ।
ઇત્યેવં વારિતા સા ચ સ્વમાતુઃ પુત્રિકાં તદા ।
ગૃહમાનીય ભર્તારં વૃણુ ત્વેનામિદં જગૌ ॥ ૩૭॥

સુધર્મોવાચ ।
ઇદાનીં વદસિ ત્વં ચ મત્પ્રિયેયં તતઃ પુનઃ ।
પુત્રસૂશ્ચ યદા સ્યાદ્વૈ તદા સ્પર્ધાં કરિષ્યસિ ॥ ૩૮॥

સૂત ઉવાચ ।
ઇત્યુક્તા તેન પતિના સા સુદેહા ચ તત્પ્રિયા ।
પુનઃ પ્રાહ કરૌ બદ્ધ્વા સુધર્માણં પતિં દ્વિજાઃ ॥ ૩૯॥

નાહં સ્પર્ધાં ભગિન્યા વૈ કરિષ્યે દ્વિજસત્તમ ।
ઉપયચ્છસ્વ પુત્રાર્થમિમામાજ્ઞાપયામિ ચ ॥ ૪૦॥

ઇત્યેવં પ્રાર્થિતઃ સોઽપિ સુધર્મા પ્રિયયા તયા ।
ઘુશ્માં તાં સમુપાયંસ્ત વિવાહવિધિના દ્વિજઃ ॥ ૪૧॥

તતસ્તાં પરિણીયાથ પ્રાર્થયામાસ તાં દ્વિજઃ ।
ત્વદીયેયં કનિષ્ઠા હિ સદા પોષ્યાઽનઘે પ્રિયે ॥ ૪૨॥

ઉક્ત્વૈવં સ ચ ધર્માત્મા સુધર્મા શૈવસત્તમઃ ।
યથાયોગ્યં ચકારાશુ ધર્મસઙ્ગ્રહમાત્મનઃ ॥ ૪૩॥

સા ચાપિ માતૃપુત્રીં તાં સખીવત્પર્યવર્ત્તત ।
પરિત્યજ્ય વિરોધં હિ પુપોષાહર્નિશં પ્રિયા ॥ ૪૪॥

કનિષ્ઠા ચૈવ યા પત્ની સ્વસ્રનુજ્ઞામવાપ્ય ચ ।
પાર્થિવાન્સા ચકારાશુ નિત્યમેકોત્તરં શતમ્ ॥ ૪૫॥

વિધાનપૂર્વકં ઘુશ્મા સોપચારસમન્વિતમ્ ।
કૃત્વા તાન્પ્રાક્ષિપત્તત્ર તડાગે નિકટસ્થિતે ॥ ૪૬॥

એવં નિત્યં સા ચકાર શિવપૂજાં સ્વકામદામ્ ।
વિસૃજ્ય પુનરાવાહ્ય તત્સપર્ય્યાવિધાનતઃ ॥ ૪૭॥

કુર્વન્ત્યા નિત્યમેવં હિ તસ્યાઃ શઙ્કરપૂજનમ્ ।
લક્ષસઙ્ખ્યાભવત્પૂર્ણા સર્વકામફલપ્રદા ॥ ૪૮॥

કૃપયા શઙ્કરસ્યૈવ તસ્યાઃ પુત્રો વ્યજાયત ।
સુન્દરઃ સુભગશ્ચૈવ કલ્યાણગુણભાજનઃ ॥ ૪૯॥

તં દૃષ્ટ્વા પરમપ્રીતઃ સ વિપ્રો ધર્મવિત્તમઃ ।
અનાસક્તઃ સુખં ભેજે જ્ઞાનધર્મપરાયણઃ ॥ ૫૦॥

સુદેહા તાવદસ્યાસ્તુ સ્પર્ધામુગ્રાં ચકાર સા ।
પ્રથમં શીતલં તસ્યા હૃદયં હ્યસિવત્પુનઃ ॥ ૫૧॥

તતઃ પરં ચ યજ્જાતં કુત્સિતં કર્મ દુઃખદમ્ ।
સાવધાનેન મનસા શ્રૂયતાં તન્મુનીશ્વરાઃ ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ઘુશ્મેશ્વરમાહાત્મ્યે સુદેહાસુધર્માચરિતવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૪.૩૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૩. ત્રયસ્ત્રિંશોઽધ્યાયઃ । ઘુશ્મેશજ્યોતિર્લિઙ્ગોત્પત્તિમાહાત્મ્યવર્ણનમ્ ।

સૂત ઉવાચ ।

પુત્રં દૃષ્ટ્વા કનિષ્ઠાયા જ્યેષ્ઠા દુઃખમુપાગતા ।
વિરોધં સા ચકારાશુ ન સહન્તી ચ તત્સુખમ્ ॥ ૧॥

સર્વે પુત્રપ્રસૂતિં તાં પ્રશસંસુર્નિરન્તરમ્ ।
તયા તત્સહ્યતે ન સ્મ શિશો રૂપાદિકં તથા ॥ ૨॥

સુપ્રિયં તનયં તં ચ પિત્રોઃ સદ્ગુણભાજનમ્ ।
દૃષ્ટ્વાભવત્તદા તસ્યા હૃદયં તપ્તમગ્નિવત્ ॥ ૩॥

એતસ્મિન્નન્તરે વિપ્રાઃ કન્યાં દાતું સમાગતાઃ ।
વિવાહં તસ્ય તત્રૈવ ચકાર વિધિવચ્ચ સઃ ॥ ૪॥

સુધર્મા ઘુશ્મયા સાર્ધમાનન્દં પરં ગતઃ ।
સર્વે સમ્બન્ધિનસ્તસ્યાં ઘુશ્માયાં માનમાદધુઃ ॥ ૫॥

તં દૃષ્ટ્વા સા સુદેહા હિ મનસિ જ્વલિતા તદા ।
અત્યન્તં દુઃખમાપન્ના હા હતાસ્મીતિ વાદિની ॥ ૬॥

સુધર્મા ગૃહમાગત્ય વધૂં પુત્રં વિવાહિતમ્ ।
ઉત્સાહં દર્શયામાસ પ્રિયાભ્યાં હર્ષયન્નિવ ॥ ૭॥

અભવદ્ હર્ષિતા ઘુશ્મા સુદેહા દુઃખમાગતા ।
ન સહન્તી સુખં તચ્ચ દુઃખં કૃત્વાપતદ્ભુવિ ॥ ૮॥

ઘુશ્માવદદ્વધૂપુત્રૌ ત્વદીયૌ ન મદીયકૌ ।
વધૂઃ પુત્રશ્ચ તાં પ્રીત્યા પ્રસૂં શ્વશ્રૂમમન્યત ॥ ૯॥

ભર્તા પ્રિયાં તાં જ્યેષ્ઠાં ચ મેને નૈવ કનિષ્ઠિકામ્ ।
તથાપિ સા તદા જ્યેષ્ઠા સ્વાન્તર્મલવતી હ્યભૂત્ ॥ ૧૦॥

એકસ્મિન્દિવસે જ્યેષ્ઠા સા સુદેહા ચ દુઃખિની ।
હૃદયે સઞ્ચિચિન્તેતિ દુઃખશાન્તિઃ કથં ભવેત્ ॥ ૧૧॥

સુદેહોવાચ ।
મદીયો હૃદયાગ્નિશ્ચ ઘુશ્માનેત્રજલેન વૈ ।
ભવિષ્યતિ ધ્રુવં શાન્તો નાન્યથા દુઃખજેન હિ ॥ ૧૨॥

અતોઽહં મારયામ્યદ્ય તત્પુત્રં પ્રિયવાદિનમ્ ।
અગ્રે ભાવિ ભવેદેવં નિશ્ચયઃ પરમો મમ ॥ ૧૩॥

સૂત ઉવાચ ।

કદર્યાણાં વિચારશ્ચ કૃત્યાકૃત્યે ભવેન્નહિ ।
કઠોરઃ પ્રાયશો વિપ્રાઃ સાપત્નો ભાવ આત્મહા ॥ ૧૪॥

એકસ્મિન્દિવસે જ્યેષ્ઠા સુપ્તં પુત્રં વધૂયુતમ્ ।
ચિચ્છિદે નિશિ ચાઙ્ગેષુ ગૃહીત્વા છુરિકાં ચ સા ॥ ૧૫॥

સર્વાઙ્ગં ખણ્ડયામાસ રાત્રૌ ઘુશ્માસુતસ્ય સા ।
નીત્વા સરસિ તત્રૈવાક્ષિપદ્ દૃપ્તા મહાબલા ॥ ૧૬॥

યત્ર ક્ષિપ્તાનિ લિઙ્ગાનિ ઘુશ્મયા નિત્યમેવ હિ ।
તત્ર ક્ષિપ્ત્વા સમાયાતા સુષ્વાપ સુખમાગતા ॥ ૧૭॥

પ્રાતશ્ચૈવ સમુત્થાય ઘુશ્મા નિત્યં તથાકરોત્ ।
સુધર્મા ચ સ્વયં શ્રેષ્ઠો નિત્યકર્મ સમાચરત્ ॥ ૧૮॥

એતસ્મિન્નન્તરે સા ચ જ્યેષ્ઠા કાર્યં ગૃહસ્ય વૈ ।
ચકારાનન્દસંયુક્તા સુશાન્તહૃદયાનલા ॥ ૧૯॥

પ્રાતઃકાલે સમુત્થાય વધૂઃ શય્યાં વિલોક્ય સા ।
રુધિરાર્દ્રાં દેહખણ્ડૈર્યુક્તાં દુઃખમુપાગતા ॥ ૨૦॥

શ્વશ્રૂં નિવેદયામાસ પુત્રસ્તે ચ કુતો ગતઃ ।
શય્યા ચ રુધિરાર્દ્રા વૈ દૃશ્યન્તે દેહખણ્ડકાઃ ॥ ૨૧॥

હા હતાસ્મિ કૃતં કેન દુષ્ટં કર્મ શુચિવ્રતે ।
ઇત્યુચ્ચાર્ય રુરોદાતિ વિવિધં તત્પ્રિયા ચ સા ॥ ૨૨॥

જ્યેષ્ઠા દુઃખં તદાપન્ના હા હતાસ્મિ કિલેતિ ચ ।
બહિર્દુઃખં ચકારાસૌ મનસા હર્ષસંયુતા ॥ ૨૩॥

ઘુશ્મા ચાપિ તદા તસ્યા વધ્વા દુઃખં નિશમ્ય સા ।
ન ચચાલ વ્રતાત્તસ્માન્નિત્યપાર્થિવપૂજનાત્ ॥ ૨૪॥

મનશ્ચૈવોત્સુકં નૈવ જાતં તસ્યા મનાગપિ ।
ભર્તાપિ ચ તથૈવાસીદ્યાવદ્ વ્રતવિધિર્ભવેત્ ॥ ૨૫॥

મધ્યાહ્ને પૂજનાન્તે ચ દૃષ્ટ્વા શય્યાં ભયાવહામ્ ।
તથાપિ ન તદા કિઞ્ચિત્કૃતં દુઃખં હિ ઘુશ્મયા ॥ ૨૬॥

યેનૈવ ચાર્પિતશ્ચાયં સ વૈ રક્ષાં કરિષ્યતિ ।
ભક્તપ્રિયઃ સ વિખ્યાતઃ કાલકાલઃ સતાં ગતિઃ ॥ ૨૭॥

યદિ નો રક્ષિતા શમ્ભુરીશ્વરઃ પ્રભુરેકલઃ ।
માલાકાર ઇવાસૌ યાન્યુડ્ક્તે તાન્વિયુનક્તિ ચ ॥ ૨૮॥

અથ મે ચિન્તયા કિં સ્યાદિતિ તત્ત્વં વિચાર્ય સા ।
ન ચકાર તદા દુઃખં શિવે ધૈર્યં સમાગતા ॥ ૨૯॥

પાર્થિવાંશ્ચ ગૃહીત્વા સા પૂર્વવત્સ્વસ્થમાનસા ।
શમ્ભોર્નામાન્યુચ્ચરન્તી જગામ સરસસ્તટે ॥ ૩૦॥

ક્ષિપ્ત્વા ચ પાર્થિવાંસ્તત્ર પરાવર્તત સા યદા ।
તદા પુત્રસ્તડાગસ્થો દૃશ્યતે સ્મ તટે તયા ॥ ૩૧॥

પુત્ર ઉવાચ ।
માતરેહિ મિલિષ્યામિ મૃતોઽહં જીવિતોઽધુના ।
તવ પુણ્યપ્રભાવાદ્ધિ કૃપયા શઙ્કરસ્ય વૈ ॥ ૩૨॥

સૂત ઉવાચ ।
જીવિતં તં સુતં દૃષ્ટ્વા ઘુશ્મા સા તત્પ્રસૂર્દ્વિજાઃ ।
પ્રહૃષ્ટા નાભવત્તત્ર દુઃખિતા ન યથા પુરા ॥ ૩૩॥

એતસ્મિન્સમયે તત્ર સ્વાવિરાસીચ્છિવો દ્રુતમ્ ।
જ્યોતીરૂપો મહેશશ્ચ સન્તુષ્ટઃ પ્રત્યુવાચ હ ॥ ૩૪॥

શિવ ઉવાચ ।
પ્રસન્નોઽસ્મિ વરં બ્રૂહિ દુષ્ટયા મારિતો હ્યયમ્ ।
એનાં ચ મારયિષ્યામિ ત્રિશૂલેન વરાનને ॥ ૩૫॥

સૂત ઉવાચ ।
ઘુશ્મા તદા વરં વવ્રે સુપ્રણમ્ય શિવં નતા ।
રક્ષણીયા ત્વયા નાથ સુદેહેયં સ્વસા મમ ॥ ૩૬॥

શિવ ઉવાચ ।
અપકારઃ કૃતસ્તસ્યામુપકારઃ કથં ત્વયા ।
ક્રિયતે હનનીયા ચ સુદેહા દુષ્ટકારિણી ॥ ૩૭॥

ઘુશ્મોવાચ ॥

તવ દર્શનમાત્રેણ પાતકં નૈવ તિષ્ઠતિ ।

ઇદાનીં ત્વાં ચ વૈ દૃષ્ટ્વા તત્પાપં ભસ્મતાં વ્રજેત્ ॥ ૩૮॥

અપકારેષુ યશ્ચૈવ હ્યુપકારં કરોતિ ચ ।
તસ્ય દર્શનમાત્રેણ પાપં દૂરતરં વ્રજેત્ ॥ ૩૯॥

ઇતિ શ્રુતં મયા દેવ ભગવદ્વાક્યમદ્ભુતમ્ ।
તસ્માચ્ચૈવં કૃતં યેન ક્રિયતાં ચ સદાશિવ ॥ ૪૦॥

સૂત ઉવાચ ।
ઇત્યુક્તસ્તુ તયા તત્ર પ્રસન્નોઽત્યભવત્પુનઃ ।
મહેશ્વરઃ કૃપાસિન્ધુઃ તામૂચે ભક્તવત્સલઃ ॥ ૪૧॥

શિવ ઉવાચ ।
અન્યદ્વરં બ્રૂહિ ઘુશ્મે દદામિ ચ હિતં તવ ।
ત્વદ્ભક્ત્યા સુપ્રસન્નોઽસ્મિ નિર્વિકારસ્વભાવતઃ ॥ ૪૨॥

સૂત ઉવાચ ।
સોવાચ તદ્વચઃ શ્રુત્વા યદિ દેવો વરસ્ત્વયા ।
લોકાનાં ચૈવ રક્ષાર્થમત્ર સ્થેયં મદાખ્યયા ॥ ૪૩॥

તદોવાચ શિવસ્તત્ર સુપ્રસન્નો મહેશ્વરઃ ।
સ્થાસ્યેઽત્ર તવ નામ્નાહં ઘુશ્મેશાખ્યઃ સુખપ્રદઃ ॥ ૪૪॥

ઘુશ્મેશાખ્યં સુપ્રસિદ્ધં લિઙ્ગં મે જાયતાં શુભમ્ ।
ઇદં સરસ્તુ લિઙ્ગાનામાલયં જાયતાં સદા ॥ ૪૫॥

તસ્માચ્છિવાલયં નામ પ્રસિદ્ધં ભુવનત્રયે ।
સર્વકામપ્રદં હ્યેતદ્દર્શનાત્સ્યાત્સદા સરઃ ॥ ૪૬॥

તવ વંશે શતં ચૈકં પુરુષાવધિ સુવ્રતે ।
ઈદૃશાઃ પુત્રકાઃ શ્રેષ્ઠા ભવિષ્યન્તિ ન સંશયઃ ॥ ૪૭॥

સુસ્ત્રીકાઃ સુધનાશ્ચૈવ સ્વાયુષ્યાશ્ચ વિચક્ષણાઃ ।
વિદ્યાવન્તો હ્યુદારાશ્ચ ભુક્તિમુક્તિફલાપ્તયે ॥ ૪૮॥

શતમેકોત્તરં ચૈવ ભવિષ્યન્તિ ગુણાધિકાઃ ।
ઈદૃશો વંશવિસ્તારો ભવિષ્યતિ સુશોભનઃ ॥ ૪૯॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા ચ શિવસ્તત્ર લિઙ્ગરૂપોઽભવત્તદા ।

ઘુશ્મેશો નામ વિખ્યાતઃ સરશ્ચૈવ શિવાલયમ્ ॥ ૫૦॥

સુધર્મા સ ચ ઘુશ્મા ચ સુદેહા ચ સમાગતાઃ ।
પ્રદક્ષિણં શિવસ્યાશુ શતમેકોત્તરં દધુઃ ॥ ૫૧॥

પૂજાં કૃત્વા મહેશસ્ય મિલિત્વા ચ પરસ્પરમ્ ।
હિત્વા ચાન્તર્મલં તત્ર લેભિરે પરમં સુખમ્ ॥ ૫૨॥

પુત્રં દૃષ્ટ્વા સુદેહા સા જીવિતં લજ્જિતાભવત્ ।
તૌ ક્ષમાપ્યાચરદ્વિપ્રા નિજપાપાપહં વ્રતમ્ ॥ ૫૩॥

ઘુશ્મેશાખ્યમિદં લિઙ્ગમિત્થં જાતં મુનીશ્વરાઃ ।
તદ્ દૃષ્ટ્વા પૂજયિત્વા હિ સુખં સંવર્ધતે સદા ॥ ૫૪॥

ઇતિ વશ્ચ સમાખ્યાતા જ્યોતિર્લિઙ્ગાવલી મયા ।
દ્વાદશપ્રમિતા સર્વકામદા ભુક્તિમુક્તિદા ॥ ૫૫॥

એતજ્જ્યોતિર્લિઙ્ગકથાં યઃ પઠેચ્છૃણુયાદપિ ।
મુચ્યતે સર્વપાપેભ્યો ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં ઘુશ્મેશજ્યોતિર્લિઙ્ગોત્પત્તિમાહાત્મ્યવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૪.૩૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૪. ચતુસ્ત્રિંશોઽધ્યાયઃ । વિષ્ણુસુદર્શનચક્રલાભવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય સૂતસ્ય ચ મુનીશ્વરાઃ ।
સમૂચુસ્તં સુપ્રશસ્ય લોકાનાં હિતકામ્યયા ॥ ૧॥

ઋષય ઊચુઃ ।
સૂત સર્વં વિજાનાસિ તતઃ પૃચ્છામહે વયમ્ ।
હરીશ્વરસ્ય લિઙ્ગસ્ય મહિમાનં વદ પ્રભો ॥ ૨॥

ચક્રં સુદર્શનં પ્રાપ્તં વિષ્ણુનેતિ શ્રુતં પુરા ।

તદારાધનતસ્તાત તત્કથાં ચ વિશેષતઃ ॥ ૩॥

સૂત ઉવાચ ।
શ્રૂયતાં ચ ઋષિશ્રેષ્ઠા હરીશ્વરકથા શુભા ।
યતઃ સુદર્શનં લબ્ધં વિષ્ણુના શઙ્કરાત્પુરા ॥ ૪॥

કસ્મિંશ્ચિત્સમયે દૈત્યાઃ સઞ્જાતા બલવત્તરાઃ ।
લોકાંસ્તે પીડયામાસુર્ધર્મલોપં ચ ચક્રિરે ॥ ૫॥

તે દેવાઃ પીડિતા દૈત્યૈર્મહાબલપરાક્રમૈઃ ।
સ્વં દુઃખં કથયામાસુર્વિષ્ણું નિર્જરરક્ષકમ્ ॥ ૬॥

દેવા ઊચુઃ ।
કૃપાં કુરુ પ્રભો ત્વં ચ દૈત્યૈઃ સમ્પીડિતા ભૃશમ્ ।
કુત્ર યામશ્ચ કિં કુર્મઃ શરણ્યં ત્વાં સમાશ્રિતાઃ ॥ ૭॥

સૂત ઉવાચ ।
ઇત્યેવં વચનં શ્રુત્વા દેવાનાં દુઃખિતાત્મનામ્ ।
સ્મૃત્વા શિવપદામ્ભોજં વિષ્ણુર્વચનમબ્રવીત્ ॥ ૮॥

વિષ્ણુરુવાચ ।
કરિષ્યામિ ચ વઃ કાર્યમારાધ્ય ગિરિશં સુરાઃ ।
બલિષ્ઠાઃ શત્રવો હ્યેતે વિજેતવ્યાઃ પ્રયત્નતઃ ॥ ૯॥

સૂત ઉવાચ ।
ઇત્યુક્તાસ્તે સુરાઃ સર્વે વિષ્ણુના પ્રભવિષ્ણુના ।
મત્વા દૈત્યાન્હતાન્દુષ્ટાન્યયુર્ધામ સ્વકં સ્વકમ્ ॥ ૧૦॥

વિષ્ણુરપ્યમરાણાં તુ જયાર્થમભજચ્છિવમ્ ।
સર્વામરાણામધિપં સર્વસાક્ષિણમવ્યયમ્ ॥ ૧૧॥

ગત્વા કૈલાસનિકટે તપસ્તેપે હરિઃ સ્વયમ્ ।
કૃત્વા કુણ્ડં ચ સંસ્થાપ્ય જાતવેદસમગ્રતઃ ॥ ૧૨॥

પાર્થિવેન વિધાનેન મન્ત્રૈર્નાનાવિધૈરપિ ।
સ્તોત્રૈશ્ચૈવાપ્યનેકૈશ્ચ ગિરિશં ચાભજન્મુદા ॥ ૧૩॥

કમલૈઃ સરસો જાતૈર્માનસાખ્યાન્મુનીશ્વરાઃ ।
બદ્ધ્વા ચૈવાસનં તત્ર ન ચચાલ હરિઃ સ્વયમ્ ॥ ૧૪॥

પ્રસાદાવધિ ચૈવાત્ર સ્થેયં વૈ સર્વથા મયા ।
ઇત્યેવં નિશ્ચયં કૃત્વા સમાનર્ચ શિવં હરિઃ ॥ ૧૫॥

યદા નૈવ હરસ્તુષ્ટો બભૂવ હરયે દ્વિજાઃ ।
તદા સ ભગવાન્વિષ્ણુર્વિચારે તત્પરોઽભવત્ ॥ ૧૬॥

વિચાર્યૈવં સ્વમનસિ સેવનં બહુધા કૃતમ્ ।
તથાપિ ન હરસ્તુષ્ટો બભૂવોતિકરઃ પ્રભુઃ ॥ ૧૭॥

તતઃ સુવિસ્મિતો વિષ્ણુર્ભક્ત્યા પરમયાન્વિતઃ ।
સહસ્રૈર્નામભિઃ પ્રીત્યા તુષ્ટાવ પરમેશ્વરમ્ ॥ ૧૮॥

પ્રત્યેકં કમલં તસ્મૈ નામમન્ત્રમુદીર્ય ચ ।
પૂજયામાસ વૈ શમ્ભું શરણાગતવત્સલમ્ ॥ ૧૯॥

પરીક્ષાર્થં વિષ્ણુભક્તેસ્તદા વૈ શઙ્કરેણ હ ।
કમલાનાં સહસ્રાત્તુ હૃતમેકં ચ નીરજમ્ ॥ ૨૦॥

ન જ્ઞાતં વિષ્ણુના તચ્ચ માયાકારણમદ્ભુતમ્ ।
ન્યૂનં તચ્ચાપિ સંજ્ઞાય તદન્વેષણતત્પરઃ ॥ ૨૧॥

બભ્રામ સકલાં પૃથ્વીં તત્પ્રીત્યૈ સુદૃઢવ્રતઃ ।
તદપ્રાપ્ય વિશુદ્ધાત્મા નેત્રમેકમુદાહરત્ ॥ ૨૨॥

તં દૃષ્ટ્વા સ પ્રસન્નોઽભૂચ્છઙ્કરઃ સર્વદુઃખહા ।
આવિર્બભૂવ તત્રૈવ જગાદ વચનં હરિમ્ ॥ ૨૩॥

શિવ ઉવાચ ।
પ્રસન્નોઽસ્મિ હરે તુભ્યં વરં બ્રૂહિ યથેપ્સિતમ્ ।
મનોઽભિલષિતં દદ્મિ નાદેયં વિદ્યતે તવ ॥ ૨૪॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા શમ્ભુવચનં કેશવઃ પ્રીતમાનસઃ ।
મહાહર્ષસમાપન્નો હ્યબ્રવીત્સાઞ્જલિઃ શિવમ્ ॥ ૨૫॥

વિષ્ણુરુવાચ ।
વાચ્યં કિં મે ત્વદગ્રે વૈ હ્યન્તર્યામી ત્વમાસ્થિતઃ ।
તથાપિ કથ્યતે નાથ તવ શાસનગૌરવાત્ ॥ ૨૬॥

દૈત્યૈશ્ચ પીડિતં વિશ્વં સુખં નો નઃ સદાશિવ ।

દૈત્યાન્ હન્તું મમ સ્વામિન્સ્વાયુધં ન પ્રવર્તતે ॥ ૨૭॥

કિં કરોમિ ક્વ ગચ્છામિ નાન્યો મે રક્ષકઃ પરઃ ।
અતોઽહં પરમેશાન શરણં ત્વાં સમાગતઃ ॥ ૨૮॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા ચ નમસ્કૃત્ય શિવાય પરમાત્મને ।
સ્થિતશ્ચૈવાગ્રતઃ શમ્ભોઃ સ્વયં ચ પુરુપીડિતઃ ॥ ૨૯॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચો વિષ્ણોર્દેવદેવો મહેશ્વરઃ ।
દદૌ તસ્મૈ સ્વકં ચક્રં તેજોરાશિં સુદર્શનમ્ ॥ ૩૦॥

તત્પ્રાપ્ય ભગવાન્વિષ્ણુર્દૈત્યાંસ્તાન્બલવત્તરાન્ ।
જઘાન તેન ચક્રેણ દ્રુતં સર્વાન્વિના શ્રમમ્ ॥ ૩૧॥

જગત્સ્વાસ્થ્યં પરં લેભે બભૂવુઃ સુખિનઃ સુરાઃ ।
સુપ્રીતઃ સ્વાયુધં પ્રાપ્ય હરિરાસીન્મહાસુખી ॥ ૩૨॥

ઋષય ઊચુઃ ॥

કિં તન્નામસહસ્રં વૈ કથય ત્વં હિ શાઙ્કરમ્ ।
યેન તુષ્ટો દદૌ ચક્રં હરયે સ મહેશ્વરઃ ॥ ૩૩॥

તન્માહાત્મ્યં મમ બ્રૂહિ શિવસંવાદપૂર્વકમ્ ।
કૃપાલુત્વં ચ શમ્ભોર્હિ વિષ્ણૂપરિ યથાતથમ્ ॥ ૩૪॥

વ્યાસ ઉવાચ ।
ઇતિ તેષાં વચઃ શ્રુત્વા મુનીનાં ભાવિતાત્મનામ્ ।
સ્મૃત્વા શિવપદામ્ભોજં સૂતો વચનમબ્રવીત્ ॥ ૩૫॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં વિષ્ણુસુદર્શનચક્રલાભવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૪.૩૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૫. પઞ્ચત્રિંશોઽધ્યાયઃ । શિવસહસ્રનામવર્ણનમ્ ।

સૂત ઉવાચ ।
શ્રૂયતાં ભો ઋષિશ્રેષ્ઠા યેન તુષ્ટો મહેશ્વરઃ ।
તદહં કથયામ્યદ્ય શૈવં નામસહસ્રકમ્ ॥ ૧॥

શ્રીવિષ્ણુરુવાચ ।
શિવો હરો મૃડો રુદ્રઃ પુષ્કરઃ પુષ્પલોચનઃ ।
અર્થિગમ્યઃ સદાચારઃ શર્વઃ શમ્ભુર્મહેશ્વરઃ ॥ ૨॥

ચન્દ્રાપીડશ્ચન્દ્રમૌલિર્વિશ્વં વિશ્વમ્ભરેશ્વરઃ ।
વેદાન્તસારસન્દોહઃ કપાલી નીલલોહિતઃ ॥ ૩॥

ધ્યાનાધારોઽપરિચ્છેદ્યો ગૌરીભર્તા ગણેશ્વરઃ ।
અષ્ટમૂર્તિર્વિશ્વમૂર્તિસ્ત્રિવર્ગસ્વર્ગસાધનઃ ॥ ૪॥

જ્ઞાનગમ્યો દૃઢપ્રજ્ઞો દેવદેવસ્ત્રિલોચનઃ ।
વામદેવો મહાદેવઃ પટુઃ પરિવૃઢો દૃઢઃ ॥ ૫॥

વિશ્વરૂપો વિરૂપાક્ષો વાગીશઃ શુચિસત્તમઃ ।
સર્વપ્રમાણસંવાદી વૃષાઙ્કો વૃષવાહનઃ ॥ ૬॥

ઈશઃ પિનાકી ખટ્વાઙ્ગી ચિત્રવેષશ્ચિરન્તનઃ ।
તમોહરો મહાયોગી ગોપ્તા બ્રહ્મા ચ ધૂર્જટિઃ ॥ ૭॥

કાલકાલઃ કૃત્તિવાસાઃ સુભગઃ પ્રણવાત્મકઃ ।
ઉન્નધ્રઃ પુરુષો જુષ્યો દુર્વાસાઃ પુરશાસનઃ ॥ ૮॥

દિવ્યાયુધઃ સ્કન્દગુરુઃ પરમેષ્ઠી પરાત્પરઃ ।
અનાદિમધ્યનિધનો ગિરીશો ગિરિજાધવઃ ॥ ૯॥

કુબેરબન્ધુઃ શ્રીકણ્ઠો લોકવર્ણોત્તમો મૃદુઃ ।
સમાધિવેદ્યઃ કોદણ્ડી નીલકણ્ઠઃ પરશ્વધી ॥ ૧૦॥

વિશાલાક્ષો મૃગવ્યાધઃ સુરેશઃ સૂર્યતાપનઃ ।
ધર્મધામ ક્ષમાક્ષેત્રં ભગવાન્ ભગનેત્રભિત્ ॥ ૧૧॥

ઉગ્રઃ પશુપતિસ્તાર્ક્ષ્યઃ પ્રિયભક્તઃ પરન્તપઃ ।
દાતા દયાકરો દક્ષઃ કપર્દી કામશાસનઃ ॥ ૧૨॥

શ્મશાનનિલયઃ સૂક્ષ્મઃ શ્મશાનસ્થો મહેશ્વરઃ ।

લોકકર્તા મૃગપતિર્મહાકર્તા મહૌષધિઃ ॥ ૧૩॥

ઉત્તરો ગોપતિર્ગોપ્તા જ્ઞાનગમ્યઃ પુરાતનઃ ।
નીતિઃ સુનીતિઃ શુદ્ધાત્મા સોમઃ સોમરતઃ સુખી ॥ ૧૪॥

સોમપોઽમૃતપઃ સૌમ્યો મહાતેજા મહાદ્યુતિઃ ।
તેજોમયોઽમૃતમયોઽન્નમયશ્ચ સુધાપતિઃ ॥ ૧૫॥

અજાતશત્રુરાલોકઃ સમ્ભાવ્યો હવ્યવાહનઃ ।
લોકકરો વેદકરઃ સૂત્રકારઃ સનાતનઃ ॥ ૧૬॥

મહર્ષિકપિલાચાર્યો વિશ્વદીપ્તિસ્ત્રિલોચનઃ ।
પિનાકપાણિર્ભૂદેવઃ સ્વસ્તિદઃ સ્વસ્તિકૃત્સુધીઃ ॥ ૧૭॥

ધાતૃધામા ધામકરઃ સર્વગઃ સર્વગોચરઃ ।
બ્રહ્મસૃગ્વિશ્વસૃક્સર્ગઃ કર્ણિકારપ્રિયઃ કવિઃ ॥ ૧૮॥

શાખો વિશાખો ગોશાખઃ શિવો ભિષગનુત્તમઃ ।
ગઙ્ગાપ્લવોદકો ભવ્યઃ પુષ્કલઃ સ્થપતિઃ સ્થિરઃ ॥ ૧૯॥

વિજિતાત્મા વિધેયાત્મા ભૂતવાહનસારથિઃ ।
સગણો ગણકાયશ્ચ સુકીર્તિશ્છિન્નસંશયઃ ॥ ૨૦॥

કામદેવઃ કામપાલો ભસ્મોદ્ધૂલિતવિગ્રહઃ ।
ભસ્મપ્રિયો ભસ્મશાયી કામી કાન્તઃ કૃતાગમઃ ॥ ૨૧॥

સમાવર્તોઽનિવૃત્તાત્મા ધર્મપુઞ્જઃ સદાશિવઃ ।
અકલ્મષશ્ચતુર્બાહુર્દુરાવાસો દુરાસદઃ ॥ ૨૨॥

દુર્લભો દુર્ગમો દુર્ગઃ સર્વાયુધવિશારદઃ ।
અધ્યાત્મયોગનિલયઃ સુતન્તુસ્તન્તુવર્ધનઃ ॥ ૨૩॥

શુભાઙ્ગો લોકસારઙ્ગો જગદીશો જનાર્દનઃ ।
ભસ્મશુદ્ધિકરો મેરુરોજસ્વી શુદ્ધવિગ્રહઃ ॥ ૨૪॥

અસાધ્યઃ સાધુસાધ્યશ્ચ ભૃત્યમર્કટરૂપધૃક્ ।
હિરણ્યરેતાઃ પૌરાણો રિપુજીવહરો બલી ॥ ૨૫॥

મહાહ્રદો મહાગર્તઃ સિદ્ધવૃન્દારવન્દિતઃ ।
વ્યાઘ્રચર્મામ્બરો વ્યાલી મહાભૂતો મહાનિધિઃ ॥ ૨૬॥

અમૃતાશોઽમૃતવપુઃ પાઞ્ચજન્યઃ પ્રભઞ્જનઃ ।
પઞ્ચવિંશતિતત્ત્વસ્થઃ પારિજાતઃ પરાવરઃ ॥ ૨૭॥

સુલભઃ સુવ્રતઃ શૂરો બ્રહ્મવેદનિધિર્નિધિઃ ।
વર્ણાશ્રમગુરુર્વર્ણી શત્રુજિચ્છત્રુતાપનઃ ॥ ૨૮॥

આશ્રમઃ ક્ષપણઃ ક્ષામો જ્ઞાનવાનચલેશ્વરઃ ।
પ્રમાણભૂતો દુર્જ્ઞેયઃ સુપર્ણો વાયુવાહનઃ ॥ ૨૯॥

ધનુર્ધરો ધનુર્વેદો ગુણરાશિર્ગુણાકરઃ ।
સત્યઃ સત્યપરોઽદીનો ધર્માઙ્ગો ધર્મસાધનઃ ॥ ૩૦॥

અનન્તદૃષ્ટિરાનન્દો દણ્ડો દમયિતા દમઃ ।
અભિવાદ્યો મહામાયો વિશ્વકર્મવિશારદઃ ॥ ૩૧॥

વીતરાગો વિનીતાત્મા તપસ્વી ભૂતભાવનઃ ।
ઉન્મત્તવેષઃ પ્રચ્છન્નો જિતકામોઽજિતપ્રિયઃ ॥ ૩૨॥

કલ્યાણપ્રકૃતિઃ કલ્પઃ સર્વલોકપ્રજાપતિઃ ।
તરસ્વી તારકો ધીમાન્ પ્રધાનઃ પ્રભુરવ્યયઃ ॥ ૩૩॥

લોકપાલોઽન્તર્હિતાત્મા કલ્પાદિઃ કમલેક્ષણઃ ।
વેદશાસ્ત્રાર્થતત્ત્વજ્ઞોઽનિયમો નિયતાશ્રયઃ ॥ ૩૪॥

ચન્દ્રઃ સૂર્યઃ શનિઃ કેતુર્વરાઙ્ગો વિદ્રુમચ્છવિઃ ।
ભક્તિવશ્યઃ પરબ્રહ્મ મૃગબાણાર્પણોઽનઘઃ ॥ ૩૫॥

અદ્રિરદ્ર્યાલયઃ કાન્તઃ પરમાત્મા જગદ્ગુરુઃ ।
સર્વકર્માલયસ્તુષ્ટો મઙ્ગલ્યો મઙ્ગલાવૃતઃ ॥ ૩૬॥

મહાતપા દીર્ઘતપાઃ સ્થવિષ્ઠઃ સ્થવિરો ધ્રુવઃ ।
અહઃ સંવત્સરો વ્યાપ્તિઃ પ્રમાણં પરમં તપઃ ॥ ૩૭॥

સંવત્સરકરો મન્ત્રપ્રત્યયઃ સર્વદર્શનઃ ।
અજઃ સર્વેશ્વરઃ સિદ્ધો મહારેતા મહાબલઃ ॥ ૩૮॥

યોગી યોગ્યો મહાતેજાઃ સિદ્ધિઃ સર્વાદિરગ્રહઃ ।
વસુર્વસુમનાઃ સત્યઃ સર્વપાપહરો હરઃ ॥ ૩૯॥

સુકીર્તિશોભનઃ શ્રીમાન્ વેદાઙ્ગો વેદવિન્મુનિઃ ।
ભ્રાજિષ્ણુર્ભોજનં ભોક્તા લોકનાથો દુરાધરઃ ॥ ૪૦॥

અમૃતઃ શાશ્વતઃ શાન્તો બાણહસ્તઃ પ્રતાપવાન્ ।
કમણ્ડલુધરો ધન્વી અવાઙ્મનસગોચરઃ ॥ ૪૧॥

અતીન્દ્રિયો મહામાયઃ સર્વાવાસશ્ચતુષ્પથઃ ।
કાલયોગી મહાનાદો મહોત્સાહો મહાબલઃ ॥ ૪૨॥

મહાબુદ્ધિર્મહાવીર્યો ભૂતચારી પુરન્દરઃ ।
નિશાચરઃ પ્રેતચારી મહાશક્તિર્મહાદ્યુતિઃ ॥ ૪૩॥

અનિર્દેશ્યવપુઃ શ્રીમાન્ સર્વાચાર્યો મનોગતિઃ ।
બહુશ્રુતોઽમહામાયો નિયતાત્મા ધ્રુવોઽધ્રુવઃ ॥ ૪૪॥

ઓજસ્તેજોદ્યુતિધરો જનકઃ સર્વશાસનઃ ।
નૃત્યપ્રિયો નિત્યનૃત્યઃ પ્રકાશાત્મા પ્રકાશકઃ ॥ ૪૫॥

સ્પષ્ટાક્ષરો બુધો મન્ત્રઃ સમાનઃ સારસમ્પ્લવઃ ।
યુગાદિકૃદ્યુગાવર્તો ગમ્ભીરો વૃષવાહનઃ ॥ ૪૬॥

ઇષ્ટોઽવિશિષ્ટઃ શિષ્ટેષ્ટઃ સુલભઃ સારશોધનઃ ।
તીર્થરૂપસ્તીર્થનામા તીર્થદૃશ્યસ્તુ તીર્થદઃ ॥ ૪૭॥

અપાન્નિધિરધિષ્ઠાનં દુર્જયો જયકાલવિત્ ।
પ્રતિષ્ઠિતઃ પ્રમાણજ્ઞો હિરણ્યકવચો હરિઃ ॥ ૪૮॥

વિમોચનઃ સુરગણો વિદ્યેશો બિન્દુસંશ્રયઃ ।
બાલરૂપોઽબલોન્મત્તોઽવિકર્તા ગહનો ગુહઃ ॥ ૪૯॥

કરણં કારણં કર્તા સર્વબન્ધવિમોચનઃ ।
વ્યવસાયો વ્યવસ્થાનઃ સ્થાનદો જગદાદિજઃ ॥ ૫૦॥

ગુરુદો લલિતોઽભેદો ભાવાત્માત્મનિ સંસ્થિતઃ ।
વીરેશ્વરો વીરભદ્રો વીરાસનવિધિર્વિરાટ્ ॥ ૫૧॥

વીરચૂડામણિર્વેત્તા ચિદાનન્દો નદીધરઃ ।
આજ્ઞાધારસ્ત્રિશૂલી ચ શિપિવિષ્ટઃ શિવાલયઃ ॥ ૫૨॥

બાલખિલ્યો મહાચાપસ્તિગ્માંશુર્બધિરઃ ખગઃ ।
અભિરામઃ સુશરણઃ સુબ્રહ્મણ્યઃ સુધાપતિઃ ॥ ૫૩॥

મઘવાન્કૌશિકો ગોમાન્વિરામઃ સર્વસાધનઃ ।

લલાટાક્ષો વિશ્વદેહઃ સારઃ સંસારચક્રભૃત્ ॥ ૫૪॥

અમોઘદણ્ડો મધ્યસ્થો હિરણ્યો બ્રહ્મવર્ચસી ।
પરમાર્થઃ પરો માયી શમ્બરો વ્યાઘ્રલોચનઃ ॥ ૫૫॥

રુચિર્વિરઞ્ચિઃ સ્વર્બન્ધુર્વાચસ્પતિરહર્પતિઃ ।
રવિર્વિરોચનઃ સ્કન્દઃ શાસ્તા વૈવસ્વતો યમઃ ॥ ૫૬॥

યુક્તિરુન્નતકીર્તિશ્ચ સાનુરાગઃ પરઞ્જયઃ ।
કૈલાસાધિપતિઃ કાન્તઃ સવિતા રવિલોચનઃ ॥ ૫૭॥

વિદ્વત્તમો વીતભયો વિશ્વભર્ત્તાનિવારિતઃ ।
નિત્યો નિયતકલ્યાણઃ પુણ્યશ્રવણકીર્તનઃ ॥ ૫૮॥

દૂરશ્રવા વિશ્વસહો ધ્યેયો દુઃસ્વપ્નનાશનઃ ।
ઉત્તારણો દુષ્કૃતિહા વિજ્ઞેયો દુઃસહોઽભવઃ ॥ ૫૯॥

અનાદિર્ભૂર્ભુવો લક્ષ્મીઃ કિરીટી ત્રિદશાધિપઃ ।
વિશ્વગોપ્તા વિશ્વકર્તા સુવીરો રુચિરાઙ્ગદઃ ॥ ૬૦॥

જનનો જનજન્માદિઃ પ્રીતિમાન્નીતિમાન્ધવઃ ।
વસિષ્ઠઃ કશ્યપો ભાનુર્ભીમો ભીમપરાક્રમઃ ॥ ૬૧॥

પ્રણવઃ સત્પથાચારો મહાકોશો મહાધનઃ ।
જન્માધિપો મહાદેવઃ સકલાગમપારગઃ ॥ ૬૨॥

તત્ત્વં તત્ત્વવિદેકાત્મા વિભુર્વિશ્વવિભૂષણઃ ।
ઋષિર્બ્રાહ્મણ ઐશ્વર્યજન્મમૃત્યુજરાતિગઃ ॥ ૬૩॥

પઞ્ચયજ્ઞસમુત્પત્તિર્વિશ્વેશો વિમલોદયઃ ।
આત્મયોનિરનાદ્યન્તો વત્સલો ભક્તલોકધૃક્ ॥ ૬૪॥

ગાયત્રીવલ્લભઃ પ્રાંશુર્વિશ્વાવાસઃ પ્રભાકરઃ ।
શિશુર્ગિરિરતઃ સમ્રાટ્ સુષેણઃ સુરશત્રુહા ॥ ૬૫॥

અમોઘોઽરિષ્ટનેમિશ્ચ કુમુદો વિગતજ્વરઃ ।
સ્વયઞ્જ્યોતિસ્તનુજ્યોતિરાત્મજ્યોતિરચઞ્ચલઃ ॥ ૬૬॥

પિઙ્ગલઃ કપિલશ્મશ્રુર્ભાલનેત્રસ્ત્રયીતનુઃ ।
જ્ઞાનસ્કન્દો મહાનીતિર્વિશ્વોત્પત્તિરુપપ્લવઃ ॥ ૬૭॥

ભગો વિવસ્વાનાદિત્યો યોગપારો દિવસ્પતિઃ ।
કલ્યાણગુણનામા ચ પાપહા પુણ્યદર્શનઃ ॥ ૬૮॥

ઉદારકીર્તિરુદ્યોગી સદ્યોગી સદસન્મયઃ ।
નક્ષત્રમાલી નાકેશઃ સ્વાધિષ્ઠાનપદાશ્રયઃ ॥ ૬૯॥

પવિત્રઃ પાપહારી ચ મણિપૂરો નભોગતિઃ ।
હૃત્પુણ્ડરીકમાસીનઃ શક્રઃ શાન્તો વૃષાકપિઃ ॥ ૭૦॥

ઉષ્ણો ગૃહપતિઃ કૃષ્ણઃ સમર્થોઽનર્થનાશનઃ ।
અધર્મશત્રુરજ્ઞેયઃ પુરુહૂતઃ પુરુશ્રુતઃ ॥ ૭૧॥

બ્રહ્મગર્ભો બૃહદ્ગર્ભો ધર્મધેનુર્ધનાગમઃ ।
જગદ્ધિતૈષી સુગતઃ કુમારઃ કુશલાગમઃ ॥ ૭૨॥

હિરણ્યવર્ણો જ્યોતિષ્માન્નાનાભૂતરતો ધ્વનિઃ ।
અરાગો નયનાધ્યક્ષો વિશ્વામિત્રો ધનેશ્વરઃ ॥ ૭૩॥

બ્રહ્મજ્યોતિર્વસુધામા મહાજ્યોતિરનુત્તમઃ ।
માતામહો માતરિશ્વા નભસ્વાન્નાગહારધૃક્ ॥ ૭૪॥

પુલસ્ત્યઃ પુલહોઽગસ્ત્યો જાતૂકર્ણ્યઃ પરાશરઃ ।
નિરાવરણનિર્વારો વૈરઞ્ચ્યો વિષ્ટરશ્રવાઃ ॥ ૭૫॥

આત્મભૂરનિરુદ્ધોઽત્રિર્જ્ઞાનમૂર્તિર્મહાયશાઃ ।
લોકવીરાગ્રણીર્વીરશ્ચણ્ડઃ સત્યપરાક્રમઃ ॥ ૭૬॥

વ્યાલકલ્પો મહાકલ્પઃ કલ્પવૃક્ષઃ કલાધરઃ ।
અલઙ્કરિષ્ણુરચલો રોચિષ્ણુર્વિક્રમોન્નતઃ ॥ ૭૭॥

આયુઃશબ્દપતિર્વેગી પ્લવનઃ શિખિસારથિઃ ।
અસંસૃષ્ટોઽતિથિઃ શક્રપ્રમાથી પાદપાસનઃ ॥ ૭૮॥

વસુશ્રવા હવ્યવાહઃ પ્રતપ્તો વિશ્વભોજનઃ ।
જપ્યો જરાદિશમનો લોહિતાત્મા તનૂનપાત્ ॥ ૭૯॥

બૃહદશ્વો નભોયોનિઃ સુપ્રતીકસ્તમિસ્રહા ।
નિદાઘસ્તપનો મેઘઃ સ્વક્ષઃ પરપુરઞ્જયઃ ॥ ૮૦॥

સુખાનિલઃ સુનિષ્પન્નઃ સુરભિઃ શિશિરાત્મકઃ ।
વસન્તો માધવો ગ્રીષ્મો નભસ્યો બીજવાહનઃ ॥ ૮૧॥

અઙ્ગિરા ગુરુરાત્રેયો વિમલો વિશ્વવાહનઃ ।
પાવનઃ સુમતિર્વિદ્વાંસ્ત્રૈવિદ્યો વરવાહનઃ ॥ ૮૨॥

મનોબુદ્ધિરહઙ્કારઃ ક્ષેત્રજ્ઞઃ ક્ષેત્રપાલકઃ ।
જમદગ્નિર્બલનિધિર્વિગાલો વિશ્વગાલવઃ ॥ ૮૩॥

અઘોરોઽનુત્તરો યજ્ઞઃ શ્રેષ્ઠો નિઃશ્રેયસપ્રદઃ ।
શૈલો ગગનકુન્દાભો દાનવારિરરિન્દમઃ ॥ ૮૪॥

રજનીજનકશ્ચારુર્નિઃશલ્યો લોકશલ્યધૃક્ ।
ચતુર્વેદશ્ચતુર્ભાવશ્ચતુરશ્ચતુરપ્રિયઃ ॥ ૮૫॥

આમ્નાયોઽથ સમામ્નાયસ્તીર્થદેવશિવાલયઃ ।
બહુરૂપો મહારૂપઃ સર્વરૂપશ્ચરાચરઃ ॥ ૮૬॥

ન્યાયનિર્માયકો ન્યાયી ન્યાયગમ્યો નિરઞ્જનઃ ।
સહસ્રમૂર્ધા દેવેન્દ્રઃ સર્વશસ્ત્રપ્રભઞ્જનઃ ॥ ૮૭॥

મુણ્ડો વિરૂપો વિક્રાન્તો દણ્ડી દાન્તો ગુણોત્તમઃ ।
પિઙ્ગલાક્ષો જનાધ્યક્ષો નીલગ્રીવો નિરામયઃ ॥ ૮૮॥

સહસ્રબાહુઃ સર્વેશઃ શરણ્યઃ સર્વલોકધૃક્ ।
પદ્માસનઃ પરં જ્યોતિઃ પારમ્પર્યફલપ્રદઃ ॥ ૮૯॥

પદ્મગર્ભો મહાગર્ભો વિશ્વગર્ભો વિચક્ષણઃ ।
પરાવરજ્ઞો વરદો વરેણ્યશ્ચ મહાસ્વનઃ ॥ ૯૦॥

દેવાસુરગુરુર્દેવો દેવાસુરનમસ્કૃતઃ ।
દેવાસુરમહામિત્રો દેવાસુરમહેશ્વરઃ ॥ ૯૧॥

દેવાસુરેશ્વરો દિવ્યો દેવાસુરમહાશ્રયઃ ।
દેવદેવમયોઽચિન્ત્યો દેવદેવાત્મસમ્ભવઃ ॥ ૯૨॥

સદ્યોનિરસુરવ્યાઘ્રો દેવસિંહો દિવાકરઃ ।
વિબુધાગ્રચરશ્રેષ્ઠઃ સર્વદેવોત્તમોત્તમઃ ॥ ૯૩॥

શિવજ્ઞાનરતઃ શ્રીમાન્ શિખિશ્રીપર્વતપ્રિયઃ ।
વજ્રહસ્તઃ સિદ્ધખડ્ગો નરસિંહનિપાતનઃ ॥ ૯૪॥

બ્રહ્મચારી લોકચારી ધર્મચારી ધનાધિપઃ ।

નન્દી નન્દીશ્વરોઽનન્તો નગ્નવ્રતધરઃ શુચિઃ ॥ ૯૫॥

લિઙ્ગાધ્યક્ષઃ સુરાધ્યક્ષો યોગાધ્યક્ષો યુગાવહઃ ।
સ્વધર્મા સ્વર્ગતઃ સ્વર્ગસ્વરઃ સ્વરમયસ્વનઃ ॥ ૯૬॥

બાણાધ્યક્ષો બીજકર્તા ધર્મકૃદ્ધર્મસમ્ભવઃ ।
દમ્ભો લોભોઽર્થવિચ્છમ્ભુઃ સર્વભૂતમહેશ્વરઃ ॥ ૯૭॥

શ્મશાનનિલયસ્ત્ર્યક્ષઃ સેતુરપ્રતિમાકૃતિઃ ।
લોકોત્તરસ્ફુટાલોકસ્ત્ર્યમ્બકો નાગભૂષણઃ ॥ ૯૮॥

અન્ધકારિર્મખદ્વેષી વિષ્ણુકન્ધરપાતનઃ ।
હીનદોષોઽક્ષયગુણો દક્ષારિઃ પૂષદન્તભિત્ ॥ ૯૯॥

ધૂર્જટિઃ ખણ્ડપરશુઃ સકલો નિષ્કલોઽનઘઃ ।
અકાલઃ સકલાધારઃ પાણ્ડુરાભો મૃડો નટઃ ॥ ૧૦૦॥

પૂર્ણઃ પૂરયિતા પુણ્યઃ સુકુમારઃ સુલોચનઃ ।
સામગેયપ્રિયોઽક્રૂરઃ પુણ્યકીર્તિરનામયઃ ॥ ૧૦૧॥

મનોજવસ્તીર્થકરો જટિલો જીવિતેશ્વરઃ ।
જીવિતાન્તકરો નિત્યો વસુરેતા વસુપ્રદઃ ॥ ૧૦૨॥

સદ્ગતિઃ સત્કૃતિઃ સિદ્ધિઃ સજ્જાતિઃ ખલકણ્ટકઃ ।
કલાધરો મહાકાલભૂતઃ સત્યપરાયણઃ ॥ ૧૦૩॥

લોકકલ્યાણકર્તા ચ લોકોત્તરસુખાલયઃ ।
ચન્દ્રસઞ્જીવનઃ શાસ્તા લોકગૂઢો મહાધિપઃ ॥ ૧૦૪॥

લોકબન્ધુર્લોકનાથઃ કૃતજ્ઞઃ કીર્તિભૂષણઃ ।
અનપાયોઽક્ષરઃ કાન્તઃ સર્વશસ્ત્રભૃતાં વરઃ ॥ ૧૦૫॥

તેજોમયો દ્યુતિધરો લોકાનામગ્રણીરણુઃ ।
શુચિસ્મિતઃ પ્રસન્નાત્મા દુર્જેયો દુરતિક્રમઃ ॥ ૧૦૬॥

જ્યોતિર્મયો જગન્નાથો નિરાકારો જલેશ્વરઃ ।
તુમ્બવીણો મહાકોપો વિશોકઃ શોકનાશનઃ ॥ ૧૦૭॥

ત્રિલોકપસ્ત્રિલોકેશઃ સર્વશુદ્ધિરધોક્ષજઃ ।
અવ્યક્તલક્ષણો દેવો વ્યક્તાવ્યક્તો વિશામ્પતિઃ ॥ ૧૦૮॥

વરશીલો વરગુણઃ સારો માનધનો મયઃ ।
બ્રહ્મા વિષ્ણુઃ પ્રજાપાલો હંસો હંસગતિર્વયઃ ॥ ૧૦૯॥

વેધા વિધાતા ધાતા ચ સ્રષ્ટા હર્તા ચતુર્મુખઃ ।
કૈલાસશિખરાવાસી સર્વાવાસી સદાગતિઃ ॥ ૧૧૦॥

હિરણ્યગર્ભો દ્રુહિણો ભૂતપાલોઽથ ભૂપતિઃ ।
સદ્યોગી યોગવિદ્યોગી વરદો બ્રાહ્મણપ્રિયઃ ॥ ૧૧૧॥

દેવપ્રિયો દેવનાથો દેવજ્ઞો દેવચિન્તકઃ ।
વિષમાક્ષો વિશાલાક્ષો વૃષદો વૃષવર્ધનઃ ॥ ૧૧૨॥

નિર્મમો નિરહઙ્કારો નિર્મોહો નિરુપદ્રવઃ ।
દર્પહા દર્પદો દૃપ્તઃ સર્વર્તુપરિવર્તકઃ ॥ ૧૧૩॥

સહસ્રજિત્ સહસ્રાર્ચિઃ સ્નિગ્ધપ્રકૃતિદક્ષિણઃ ।
ભૂતભવ્યભવન્નાથઃ પ્રભવો ભૂતિનાશનઃ ॥ ૧૧૪॥

અર્થોઽનર્થો મહાકોશઃ પરકાર્યૈકપણ્ડિતઃ ।
નિષ્કણ્ટકઃ કૃતાનન્દો નિર્વ્યાજો વ્યાજમર્દનઃ ॥ ૧૧૫॥

સત્ત્વવાન્સાત્ત્વિકઃ સત્યકીર્તિઃ સ્નેહકૃતાગમઃ ।
અકમ્પિતો ગુણગ્રાહી નૈકાત્મા નૈકકર્મકૃત્ ॥ ૧૧૬॥

સુપ્રીતઃ સુમુખઃ સૂક્ષ્મઃ સુકરો દક્ષિણાનિલઃ ।
નન્દિસ્કન્ધધરો ધુર્યઃ પ્રકટઃ પ્રીતિવર્ધનઃ ॥ ૧૧૭॥

અપરાજિતઃ સર્વસત્ત્વો ગોવિન્દઃ સત્ત્વવાહનઃ ।
અધૃતઃ સ્વધૃતઃ સિદ્ધઃ પૂતમૂર્તિર્યશોધનઃ ॥ ૧૧૮॥

વારાહશૃઙ્ગધૃક્છૃઙ્ગી બલવાનેકનાયકઃ ।
શ્રુતિપ્રકાશઃ શ્રુતિમાનેકબન્ધુરનેકકૃત્ ॥ ૧૧૯॥

શ્રીવત્સલશિવારમ્ભઃ શાન્તભદ્રઃ સમો યશઃ ।
ભૂશયો ભૂષણો ભૂતિર્ભૂતકૃદ્ ભૂતભાવનઃ ॥ ૧૨૦॥

અકમ્પો ભક્તિકાયસ્તુ કાલહા નીલલોહિતઃ ।
સત્યવ્રતમહાત્યાગી નિત્યશાન્તિપરાયણઃ ॥ ૧૨૧॥

પરાર્થવૃત્તિર્વરદો વિરક્તસ્તુ વિશારદઃ ।
શુભદઃ શુભકર્તા ચ શુભનામા શુભઃ સ્વયમ્ ॥ ૧૨૨॥

અનર્થિતોઽગુણઃ સાક્ષી હ્યકર્તા કનકપ્રભઃ ।
સ્વભાવભદ્રો મધ્યસ્થઃ શત્રુઘ્નો વિઘ્નનાશનઃ ॥ ૧૨૩॥

શિખણ્ડી કવચી શૂલી જટી મુણ્ડી ચ કુણ્ડલી ।
અમૃત્યુઃ સર્વદૃક્સિંહસ્તેજોરાશિર્મહામણિઃ ॥ ૧૨૪॥

અસઙ્ખ્યેયોઽપ્રમેયાત્મા વીર્યવાન્ વીર્યકોવિદઃ ।
વેદ્યશ્ચૈવ વિયોગાત્મા પરાવરમુનીશ્વરઃ ॥ ૧૨૫॥

અનુત્તમો દુરાધર્ષો મધુરપ્રિયદર્શનઃ ।
સુરેશઃ શરણં સર્વઃ શબ્દબ્રહ્મ સતાં ગતિઃ ॥ ૧૨૬॥

કાલપક્ષઃ કાલકાલઃ કઙ્કણીકૃતવાસુકિઃ ।
મહેષ્વાસો મહીભર્તા નિષ્કલઙ્કો વિશૃઙ્ખલઃ ॥ ૧૨૭॥

દ્યુમણિસ્તરણિર્ધન્યઃ સિદ્ધિદઃ સિદ્ધિસાધનઃ ।
વિશ્વતઃ સંવૃતઃ સ્તુત્યો વ્યૂઢોરસ્કો મહાભુજઃ ॥ ૧૨૮॥

સર્વયોનિર્નિરાતઙ્કો નરનારાયણપ્રિયઃ ।
નિર્લેપો નિષ્પ્રપઞ્ચાત્મા નિર્વ્યઙ્ગો વ્યઙ્ગનાશનઃ ॥ ૧૨૯॥

સ્તવ્યઃ સ્તવપ્રિયઃ સ્તોતા વ્યાસમૂર્તિર્નિરઙ્કુશઃ ।
નિરવદ્યમયોપાયો વિદ્યારાશી રસપ્રિયઃ ॥ ૧૩૦॥

પ્રશાન્તબુદ્ધિરક્ષુણ્ણઃ સઙ્ગ્રહી નિત્યસુન્દરઃ ।
વૈયાઘ્રધુર્યો ધાત્રીશઃ શાકલ્યઃ શર્વરીપતિઃ ॥ ૧૩૧॥

પરમાર્થગુરુર્દત્તઃ સૂરિરાશ્રિતવત્સલઃ ।
સોમો રસજ્ઞો રસદઃ સર્વસત્ત્વાવલમ્બનઃ ॥ ૧૩૨॥

એવં નામ્નાં સહસ્રેણ તુષ્ટાવ હિ હરં હરિઃ ।
પ્રાર્થયામાસ શમ્ભું વૈ પૂજયામાસ પઙ્કજૈઃ ॥ ૧૩૩॥

તતઃ સ કૌતુકી શમ્ભુશ્ચકાર ચરિતં દ્વિજાઃ ।
મહદ્ભુતં સુખકરં તદેવ શૃણુતાદરાત્ ॥ ૧૩૪॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં શિવસહસ્રનામવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૪.૩૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૬. ષટ્ત્રિંશોઽધ્યાયઃ । શિવસહસ્રનામસ્તોત્રફલવર્ણનમ્ ।

સૂત ઉવાચ ।
શ્રુત્વા વિષ્ણુકૃતં દિવ્યં પરનામવિભૂષિતમ્ ।
સહસ્રનામ સ્વસ્તોત્રં પ્રસન્નોઽભૂન્મહેશ્વરઃ ॥ ૧॥

પરીક્ષાર્થં હરેરીશઃ કમલેષુ મહેશ્વરઃ ।
ગોપયામાસ કમલં તદૈકં ભુવનેશ્વરઃ ॥ ૨॥

પઙ્કજેષુ તદા તેષુ સહસ્રેષુ બભૂવ ચ ।
ન્યૂનમેકં તદા વિષ્ણુર્વિહ્વલઃ શિવપૂજને ॥ ૩॥

હૃદા વિચારિતં તેન કુતો વૈ કમલં ગતમ્ ।
યાતં યાતુ સુખેનૈવ મન્નેત્રં કમલં ન કિમ્ ॥ ૪॥

જ્ઞાત્વેતિ નેત્રમુદ્ધૃત્ય સર્વસત્ત્વાવલમ્બનાત્ ।
પૂજયામાસ ભાવેન સ્તવયામાસ તેન ચ ॥ ૫॥

તતસ્તુતમથો દૃષ્ટ્વા તથાભૂતં હરો હરિમ્ ।
મા મેતિ વ્યાહરન્નેવ પ્રાદુરાસીજ્જગદ્ગુરુઃ ॥ ૬॥

તસ્માદવતતારાશુ મણ્ડલાત્પાર્થિવસ્ય ચ ।
પ્રતિષ્ઠિતસ્ય હરિણા સ્વલિઙ્ગસ્ય મહેશ્વરઃ ॥ ૭॥

યથોક્તરૂપિણં શમ્ભું તેજોરાશિસમુત્થિતમ્ ।
નમસ્કૃત્ય પુરઃ સ્થિત્વા સ તુષ્ટાવ વિશેષતઃ ॥ ૮॥

તદા પ્રાહ મહાદેવઃ પ્રસન્નઃ પ્રહસન્નિવ ।
સમ્પ્રેક્ષ્ય કૃપયા વિષ્ણું કૃતાઞ્જલિપુટં સ્થિતમ્ ॥ ૯॥

શઙ્કર ઉવાચ ।
જ્ઞાતં મયેદં સકલં તવ ચિત્તેપ્સિતં હરે ।
દેવકાર્યં વિશેષેણ દેવકાર્યરતાત્મનઃ ॥ ૧૦॥

દેવકાર્યસ્ય સિદ્ધ્યર્થં દૈત્યનાશાય ચાશ્રમમ્ ।
સુદર્શનાખ્યં ચક્રં ચ દદામિ તવ શોભનમ્ ॥ ૧૧॥

યદ્રૂપં ભવતા દૃષ્ટં સર્વલોકસુખાવહમ્ ।
હિતાય તવ દેવેશ ધૃતં ભાવય તદ્ધ્રુવમ્ ॥ ૧૨॥

રણાજિરે સ્મૃતં તદ્વૈ દેવાનાં દુઃખનાશનમ્ ।
ઇદં ચક્રમિદં રૂપમિદં નામસહસ્રકમ્ ॥ ૧૩॥

યે શ‍ૃણ્વન્તિ સદા ભક્ત્યા સિદ્ધિઃ સ્યાદનપાયિની ।
કામાનાં સકલાનાં ચ પ્રસાદાન્મમ સુવ્રત ॥ ૧૪॥

સૂત ઉવાચ ।
એવમુક્ત્વા દદૌ ચક્રં સૂર્યાયુતસમપ્રભમ્ ।
સુદર્શનં સ્વપાદોત્થં સર્વશત્રુવિનાશનમ્ ॥ ૧૫॥

વિષ્ણુશ્ચાપિ સુસંસ્કૃત્ય જગ્રાહોદઙ્મુખસ્તદા ।
નમસ્કૃત્ય મહાદેવં વિષ્ણુર્વચનમબ્રવીત્ ॥ ૧૬॥

વિષ્ણુરુવાચ ।
શ‍ૃણુ દેવ મયા ધ્યેયં પઠનીયં ચ કિં પ્રભો ।
દુઃખાનાં નાશનાર્થં હિ વદ ત્વં લોકશઙ્કર ॥ ૧૭॥

સૂત ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા તેન સન્તુષ્ટસ્તુ શિવોઽબ્રવીત્ ।
પ્રસન્નમાનસો ભૂત્વા વિષ્ણું દેવસહાયકમ્ ॥ ૧૮॥

શિવ ઉવાચ ।
રૂપં ધ્યેયં હરે મે હિ સર્વાનર્થપ્રશાન્તયે ।
અનેકદુઃખનાશાર્થં પઠ નામસહસ્રકમ્ ॥ ૧૯॥

ધાર્યં ચક્રં સદા મે હિ સર્વાભીષ્ટસ્ય સિદ્ધયે ।
ત્વયા વિષ્ણો પ્રયત્નેન સર્વચક્રવરં ત્વિદમ્ ॥ ૨૦॥

અન્યે ચ યે પઠિષ્યન્તિ પાઠયિષ્યન્તિ નિત્યશઃ ।
તેષાં દુઃખં ન સ્વપ્નેઽપિ જાયતે નાત્ર સંશયઃ ॥ ૨૧॥

રાજ્ઞાં ચ સઙ્કટે પ્રાપ્તે શતાવૃત્તિં ચરેદ્યદા ।
સાઙ્ગં ચ વિધિસંયુક્તં કલ્યાણં લભતે નરઃ ॥ ૨૨॥

રોગનાશકરં હ્યેતદ્વિદ્યાવિત્તદમુત્તમમ્ ।
સર્વકામપ્રદં પુણ્યં શિવભક્તિપ્રદં સદા ॥ ૨૩॥

યદુદ્દિશ્ય ફલં શ્રેષ્ઠં પઠિષ્યન્તિ નરાસ્ત્વિહ ।
લપ્સ્યન્તે નાત્ર સન્દેહઃ ફલં તત્સત્યમુત્તમમ્ ॥ ૨૪॥

યશ્ચ પ્રાતઃ સમુત્થાય પૂજાં કૃત્વા મદીયિકામ્ ।
પઠતે મત્સમક્ષં વૈ નિત્યં સિદ્ધિર્ન દૂરતઃ ॥ ૨૫॥

ઐહિકીં સિદ્ધિમાપ્નોતિ નિખિલાં સર્વકામિકામ્ ।
અન્તે સાયુજ્યમુક્તિં વૈ પ્રાપ્નોત્યત્ર ન સંશયઃ ॥ ૨૬॥

સૂત ઉવાચ ।
એવમુક્ત્વા તદા વિષ્ણું શઙ્કરઃ પ્રીતમાનસઃ ।
ઉપસ્પૃશ્ય કરાભ્યાં તમુવાચ ગિરિશઃ પુનઃ ॥ ૨૭॥

શિવ ઉવાચ ।
વરદોઽસ્મિ સુરશ્રેષ્ઠ વરાન્વૃણુ યથેપ્સિતાન્ ।
ભક્ત્યા વશીકૃતો નૂનં સ્તવેનાનેન સુવ્રત ॥ ૨૮॥

સૂત ઉવાચ ।
ઇત્યુક્તો દેવદેવેન દેવદેવં પ્રણમ્ય તમ્ ।
સુપ્રસન્નતરો વિષ્ણુઃ સાઞ્જલિર્વાક્યમબ્રવીત્ ॥ ૨૯॥

વિષ્ણુરુવાચ ।
યથેદાનીં કૃપા નાથ ક્રિયતે ચાન્યતઃ પરા ।
કાર્યા ચૈવ વિશેષેણ કૃપાલુત્વાત્ત્વયા પ્રભો ॥ ૩૦॥

ત્વયિ ભક્તિર્મહાદેવ પ્રસીદ વરમુત્તમમ્ ।
નાન્યમિચ્છામિ ભક્તાનામાર્ત્તયો નૈવ યત્પ્રભો ॥ ૩૧॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય દયાવાન્સુતરાં ભવઃ ।
પસ્પર્શ ચ તદઙ્ગં વૈ પ્રાહ શીતાંશુશેખરઃ ॥ ૩૨॥

શિવ ઉવાચ ।
મયિ ભક્તિઃ સદા તે તુ હરે સ્યાદનપાયિની ।
સદા વન્દ્યશ્ચ પૂજ્યશ્ચ લોકે ભવ સુરૈરપિ ॥ ૩૩॥

વિશ્વમ્ભરેતિ તે નામ સર્વપાપહરં પરમ્ ।
ભવિષ્યતિ ન સન્દેહો મત્પ્રસાદાત્સુરોત્તમ ॥ ૩૪॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વાન્તર્દધે રુદ્રઃ સર્વદેવેશ્વરઃ પ્રભુઃ ।
પશ્યતસ્તસ્ય વિષ્ણોસ્તુ તત્રૈવ ચ મુનીશ્વરાઃ ॥ ૩૫॥

જનાર્દનોઽપિ ભગવાન્ વચનાચ્છઙ્કરસ્ય ચ ।
પ્રાપ્ય ચક્રં શુભં તદ્વૈ જહર્ષાતિ સ્વચેતસિ ॥ ૩૬॥

કૃત્વા ધ્યાનં ચ તચ્છમ્ભોઃ સ્તોત્રમેતન્નિરન્તરમ્ ।
પપાઠાધ્યાપયામાસ ભક્તેભ્યસ્તદુપાદિશત્ ॥ ૩૭॥

ઇતિ પૃષ્ટં મયાખ્યાતં શૃણ્વતાં પાપહારકમ્ ।
અતઃ પરં ચ કિં શ્રેષ્ઠાઃ પ્રષ્ટુમિચ્છથ વૈ પુનઃ ॥ ૩૮॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં શિવસહસ્રનામસ્તોત્રફલવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૪.૩૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૭. સપ્તત્રિંશોઽધ્યાયઃ । દેવર્ષિનૃપશૈવત્વવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ જ્ઞાનવાનસિ સુવ્રત ।
પુનરેવ શિવસ્યૈવ ચરિતં બ્રૂહિ વિસ્તરાત્ ॥ ૧॥

પુરાતનાશ્ચ રાજાન ઋષયો દેવતાસ્તથા ।
આરાધનં ચ તસ્યૈવ ચક્રુર્દેવવરસ્ય હિ ॥ ૨॥

સૂત ઉવાચ ।
સાધુ પૃષ્ટમૃષિશ્રેષ્ઠાઃ શ્રૂયતાં કથયામિ વઃ ।
ચરિત્રં શાઙ્કરં રમ્યં શૃણ્વતાં ભુક્તિમુક્તિદમ્ ॥ ૩॥

એતદેવ પુરા પૃષ્ટો નારદેન પિતામહઃ ।
પ્રત્યુવાચ પ્રસન્નાત્મા નારદં મુનિસત્તમમ્ ॥ ૪॥

બ્રહ્મોવાચ ।

શ‌ૃણુ નારદ સુપ્રીત્યા શાઙ્કરં ચરિતં વરમ્ ।
પ્રવક્ષ્યામિ ભવત્સ્નેહાન્મહાપાતકનાશનમ્ ॥ ૫॥

રમયા સહિતો વિષ્ણુઃ શિવપૂજાં ચકાર હ ।
કૃપયા પરમેશસ્ય સર્વાન્કામાનવાપ હિ ॥ ૬॥

અહં પિતામહશ્ચાપિ શિવપૂજનકારકઃ ।
તસ્યૈવ કૃપયા તાત વિશ્વસૃષ્ટિકરઃ સદા ॥ ૭॥

શિવપૂજાકરા નિત્યં મત્પુત્રાઃ પરમર્ષયઃ ।
અન્યે ચ ઋષયો યે તે શિવપૂજનકારકાઃ ॥ ૮॥

નારદ ત્વં વિશેષેણ શિવપૂજનકારકઃ ।
સપ્તર્ષયો વસિષ્ઠાદ્યાઃ શિવપૂજનકારકાઃ ॥ ૯॥

અરુન્ધતી મહાસાધ્વી લોપામુદ્રા તથૈવ ચ ।
અહલ્યા ગૌતમસ્ત્રી ચ શિવપૂજનકારિકાઃ ॥ ૧૦॥

દુર્વાસાઃ કૌશિકઃ શક્તિર્દધીચો ગૌતમસ્તથા ।
કણાદો ભાર્ગવો જીવો વૈશમ્પાયન એવ ચ ॥ ૧૧॥

એતે ચ મુનયઃ સર્વે શિવપૂજાકરા મતાઃ ।
તથા પરાશરો વ્યાસઃ શિવપૂજારતઃ સદા ॥ ૧૨॥

ઉપમન્યુર્મહાભક્તઃ શિવસ્ય પરમાત્મનઃ ।
યાજ્ઞવલ્ક્યો મહાશૈવો જૈમિનિર્ગર્ગ એવ ચ ॥ ૧૩॥

શુકશ્ચ શૌનકાદ્યાશ્ચ શઙ્કરસ્ય પ્રપૂજકાઃ ।
અન્યેઽપિ બહવઃ સન્તિ મુનયો મુનિસત્તમાઃ ॥ ૧૪॥

અદિતિર્દેવમાતા ચ નિત્યં પ્રીત્યા ચકાર હ ।
પાર્થિવીં શૈવપૂજાં વૈ સવધૂઃ પ્રેમતત્પરા ॥ ૧૫॥

શક્રાદયો લોકપાલા વસવશ્ચ સુરાસ્તથા ।
મહારાજિકદેવાશ્ચ સાધ્યાશ્ચ શિવપૂજકાઃ ॥ ૧૬॥

ગન્ધર્વાઃ કિન્નરાદ્યાશ્ચોપસુરાઃ શિવપૂજકાઃ ।
તથાસુરા મહાત્માનઃ શિવપૂજાકરા મતાઃ ॥ ૧૭॥

હિરણ્યકશિપુર્દૈત્યઃ સાનુજઃ સસુતો મુને ।
શિવપૂજાકરો નિત્યં વિરોચનબલી તથા ॥ ૧૮॥

મહાશૈવઃ સ્મૃતો બાણો હિરણ્યાક્ષસુતાસ્તથા ।
વૃષપર્વા દનુસ્તાત દાનવાઃ શિવપૂજકાઃ ॥ ૧૯॥

શેષશ્ચ વાસુકિશ્ચૈવ તક્ષકશ્ચ તથાઽપરે ।
શિવભક્તા મહાનાગા ગરુડાદ્યાશ્ચ પક્ષિણઃ ॥ ૨૦॥

સૂર્યચન્દ્રાવુભૌ દેવૌ પૃથ્વ્યાં વંશપ્રવર્તકૌ ।
શિવસેવારતૌ નિત્યં સવશ્યૌ તૌ મુનીશ્વર ॥ ૨૧॥

મનવશ્ચ તથા ચક્ષુઃ સ્વાયમ્ભુવપુરઃ સરાઃ ।
શિવપૂજાં વિશેષેણ શિવવેષધરા મુને ॥ ૨૨॥

પ્રિયવ્રતશ્ચ તત્પુત્રાસ્તથા ચોત્તાનપાત્સુતઃ ।
તદ્વંશાશ્ચૈવ રાજાનઃ શિવપૂજનકારકાઃ ॥ ૨૩॥

ધ્રુવશ્ચ ઋષભશ્ચૈવ ભરતો નવયોગિનઃ ।
તદ્ભ્રાતરઃ પરે ચાપિ શિવપૂજનકારકાઃ ॥ ૨૪॥

વૈવસ્વતસુતાસ્તાર્ક્ષ્ય ઇક્ષ્વાકુપ્રમુખા નૃપાઃ ।
શિવપૂજારતાત્માનઃ સર્વદા સુખભોગિનઃ ॥ ૨૫॥

કકુત્સ્થશ્ચાપિ માન્ધાતા સગરઃ શૈવસત્તમઃ ।
મુચુકુન્દો હરિશ્ચન્દ્રઃ કલ્માષાઙ્ઘ્રિસ્તથૈવ ચ ॥ ૨૬॥

ભગીરથાદયો ભૂપા બહવો નૃપસત્તમાઃ ।
શિવપૂજાકરા જ્ઞેયાઃ શિવવેષવિધાયિનઃ ॥ ૨૭॥

ખટ્વાઙ્ગશ્ચ મહારાજો દેવસાહાય્યકારકઃ ।
વિધિતઃ પાર્થિવીં મૂર્તિં શિવસ્યાપૂજયત્સદા ॥ ૨૮॥

તત્પુત્રો હિ દિલીપશ્ચ શિવપૂજનકૃત્ સદા ।
રઘુસ્તત્તનયઃ શૈવઃ સુપ્રીત્યા શિવપૂજકઃ ॥ ૨૯॥

અજઃ શિવાર્ચકસ્તસ્ય તનયો ધર્મયુદ્ધકૃત્ ।
જાતો દશરથો ભૂયો મહારાજો વિશેષતઃ ॥ ૩૦॥

પુત્રાર્થે પાર્થિવીં મૂર્ત્તિં શૈવીં દશરથો હિ સઃ ।
સમાનર્ચ વિશેષેણ વસિષ્ઠસ્યાજ્ઞયા મુનેઃ ॥ ૩૧॥

પુત્રેષ્ટિં ચ ચકારાસૌ પાર્થિવો ભવભક્તિમાન્ ।

ઋષ્યશ‍ૃઙ્ગમુનેરાજ્ઞાં સમ્પ્રાપ્ય નૃપસત્તમઃ ॥ ૩૨॥

કૌસલ્યા તત્પ્રિયા મૂર્ત્તિં પાર્થિવીં શાઙ્કરીં મુદા ।
ઋષ્યશ‍ૃઙ્ગસમાદિષ્ટા સમાનર્ચ સુતાપ્તયે ॥ ૩૩॥

સુમિત્રા ચ શિવં પ્રીત્યા કૈકેયી નૃપવલ્લભા ।
પૂજયામાસ સત્પુત્રપ્રાપ્તયે મુનિસત્તમ ॥ ૩૪॥

શિવપ્રસાદતસ્તા વૈ પુત્રાન્પ્રાપુઃ શુભઙ્કરાન્ ।
મહાપ્રતાપિનો વીરાન્ સન્માર્ગનિરતાન્મુને ॥ ૩૫॥

તતઃ શિવાજ્ઞયા તસ્માત્તાસુ રાજ્ઞઃ સ્વયં હરિઃ ।
ચતુર્ભિશ્ચૈવ રૂપૈશ્ચાવિર્બભૂવ નૃપાત્મજઃ ॥ ૩૬॥

કૌસલ્યાયાઃ સુતો રામઃ સુમિત્રાયાશ્ચ લક્ષ્મણઃ ।
શત્રુઘ્નશ્ચૈવ કૈકેય્યા ભરતશ્ચેતિ સુવ્રતાઃ ॥ ૩૭॥

રામઃ સ સહજો નિત્યં પાર્થિવં સમપૂજયત્ ।
ભસ્મરુદ્રાક્ષધારી ચ વિરજાગમમાસ્થિતઃ ॥ ૩૮॥

તદ્વંશે યે સમુત્પન્ના રાજાનઃ સાનુગા મુને ।
તે સર્વે પાર્થિવં લિઙ્ગં શિવસ્ય સમપૂજયન્ ॥ ૩૯॥

સુદ્યુમ્નશ્ચ મહારાજઃ શૈવો મનુસુતો મુને ।
શિવશાપાત્પ્રિયાહેતોરભૂન્નારી સસવેકઃ ॥ ૪૦॥

પાર્થિવેશસમર્ચાતઃ પુનઃ સોઽભૂત્પુમાન્વરઃ ।
માસં સ્ત્રી પુરુષો માસમેવં સ્ત્રીત્વં ન્યવર્તત ॥ ૪૧॥

તતો રાજ્યં પરિત્યજ્ય શિવધર્મપરાયણઃ ।
શિવવેષધરો ભક્ત્યા દુર્લભં મોક્ષમાપ્તવાન્ ॥ ૪૨॥

પુરૂરવાશ્ચ તત્પુત્રો મહારાજઃ સુપૂજકઃ ।
શિવસ્ય દેવદેવસ્ય તત્સુતઃ શિવપૂજકઃ ॥ ૪૩॥

ભરતસ્તુ મહાપૂજાં શિવસ્યૈવ સદાઽકરોત્ ।
નહુષશ્ચ મહાશૈવઃ શિવપૂજારતો હ્યભૂત્ ॥ ૪૪॥

યયાતિઃ શિવપૂજાતઃ સર્વાન્કામાનવાપ્તવાન્ ।
અજીજનત્સુતાન્પઞ્ચ શિવધર્મપરાયણાન્ ॥ ૪૫॥

તત્સુતા યદુમુખ્યાશ્ચ પઞ્ચાપિ શિવપૂજકાઃ ।
શિવપૂજાપ્રભાવેણ સર્વાન્કામાંશ્ચ લેભિરે ॥ ૪૬॥

અન્યેઽપિ યે મહાભાગાઃ સમાનર્ચુઃ શિવં હિ તે ।
તદ્વંશ્યા અન્યવંશ્યાશ્ચ ભુક્તિમુક્તિપ્રદં મુને ॥ ૪૭॥

કૃષ્ણેન ચ કૃતં નિત્યં બદરીપર્વતોત્તમે ।
પૂજનં તુ શિવસ્યૈવ સપ્તમાસાવધિ સ્વયમ્ ॥ ૪૮॥

પ્રસન્નાદ્ભગવાંસ્તસ્માદ્વરાન્દિવ્યાનનેકશઃ ।
સમ્પ્રાપ્ય ચ જગત્સર્વં વશેઽનયત શઙ્કરાત્ ॥ ૪૯॥

પ્રદ્યુમ્નઃ તત્સુતસ્તાત શિવપૂજાકરઃ સદા ।
અન્યે ચ કાર્ષ્ણિપ્રવરાઃ સામ્બાદ્યાઃ શિવપૂજકાઃ ॥ ૫૦॥

જરાસન્ધો મહાશૈવસ્તદ્વંશ્યાશ્ચ નૃપાસ્તથા ।
નિમિઃ શૈવશ્ચ જનકઃ તત્પુત્રાઃ શિવપૂજકાઃ ॥ ૫૧॥

નલેન ચ કૃતા પૂજા વીરસેનસુતેન વૈ ।
પૂર્વજન્મનિ યો ભિલ્લો વને પાન્થસુરક્ષકઃ ॥ ૫૨॥

યતિશ્ચ રક્ષિતસ્તેન પુરા હરસમીપતઃ ।
સ્વયં વ્યાઘ્રાદિભી રાત્રૌ ભક્ષિતશ્ચ મૃતો વૃષાત્ ॥ ૫૩॥

તેન પુણ્યપ્રભાવેણ સ ભિલ્લો હિ નલોઽભવત્ ।
ચક્રવર્તી મહારાજો દમયન્તીપ્રિયોઽભવત્ ॥ ૫૪॥

ઇતિ તે કથિતં તાત યત્પૃષ્ટં ભવતાનઘ ।
શાઙ્કરં ચરિતં દિવ્યં કિમન્યત્પ્રષ્ટુમિચ્છસિ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં દેવર્ષિનૃપશૈવત્વવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૪.૩૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૮. અષ્ટત્રિંશોઽધ્યાયઃ । શિવરાત્રિવ્રતમહિમનિરૂપણમ્ ।

ઋષય ઊચુઃ ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ જીવિતં સફલં તવ ।
યચ્છ્રાવયસિ નસ્તાત મહેશ્વરકથાં શુભામ્ ॥ ૧॥

બહુભિશ્ચર્ષિભિઃ સૂત શ્રુતં યદ્યપિ વસ્તુ સત્ ।
સન્દેહો ન ગતોઽસ્માકં તદેતત્કથયામિ તે ॥ ૨॥

કેન વ્રતેન સન્તુષ્ટઃ શિવો યચ્છતિ સત્સુખમ્ ।
કુશલઃ શિવકૃત્યે ત્વં તસ્માત્પૃચ્છામહે વયમ્ ॥ ૩॥

ભુક્તિર્મુક્તિશ્ચ લભ્યેત ભક્તૈર્યેન વ્રતેન વૈ ।
તદ્વદ ત્વં વિશેષેણ વ્યાસશિષ્ય નમોઽસ્તુ તે ॥ ૪॥

સૂત ઉવાચ ।
સમ્યક્પૃષ્ટમૃષિશ્રેષ્ઠા ભવદ્ભિઃ કરુણાત્મભિઃ ।
સ્મૃત્વા શિવપદામ્ભોજં કથયામિ યથાશ્રુતમ્ ॥ ૫॥

યથા ભવદ્ભિઃ પૃચ્છ્યેત તથા પૃષ્ટં હિ વેધસા ।
હરિણા શિવયા ચૈવ તથા વૈ શઙ્કરં પ્રતિ ॥ ૬॥

કસ્મિંશ્ચિત્સમયે તૈસ્તુ પૃષ્ટં ચ પરમાત્મને ।
કેન વ્રતેન સન્તુષ્ટો ભુક્તિં મુક્તિં ચ યચ્છસિ ॥ ૭॥

ઇતિ પૃષ્ટસ્તદા તૈસ્તુ હરિણા તેન વૈ તદા ।
તદહં કથયામ્યદ્ય શ◌ૃણ્વતાં પાપહારકમ્ ॥ ૮॥

। શિવ ઉવાચ ॥

ભૂરિ વ્રતાનિ મે સન્તિ ભુક્તિમુક્તિપ્રદાનિ ચ ।
મુખ્યાનિ તત્ર જ્ઞેયાનિ દશસઙ્ખ્યાનિ તાનિ વૈ ॥ ૯॥

દશ શૈવવ્રતાન્યાહુર્જાબાલશ્રુતિપારગાઃ ।
તાનિ વ્રતાનિ યત્નેન કાર્યાણ્યેવ દ્વિજૈઃ સદા ॥ ૧૦॥

પ્રત્યષ્ટમ્યાં પ્રયત્નેન કર્તવ્યં નક્તભોજનમ્ ।
કાલાષ્ટમ્યાં વિશેષેણ હરે ત્યાજ્યંઽન્નિભોજનમ્ ॥ ૧૧॥

એકાદશ્યાં સિતાયાં તુ ત્યાજ્યં વિષ્ણોઽન્નિભોજનમ્ ।
અસિતાયાં તુ ભોક્તવ્યં નક્તમભ્યર્ચ્ય માં હરે ॥ ૧૨॥

ત્રયોદશ્યાં સિતાયાં તુ કર્તવ્યં નિશિ ભોજનમ્ ।
અસિતાયાં તુ ભૂતાયાં તન્ન કાર્યં શિવવ્રતૈઃ ॥ ૧૩॥

નિશિ યત્નેન કર્તવ્યં ભોજનં સોમવાસરે ।
ઉભયોઃ પક્ષયોર્વિષ્ણો સર્વસ્મિઞ્છિવતત્પરૈઃ ॥ ૧૪॥

વ્રતેષ્વેતેષુ સર્વેષુ શૈવા ભોજ્યાઃ પ્રયત્નતઃ ।
યથાશક્તિ દ્વિજશ્રેષ્ઠા વ્રતસમ્પૂર્તિહેતવે ॥ ૧૫॥

વ્રતાન્યેતાનિ નિયમાત્કર્તવ્યાનિ દ્વિજન્મભિઃ ।
વ્રતાન્યેતાનિ તુ ત્યક્ત્વા જાયન્તે તસ્કરા દ્વિજાઃ ॥ ૧૬॥

મુક્તિમાર્ગપ્રવીણૈશ્ચ કર્તવ્યં નિયમાદિતિ ।
મુક્તેસ્તુ પ્રાપકં ચૈવ ચતુષ્ટયમુદાહૃતમ્ ॥ ૧૭॥

શિવાર્ચનં રુદ્રજપ ઉપવાસઃ શિવાલયે ।
વારાણસ્યાં ચ મરણં મુક્તિરેષા સનાતની ॥ ૧૮॥

અષ્ટમી સોમવારે ચ કૃષ્ણપક્ષે ચતુર્દશી ।
શિવતુષ્ટિકરં ચૈતન્નાત્ર કાર્યા વિચારણા ॥ ૧૯॥

ચતુર્ષ્વપિ બલિષ્ઠં હિ શિવરાત્રિવ્રતં હરે ।
તસ્માત્તદેવ કર્તવ્યં ભુક્તિમુક્તિફલેપ્સુભિઃ ॥ ૨૦॥

એતસ્માચ્ચ વ્રતાદન્યન્નાસ્તિ નૃણાં હિતાવહમ્ ।
એતદ્ વ્રતં તુ સર્વેષાં ધર્મસાધનમુત્તમમ્ ॥ ૨૧॥

નિષ્કામાનાં સકામાનાં સર્વેષાં ચ નૃણાં તથા ।
વર્ણાનામાશ્રમાણાં ચ સ્ત્રીબાલાનાં તથા હરે ॥ ૨૨॥

દાસાનાં દાસિકાનાં ચ દેવાદીનાં તથૈવ ચ ।
શરીરિણાં ચ સર્વેષાં હિતમેતદ્ વ્રતં વરમ્ ॥ ૨૩॥

માઘસ્ય હ્યસિતે પક્ષે વિશિષ્ટા સાતિ કીર્તિતા ।
નિશીથવ્યાપિની ગ્રાહ્યા હત્યાકોટિવિનાશિની ॥ ૨૪॥

તદ્દિને ચૈવ યત્કાર્યં પ્રાતરારભ્ય કેશવ ।
શ્રૂયતાં તન્મનો દત્ત્વા સુપ્રીત્યા કથયામિ તે ॥ ૨૫॥

પ્રાતરુત્થાય મેધાવી પરમાનન્દસંયુતઃ ।

સમાચરેન્નિત્યકૃત્યં સ્નાનાદિકમતન્દ્રિતઃ ॥ ૨૬॥

શિવાલયે તતો ગત્વા પૂજયિત્વા યથાવિધિ ।
નમસ્કૃત્ય શિવં પશ્ચાત્સઙ્કલ્પં સમ્યગાચરેત્ ॥ ૨૭॥

દેવદેવ મહાદેવ નીલકણ્ઠ નમોઽસ્તુ તે ।
કર્તુમિચ્છામ્યહં દેવ શિવરાત્રિવ્રતં તવ ॥ ૨૮॥

તવ પ્રભાવાદ્દેવેશ નિર્વિઘ્નેન ભવેદિતિ ।
કામાદ્યાઃ શત્રવો માં વૈ પીડાં કુર્વન્તુ નૈવ હિ ॥ ૨૯॥

એવં સઙ્કલ્પમાસ્થાય પૂજાદ્રવ્યં સમાહરેત્ ।
સુસ્થલે ચૈવ યલ્લિઙ્ગં પ્રસિદ્ધં ચાગમેષુ વૈ ॥ ૩૦॥

રાત્રૌ તત્ર સ્વયં ગત્વા સમ્પાદ્ય વિધિમુત્તમમ્ ॥

શિવસ્ય દક્ષિણે ભાગે પશ્ચિમે વા સ્થલે શુભે ॥ ૩૧॥

નિધાય ચૈવ તદ દ્રવ્યં પૂજાર્થં શિવસન્નિધૌ ।
પુનઃ સ્નાયાત્તદા તત્ર વિધિપૂર્વં નરોત્તમઃ ॥ ૩૨॥

પરિધાય શુભં વસ્ત્રમન્તર્વાસઃ શુભં તથા ।
આચમ્ય ચ ત્રિવારં હિ પૂજારમ્ભં સમાચરેત્ ॥ ૩૩॥

યસ્ય મન્ત્રસ્ય યદ દ્રવ્યં તેન પૂજાં સમાચરેત્ ।
અમન્ત્રકં ન કર્તવ્યં પૂજનં તુ હરસ્ય ચ ॥ ૩૪॥

ગીતૈર્વાદ્યૈસ્તથા નૃત્યૈર્ભક્તિભાવસમન્વિતૈઃ ।
પૂજનં પ્રથમે યામે કૃત્વા મન્ત્રં જપેદ્ બુધઃ ॥ ૩૫॥

પાર્થિવં ચ તદા શ્રેષ્ઠં વિદધ્યાન્મન્ત્રવાન્યદિ ।
કૃતનિત્યક્રિયઃ પશ્ચાત્પાર્થિવં ચ સમર્ચયેત્ ॥ ૩૬॥

પ્રથમં પાર્થિવં કૃત્વા પશ્ચાત્સ્થાપનમાચરેત્ ।
સ્તોત્રૈર્નાનાવિધૈર્દેવં તોષયેદ્ વૃષભધ્વજમ્ ॥ ૩૭॥

માહાત્મ્યં વ્રતસમ્ભૂતં પઠિતવ્યં સુધીમતા ।
શ્રોતવ્યં ભક્તવર્યેણ વ્રતસમ્પૂર્તિકામ્યયા ॥ ૩૮॥

ચતુર્ષ્વપિ ચ યામેષુ મૂર્તીનાં ચ ચતુષ્ટયમ્ ।
કૃત્વાવાહનપૂર્વં હિ વિસર્ગાવધિ વૈ ક્રમાત્ ॥ ૩૯॥

કાર્યં જાગરણં પ્રીત્યા મહોત્સવસમન્વિતમ્ ।
પ્રાતઃ સ્નાત્વા પુનસ્તત્ર સ્થાપયેત્પૂજયેચ્છિવમ્ ॥ ૪૦॥

તતઃ સમ્પ્રાર્થયેચ્છમ્ભું નતસ્કન્ધઃ કૃતાઞ્જલિઃ ।
કૃતસમ્પૂર્ણવ્રતકો નત્વા તં ચ પુનઃ પુનઃ ॥ ૪૧॥

નિયમો યો મહાદેવ કૃતશ્ચૈવ ત્વદાજ્ઞયા ।
વિસૃજ્યતે મયા સ્વામિન્ વ્રતં જાતમનુત્તમમ્ ॥ ૪૨॥

વ્રતેનાનેન દેવેશ યથાશક્તિકૃતેન ચ ।
સન્તુષ્ટો ભવ શર્વાદ્ય કૃપાં કુરુ મમોપરિ ॥ ૪૩॥

પુષ્પાઞ્જલિં શિવે દત્ત્વા દદ્યાદ્દાનં યથાવિધિ ।
નમસ્કૃત્ય શિવાયૈવ નિયમં તં વિસર્જયેત્ ॥ ૪૪॥

યથાશક્તિ દ્વિજાઞ્છૈવાન્યતિનશ્ચ વિશેષતઃ ।
ભોજયિત્વા સુસન્તોષ્ય સ્વયં ભોજનમાચરેત્ ॥ ૪૫॥

યામે યામે યથા પૂજા કાર્યા ભક્તવરૈર્હરે ।
શિવરાત્રૌ વિશેષેણ તામહં કથયામિ તે ॥ ૪૬॥

પ્રથમે ચૈવ યામે ચ સ્થાપિતં પાર્થિવં હરે ।
પૂજયેત્પરયા ભક્ત્યા સૂપચારૈરનેકશઃ ॥ ૪૭॥

પઞ્ચદ્રવ્યૈશ્ચ પ્રથમં પૂજનીયો હરઃ સદા ।
તસ્ય તસ્ય ચ મન્ત્રેણ પૃથગ્દ્રવ્યં સમર્પયેત્ ॥ ૪૮॥

તચ્ચ દ્રવ્યં સમર્પ્યૈવ જલધારાં દદેત વૈ ।
પશ્ચાચ્ચ જલધારાભિર્દ્રવ્યાણુત્તારયેદ બુધઃ ॥ ૪૯॥

શતમષ્ટોત્તરં મન્ત્રં પઠિત્વા જલધારયા ।
પૂજયેચ્ચ શિવં તત્ર નિર્ગુણં ગુણરૂપિણમ્ ॥ ૫૦॥

ગુરુદત્તેન મન્ત્રેણ પૂજયેદ્ વૃષભધ્જમ્ ।
અન્યથા નામમન્ત્રેણ પૂજયેદ્વૈ સદાશિવમ્ ॥ ૫૧॥

ચન્દનેન વિચિત્રેણ તણ્ડુલૈશ્ચાપ્યખણ્ડિતૈઃ ।
કૃષ્ણૈશ્ચૈવ તિલૈઃ પૂજા કાર્યા શમ્ભોઃ પરાત્મનઃ ॥ ૫૨॥

પુષ્પૈશ્ચ શતપત્રૈશ્ચ કરવીરૈસ્તથા પુનઃ ।
અષ્ટભિર્નામમન્ત્રૈશ્ચાર્પયેત્પુષ્પાણિ શઙ્કરે ॥ ૫૩॥

ભવઃ શર્વસ્તથા રુદ્રઃ પુનઃ પશુપતિસ્તથા ।
ઉગ્રો મહાંસ્તથા ભીમ ઈશાન ઇતિ તાનિ વૈ ॥ ૫૪॥

શ્રીપૂર્વૈશ્ચ ચતુર્થ્યન્તૈર્નામભિઃ પૂજયેચ્છિવમ્ ।
પશ્ચાદ્ધૂપં ચ દીપં ચ નૈવેદ્યં ચ તતઃ પરમ્ ॥ ૫૫॥

આદ્યે યામે ચ નૈવેદ્યં પક્વાન્નં કારયેદ્ બુધઃ ।
અર્ઘં ચ શ્રીફલં દત્ત્વા તામ્બૂલં ચ નિવેદયેત્ ॥ ૫૬॥

નમસ્કારં તતો ધ્યાનં જપઃ પ્રોક્તો ગુરોર્મનોઃ ।
અન્યથા પઞ્ચવર્ણેન તોષયેત્તેન શઙ્કરમ્ ॥ ૫૭॥

ધેનુમુદ્રાં પ્રદર્શ્યાથ સુજલૈસ્તર્પણં ચરેત્ ।
પઞ્ચબ્રાહ્મણભોજં ચ કલ્પયેદ્વૈ યથાબલમ્ ॥ ૫૮॥

મહોત્સવશ્ચ કર્તવ્યો યાવદ્યામો ભવેદિહ ।
તતઃ પૂજાફલં તસ્મૈ નિવેદ્ય ચ વિસર્જયેત્ ॥ ૫૯॥

પુનર્દ્વિતીયે યામે ચ સઙ્કલ્પં સુસમાચરેત્ ।
અથવૈકદૈવ સઙ્કલ્પ્ય કુર્યાત્પૂજાં તથાવિધામ્ ॥ ૬૦॥

દ્રવ્યૈઃ પૂર્વૈસ્તથા પૂજાં કૃત્વા ધારાં સમર્પયેત્ ।
પૂર્વતો દ્વિગુણં મન્ત્રં સમુચ્ચાર્યાર્ચયેચ્છિવમ્ ॥ ૬૧॥

પૂર્વૈસ્તિલયવૈશ્ચાથ કમલૈઃ પૂજયેચ્છિવમ્ ।
બિલ્વપત્રૈર્વિશેષેણ પૂજયેત્પરમેશ્વરમ્ ॥ ૬૨॥

અર્ઘ્યં ચ બીજપૂરેણ નૈવેદ્યં પાયસં તથા ।
મન્ત્રાવૃત્તિસ્તુ દ્વિગુણા પૂર્વતોઽપિ જનાર્દન ॥ ૬૩॥

તતશ્ચ બ્રાહ્મણાનાં હિ ભોજ્યસઙ્કલ્પમાચરેત્ ।
અન્યત્સર્વં તથા કુર્યાદ્યાવચ્ચ દ્વિતયાવધિ ॥ ૬૪॥

યામે પ્રાપ્તે તૃતીયે ચ પૂર્વવત્પૂજનં ચરેત્ ।
યવસ્થાને ચ ગોધૂમાઃ પુષ્પાણ્યર્કભવાનિ ચ ॥ ૬૫॥

ધૂપૈશ્ચ વિવિધૈસ્તત્ર દીપૈર્નાનાવિધૈરપિ ।
નૈવેદ્યાપૂપકૈર્વિષ્ણો શાકૈર્નાનાવિધૈરપિ ॥ ૬૬॥

કૃત્વૈવં ચાથ કર્પૂરૈરારાર્તિકવિધિં ચરેત્ ।

અર્ઘ્યં સદાડિમં દદ્યાદ દ્વિગુણં જપમાચરેત્ ॥ ૬૭॥

તતશ્ચ બ્રહ્મભોજસ્ય સઙ્કલ્પં ચ સદક્ષિણમ્ ।
ઉત્સવં પૂર્વવત્કુર્યાદ્યાવદ્યામાવધિર્ભવેત્ ॥ ૬૮॥

યામે ચતુર્થે સમ્પ્રાતે કુર્યાત્તસ્ય વિસર્જનમ્ ।
પ્રયોગાદિ પુનઃ કૃત્વા પૂજાં વિધિવદાચરેત્ ॥ ૬૯॥

માષૈઃ પ્રિયઙ્ગુભિર્મુદ્ગૈઃ સપ્તધાન્યૈસ્તથાથવા ।
શઙ્ખીપુષ્પૈર્બિલ્વપત્રૈઃ પૂજયેત્પરમેશ્વરમ્ ॥ ૭૦॥

નૈવેદ્યં તત્ર દદ્યાદ્વૈ મધુરૈર્વિવિધૈરપિ ।
અથવા ચૈવ માષાન્નૈસ્તોષયેચ્ચ સદાશિવમ્ ॥ ૭૧॥

અર્ઘં દદ્યાત્કદલ્યાશ્ચ ફલેનૈવાથ વા હરે ।
વિવિધૈશ્ચ ફલૈશ્ચૈવ દદ્યાદર્ઘ્યં શિવાય ચ ॥ ૭૨॥

પૂર્વતો દ્વિગુણં કુર્યાન્મન્ત્રજાપં નરોત્તમઃ ।
સઙ્કલ્પં બ્રહ્મભોજસ્ય યથાશક્તિ ચરેદ્ બુધઃ ॥ ૭૩॥

ગીતૈર્વાદ્યૈસ્તથા નૃત્યૈર્નયેત્કાલં ચ ભક્તિતઃ ।
મહોત્સવૈર્ભક્તજનૈર્યાવત્સ્યાદરુણોદયઃ ॥ ૭૪॥

ઉદયે ચ તથા જાતે પુનઃ સ્નાત્વાર્ચયેચ્છિવમ્ ।
નાનાપૂજોપહારૈશ્ચ સ્વાભિષેકમથાચરેત્ ॥ ૭૫॥

નાનાવિધાનિ દાનાનિ ભોજ્યં ચ વિવિધં તથા ।
બ્રાહ્મણાનાં યતીનાં ચ કર્તવ્યં યામસઙ્ખ્યયા ॥ ૭૬॥

શઙ્કરાય નમસ્કૃત્ય પુષ્પાઞ્જલિમથાચરેત્ ।
પ્રાર્થયેત્સુસ્તુતિં કૃત્વા મન્ત્રૈરેતૈર્વિચક્ષણઃ ॥ ૭૭॥

તાવકસ્ત્વદ્ગતપ્રાણસ્ત્વચ્ચિત્તોઽહં સદા મૃડ ।
કૃપાનિધે ઇતિ જ્ઞાત્વા યથાયોગ્યં તથા કુરુ ॥ ૭૮॥

અજ્ઞાનાદ્યદિ વા જ્ઞાનાજ્જપપૂજાદિકં મયા ।
કૃપાનિધિત્વાજ્જ્ઞાત્વૈવ ભૂતનાથ પ્રસીદ મે ॥ ૭૯॥

અનેનૈવોપવાસેન યજ્જાતં ફલમેવ ચ ।
તેનૈવ પ્રીયતાં દેવઃ શઙ્કરઃ સુખદાયકઃ ॥ ૮૦॥

કુલે મમ મહાદેવ ભજનં તેઽસ્તુ સર્વદા ।
માભૂત્તસ્ય કુલે જન્મ યત્ર ત્વં નહિ દેવતા ॥ ૮૧॥

પુષ્પાઞ્જલિં સમર્પ્યૈવં તિલકાશિષ એવ ચ ।
ગૃહ્ણીયાદ્ બ્રાહ્મણેભ્યશ્ચ તતઃ શમ્ભું વિસર્જયેત્ ॥ ૮૨॥

એવં વ્રતં કૃતં યેન તસ્માદ દૂરો હરો ન હિ ।
ન શક્યતે ફલં વક્તું નાદેયં વિદ્યતે મમ ॥ ૮૩॥

અનાયાસતયા ચેદ્વૈ કૃતં વ્રતમિદં પરમ્ ।
તસ્ય વૈ મુક્તિબીજં ચ જાતં નાત્ર વિચારણા ॥ ૮૪॥

પ્રતિમાસં વ્રતં ચૈવ કર્તવ્યં ભક્તિતો નરૈઃ ।
ઉદ્યાપનવિધિં પશ્ચાત્કૃત્વા સાઙ્ગફલં લભેત્ ॥ ૮૫॥

વ્રતસ્ય કરણાન્નૂનં શિવોઽહં સર્વદુઃખહા ।
દદ્મિ ભુક્તિં ચ મુક્તિં ચ સર્વં વૈ વાઞ્છિતં ફલમ્ ॥ ૮૬॥

સૂત ઉવાચ ।
ઇતિ શિવવચનં નિશમ્ય વિષ્ણુ-
ર્હિતતરમદ્ભુતમાજગામ ધામ ।
તદનુ વ્રતમુત્તમં જનેષુ
સમચરદાત્મહિતેષુ ચૈતદેવ ॥ ૮૭॥

કદાચિન્નારદાયાથ શિવરાત્રિવ્રતં ત્વિદમ્ ।
ભુક્તિમુક્તિપ્રદં દિવ્યં કથયામાસ કેશવઃ ॥ ૮૮॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં વ્યાધેશ્વરમાહાત્મ્યે શિવરાત્રિવ્રતમહિમનિરૂપણં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૪.૩૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૩૯. એકોનચત્વારિંશોઽધ્યાયઃ । શિવરાત્રિવ્રતોદ્યાપનમ્ ।

ઋષય ઉચુઃ ।

ઉદ્યાપનવિધિં બ્રૂહિ શિવરાત્રિવ્રતસ્ય ચ ।
યત્કૃત્વા શઙ્કરઃ સાક્ષાત્પ્રસન્નો ભવતિ ધ્રુવમ્ ॥ ૧॥

સૂત ઉવાચ ।
શ્રૂયતામૃષયો ભક્ત્યા તદુદ્યાપનમાદરાત્ ।
યસ્યાનુષ્ઠાનતઃ પૂર્ણં વ્રતં ભવતિ તદ્ ધ્રુવમ્ ॥ ૨॥

ચતુર્દશાબ્દં કર્તવ્યં શિવરાત્રિવ્રતં શુભમ્ ।
એકભક્તં ત્રયોદશ્યાં ચતુર્દશ્યામુપોષણમ્ ॥ ૩॥

શિવરાત્રિદિને પ્રાપ્તે નિત્યં સમ્પાદ્ય વૈ વિધિમ્ ।
શિવાલયં તતો ગત્વા પૂજાં કૃત્વા યથાવિધિ ॥ ૪॥

તતશ્ચ કારયેદ્દિવ્યં મણ્ડલં તત્ર યત્નતઃ ।
ગૌરીતિલકનામ્ના વૈ પ્રસિદ્ધં ભુવનત્રયે।૫॥

તન્મધ્યે લેખયેદ્દિવ્યં લિઙ્ગતોભદ્રમણ્ડલમ્ ।
અથવા સર્વતોભદ્રં મણ્ડપાન્તઃ પ્રકલ્પયેત્ ॥ ૬॥

કુમ્ભાસ્તત્ર પ્રકર્તવ્યાઃ પ્રાજાપત્યવિસંજ્ઞયા ।
સવસ્ત્રાઃ સફલાસ્તત્ર દક્ષિણાસહિતાઃ શુભાઃ ॥ ૭॥

મણ્ડલસ્ય ચ પાર્શ્વે વૈ સ્થાપનીયાઃ પ્રયત્નતઃ ।
મધ્યે ચૈકશ્ચ સંસ્થાપ્યઃ સૌવર્ણો વાપરો ઘટઃ ॥ ૮॥

તત્રોમાસહિતાં શમ્ભુમૂર્તિં નિર્માય હાટકીમ્ ।
પલેન વા તદર્ધેન યથાશક્ત્યાથવા વ્રતી ॥ ૯॥

નિધાય વામભાગે તુ શિવામૂર્તિમતન્દ્રિતઃ ।
મદીયાં દક્ષિણે ભાગે કૃત્વા રાત્રૌ પ્રપૂજયેત્ ॥ ૧૦॥

આચાર્યં વરયેત્તત્ર ચર્ત્વિગ્ભિઃ સહિતં શુચિમ્ ।
અનુજ્ઞાતશ્ચ તૈર્ભક્ત્યા શિવપૂજાં સમાચરેત્ ॥ ૧૧॥

રાત્રૌ જાગરણં કુર્યાત્પૂજાં યામોદ્ભવાં ચરન્ ।
રાત્રિમાક્રમયેત્સર્વાં ગીતનૃત્યાદિના વ્રતી ॥ ૧૨॥

એવં સમ્પૂજ્ય વિધિવત્સન્તોષ્ય પ્રાતરેવ ચ ।
પુનઃ પૂજાં તતઃ કૃત્વા હોમં કુર્યાદ્યથાવિધિ ॥ ૧૩॥

યથાશક્તિ વિધાનં ચ પ્રાજાપત્યં સમાચરેત્ ।

બ્રાહ્મણાન્ભોજયેત્પ્રીત્યા દદ્યાદ્દાનાનિ ભક્તિતઃ ॥ ૧૪॥

ઋત્વિજશ્ચ સપત્નીકાન્વસ્ત્રાલઙ્કારભૂષણૈઃ ।
અલઙ્કૃત્ય વિધાનેન દદ્યાદ્દાનં પૃથક્પૃથક્ ॥ ૧૫॥

ગાં સવત્સાં વિધાનેન યથોપસ્કરસંયુતામ્ ।
ઉક્ત્વાચાર્યાય વૈ દદ્યાચ્છિવો મે પ્રીયતામિતિ ॥ ૧૬॥

તતઃ સકુમ્ભાં તન્મૂર્તિં સવસ્ત્રાં વૃષભે સ્થિતામ્ ।
સર્વાલઙ્કારસહિતામાચાર્યાય નિવેદયેત્ ॥ ૧૭॥

તતઃ સમ્પ્રાર્થયેદ્દેવં મહેશાનં મહાપ્રભુમ્ ।
કૃતાઞ્જલિર્નતસ્કન્ધઃ સુપ્રીત્યા ગદ્ગદાક્ષરઃ ॥ ૧૮॥

દેવદેવ મહાદેવ શરણાગતવત્સલ ।
વ્રતેનાનેન દેવેશ કૃપાં કુરુ મમોપરિ ॥ ૧૯॥

મયા ભક્ત્યનુસારેણ વ્રતમેતત્કૃતં શિવ ।
ન્યૂનં સમ્પૂર્ણતાં યાતુ પ્રસાદાત્તવ શઙ્કર ॥ ૨૦॥

અજ્ઞાનાદ્યદિ વા જ્ઞાનાજ્જપપૂજાદિકં મયા ।
કૃતં તદસ્તુ કૃપયા સફલં તવ શઙ્કર ॥ ૨૧॥

એવં પુષ્પાઞ્જલિં દત્ત્વા શિવાય પરમાત્મને ।
નમસ્કારં તતઃ કુર્યાત્પ્રાર્થનાં પુનરેવ ચ ॥ ૨૨॥

એવં વ્રતં કૃતં યેન ન્યૂનં તસ્ય ન વિદ્યતે ।
મનોભીષ્ટાં તતઃ સિદ્ધિં લભતે નાત્ર સંશયઃ ॥ ૨૩॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં શિવરાત્રિવ્રતોદ્યાપનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૪.૩૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૪૦. ચત્વારિંશોઽધ્યાયઃ । શિવરાત્રિવ્રતમાહાત્મ્યવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત તે વચનં શ્રુત્વા પરાનન્દં વયં ગતાઃ ।

વિસ્તરાત્કથય પ્રીત્યા તદેવ વ્રતમુત્તમમ્ ॥ ૧॥

કૃતં પુરા ચ કેનેહ સૂતૈતદ્ વ્રતમુત્તમમ્ ।
કૃત્વાપ્યજ્ઞાનતશ્ચૈવ પ્રાપ્તં કિં ફલમુત્તમમ્ ॥ ૨॥

સૂત ઉવાચ ।
શ્રૂયતામૃષયઃ સર્વે કથયામિ પુરાતનમ્ ।
ઇતિહાસં નિષાદસ્ય સર્વપાપપ્રણાશનમ્ ॥ ૩॥

પુરા કશ્ચિદ્વને ભિલ્લો નામ્ના હ્યાસીદ્ ગુરુદ્રુહઃ ।
કુટુમ્બી બલવાન્ક્રૂરઃ ક્રૂરકર્મપરાયણઃ ॥ ૪॥

નિરન્તરં વને ગત્વા મૃગાન્ હન્તિ સ્મ નિત્યશઃ ।
ચૌર્યં ચ વિવિધં તત્ર કરોતિ સ્મ વને વસન્ ॥ ૫॥

બાલ્યાદારભ્ય તેનેહ કૃતં કિઞ્ચિચ્છુભં ન હિ ।
મહાન્કાલો વ્યતીયાય વને તસ્ય દુરાત્મનઃ ॥ ૬॥

કદાચિચ્છિવરાત્રિશ્ચ પ્રાપ્તાસીત્તત્ર શોભના ।
ન દુરાત્મા સ્મ જાનાતિ મહદ્વનનિવાસકૃત્ ॥ ૭॥

એતસ્મિન્ સમયે ભિલ્લો માત્રા પિત્રા સ્ત્રિયા તથા ।
પ્રાર્થિતશ્ચ ક્ષુધાવિષ્ટૈર્ભક્ષ્યં દેહિ વનેચર ॥ ૮॥

ઇતિ સમ્પ્રાર્થિતઃ સોઽપિ ધનુરાદાય સત્વરમ્ ।
જગામ મૃગહિંસાર્થં બભ્રામ સકલં વનમ્ ॥ ૯॥

દૈવયોગાત્તદા તેન ન પ્રાપ્તં કિઞ્ચિદેવ હિ ।
અસ્તં પ્રાપ્તસ્તદા સૂર્યઃ સ વૈ દુઃખમુપાગતઃ ॥ ૧૦॥

કિં કર્તવ્યં ક્વ ગન્તવ્યં ન પ્રાપ્તં મેઽદ્ય કિઞ્ચન ।
બાલાશ્ચ યે ગૃહે તેષાં કિં પિત્રોશ્ચ ભવિષ્યતિ ॥ ૧૧॥

મદીયં વૈ કલત્રં ચ તસ્યાઃ કિઞ્ચિદ્ભવિષ્યતિ ।
કિઞ્ચિદ્ ગૃહીત્વા હિ મયા ગન્તવ્યં નાન્યથા ભવેત્ ॥ ૧૨॥

ઇત્થં વિચાર્ય સ વ્યાધો જલાશયસમીપગઃ ।
જલાવતરણં યત્ર તત્ર ગત્વા સ્વયં સ્થિતઃ ॥ ૧૩॥

અવશ્યમત્ર કશ્ચિદ્વૈ જીવશ્ચૈવાગમિષ્યતિ ।
તં હત્વા સ્વગૃહં પ્રીત્યા યાસ્યામિ કૃતકાર્યકઃ ॥ ૧૪॥

ઇતિ મત્વા સ વૈ વૃક્ષમેકં બિલ્વેતિ સંજ્ઞકમ્ ।
સમારુહ્ય સ્થિતસ્તત્ર જલમાદાય ભિલ્લકઃ ॥ ૧૫॥

કદાયાસ્યતિ કશ્ચિદ્વૈ કદા હન્યામહં પુનઃ ।
ઇતિ બુદ્ધિં સમાસ્થાય સ્થિતોઽસૌ ક્ષુત્તૃષાન્વિતઃ ॥ ૧૬॥

તદ્રાત્રૌ પ્રથમે યામે મૃગી ત્વેકા સમાગતા ।
તૃષાર્તા ચકિતા સા ચ પ્રોત્ફાલં કુર્વતી તદા ॥ ૧૭॥

તાં દૃષ્ટ્વા ચ તદા તેન તદ્વધાર્થમથો શરઃ ।
સંહૃષ્ટેન દ્રુતં બાણં ધનુષિ સ્વે હિ સન્દધે ॥ ૧૮॥

ઇત્યેવં કુર્વતસ્તસ્ય જલં બિલ્વદલાનિ ચ ।
પતિતાનિ હ્યધસ્તત્ર શિવલિઙ્ગમભૂત્તતઃ ॥ ૧૯॥

યામસ્ય પ્રથમસ્યૈવ પૂજા જાતા શિવસ્ય ચ ।
તન્મહિમ્ના હિ તસ્યૈવ પાતકં ગલિતં તદા ॥ ૨૦॥

તત્રત્યં ચૈવ તચ્છબ્દં શ્રુત્વા સા હરિણી ભિયા ।
વ્યાધં દૃષ્ટ્વા વ્યાકુલા હિ વચનં ચેદમબ્રવીત્ ॥ ૨૧॥

મૃગ્યુવાચ ।
કિં કર્તુમિચ્છસિ વ્યાધ સત્યં વદ મમાગ્રતઃ ।
તચ્છ્રુત્વા હરિણીવાક્યં વ્યાધો વચનમબ્રવીત્ ॥ ૨૨॥

વ્યાધ ઉવાચ ।
કુટુમ્બં ક્ષુધિતં મેઽદ્ય હત્વા ત્વાં તર્પયામ્યહમ્ ।
દારુણં તદ્વચઃ શ્રુત્વા દૃષ્ટ્વા તં દુર્ધરં ખલમ્ ॥ ૨૩॥

કિં કરોમિ ક્વ ગચ્છામિ હ્યુપાયં રચયામ્યહમ્ ।
ઇત્થં વિચાર્ય સા તત્ર વચનં ચેદમબ્રવીત્ ॥ ૨૪॥

મૃગ્યુવાચ ।
મન્માંસેન સુખં તે સ્યાદ્દેહસ્યાનર્થકારિણઃ ।
અધિકં કિં મહત્પુણ્યં ધન્યાહં નાત્ર સંશયઃ ॥ ૨૫॥

ઉપકારકરસ્યૈવ યત્પુણ્યં જાયતે ત્વિહ ।
તત્પુણ્યં શક્યતે નૈવ વક્તું વર્ષશતૈરપિ ॥ ૨૬॥

પરં તુ શિશવો મેઽદ્ય વર્તન્તે સ્વાશ્રમેઽખિલાઃ ।
ભગિન્યૈ તાન્સમર્પ્યૈવ પ્રાયાસ્યે સ્વામિનેઽથવા ॥ ૨૭॥

ન મે મિથ્યાવચસ્ત્વં હિ વિજાનીહિ વનેચર ।
આયાસ્યેઽહં પુનશ્ચેહ સમીપં તે ન સંશયઃ ॥ ૨૮॥

સ્થિતા સત્યેન ધરણી સત્યેનૈવ ચ વારિધિઃ ।
સત્યેન જલધારાશ્ચ સત્યે સર્વં પ્રતિષ્ઠિતમ્ ॥ ૨૯॥

સૂત ઉવાચ ।
ઇત્યુક્તોઽપિ તયા વ્યાધો ન મેને તદ્વચો યદા ।
તદા સુવિસ્મિતા ભીતા વચનં સાબ્રવીત્પુનઃ ॥ ૩૦॥

મૃગ્યુવાચ ।
શ ૃણુ વ્યાધ પ્રવક્ષ્યામિ શપથં હિ કરોમ્યહમ્ ।
આગચ્છેયં યથા તે ન સમીપં સ્વગૃહાદ્ગતા ॥ ૩૧॥

બ્રાહ્મણો વેદવિક્રેતા સન્ધ્યાહીનસ્ત્રિકાલકમ્ ।
સ્ત્રિયઃ સ્વસ્વામિનો હ્યાજ્ઞાં સમુલ્લઙ્ઘ્ય ક્રિયાન્વિતાઃ ॥ ૩૨॥

કૃતઘ્ને ચૈવ યત્પાપં યત્પાપં વિમુખે હરે ।
દ્રોહિણશ્ચૈવ યત્પાપં યત્પાપં ધર્મલઙ્ઘને ॥ ૩૩॥

વિશ્વાસઘાતકે યચ્ચ તથા વૈ છલકર્તરિ ।
તેન પાપેન લિમ્પામિ યદ્યહં નાગમે પુનઃ ॥ ૩૪॥

ઇત્યાદ્યનેકશપથાન્મૃગી કૃત્વા સ્થિતા યદા ।
તદા વ્યાધઃ સ વિશ્વસ્ય ગચ્છેતિ ગૃહમબ્રવીત્ ॥ ૩૫॥

મૃગી હૃષ્ટા જલં પીત્વા ગતા સ્વાશ્રમમણ્ડલમ્ ।
તાવચ્ચ પ્રથમો યામસ્તસ્ય નિદ્રાં વિના ગતઃ ॥ ૩૬॥

તદીયા ભગિની યા વૈ મૃગી ચ પરિભાવિતા ।
તસ્યા માર્ગં વિચિન્વન્તી હ્યાજગામ જલાર્થિની ॥ ૩૭॥

તાં દૃષ્ટ્વા ચ સ્વયં ભિલ્લોઽકાર્ષીદ્બાણસ્ય કર્ષણમ્ ।
પૂર્વવજ્જલપત્રાણિ પતિતાનિ શિવોપરિ ॥ ૩૮॥

યામસ્ય ચ દ્વિતીયસ્ય તેન શમ્ભોર્મહાત્મનઃ ।
પૂજા જાતા પ્રસઙ્ગેન વ્યાધસ્ય સુખદાયિની ॥ ૩૯॥

મૃગી સા પ્રાહ તં દૃષ્ટ્વા કિં કરોષિ વનેચર ।
પૂર્વવત્ કથિતં તેન તચ્છ્રુત્વાહ મૃગી પુનઃ ॥ ૪૦॥

મૃગ્યુવાચ ।
ધન્યાહં શ્રૂયતાં વ્યાધ સફલં દેહધારણમ્ ।
અનિત્યેન શરીરેણ હ્યુપકારો ભવિષ્યતિ ॥ ૪૧॥

પરન્તુ મમ બાલાશ્ચ ગૃહે તિષ્ઠન્તિ ચાર્ભકાઃ ।
ભર્ત્રે તાંશ્ચ સમર્પ્યૈવ હ્યાગમિષ્યામ્યહં પુનઃ ॥ ૪૨॥

વ્યાધ ઉવાચ ।
ત્વયા ચોક્તં ન મન્યેઽહં હન્મિ ત્વાં નાત્ર સંશયઃ ।
તચ્છ્રુત્વા હરિણી પ્રાહ શપથં કુર્વતી હરેઃ ॥ ૪૩॥

મૃગ્યુવાચ ।
શૃણુ વ્યાધ પ્રવક્ષ્યામિ નાગચ્છેયં પુનર્યદિ ।
વાચા વિચલિતો યસ્તુ સુકૃતં તેન હારિતમ્ ॥ ૪૪॥

પરિણીતાં સ્ત્રિયં હિત્વા ગચ્છત્યન્યાં ચ યઃ પુમાન્ ।
વેદધર્મં સમુલ્લઙ્ઘ્ય કલ્પિતેન ચ યો વ્રજેત્ ॥ ૪૫॥

વિષ્ણુભક્તિસમાયુક્તઃ શિવનિન્દાં કરોતિ યઃ ।
પિત્રોઃ ક્ષયાહમાસાદ્ય શૂન્યં ચૈવાક્રમેદિહ ॥ ૪૬॥

કૃત્વા ચ પરિતાપં હિ કરોતિ વચનં પુનઃ ।
તેન પાપેન લિમ્પામિ નાગચ્છેયં પુનર્યદિ ॥ ૪૭॥

સૂત ઉવાચ ।
ઇત્યુક્તશ્ચ તયા વ્યાધો ગચ્છેત્યાહ મૃગીં ચ સઃ ।
સા મૃગી ચ જલં પીત્વા હૃષ્ટાગચ્છત્સ્વમાશ્રમમ્ ॥ ૪૮॥

તાવદ્ દ્વિતીયો યામો વૈ તસ્ય નિદ્રાં વિના ગતઃ ।
એતસ્મિન્સમયે તત્ર પ્રાપ્તે યામે તૃતીયકે ॥ ૪૯॥

જ્ઞાત્વા વિલમ્બં ચકિતસ્તદન્વેષણતત્પરઃ ।
તદ્યામે મૃગમદ્રાક્ષીજ્જલમાર્ગગતં તતઃ ॥ ૫૦॥

પુષ્ટં મૃગં ચ તં દૃષ્ટ્વા હૃષ્ટો વનચરઃ સ વૈ ।
શરં ધનુષિ સન્ધાય હન્તું તં હિ પ્રચક્રમે ॥ ૫૧॥

તદૈવં કુર્વતસ્તસ્ય બિલ્વપત્રાણિ કાનિચિત્ ।
તત્પ્રારબ્ધવશાદ્ દ્વિજાઃ પતિતાનિ શિવોપરિ ॥ ૫૨॥

તેન તૃતીયયામસ્ય તદ્રાત્રૌ તસ્ય ભાગ્યતઃ ।
પૂજા જાતા શિવસ્યૈવ કૃપાલુત્વં પ્રદર્શિતમ્ ॥ ૫૩॥

શ્રુત્વા તત્ર ચ તં શબ્દં કિં કરોષીતિ પ્રાહ સઃ ।
કુટુમ્બાર્થમહં હન્મિ ત્વાં વ્યાધશ્ચેતિ સોઽબ્રવીત્ ॥ ૫૪॥

તચ્છ્રુત્વા વ્યાધવચનં હરિણો હૃષ્ટમાનસઃ ।
દ્રુતમેવ ચ તં વ્યાધં વચનં ચેદમબ્રવીત્ ॥ ૫૫॥

હરિણ ઉવાચ ।
ધન્યોઽહં પુષ્ટિમાનદ્ય ભવત્તૃપ્તિર્ભવિષ્યતિ ।
યસ્યાઙ્ગં નોપકારાર્થં તસ્ય સર્વં વૃથા ગતમ્ ॥ ૫૬॥

યો વૈ સામર્થ્યયુક્તશ્ચ નોપકારં કરોતિ વૈ ।
તત્સામર્થ્યં ભવેદ વ્યર્થં પરત્ર નરકં વ્રજેત્ ॥ ૫૭॥

પરન્તુ બાલકાન્ સ્વાંશ્ચ સમર્પ્ય જનનીં શિશૂન્ ।
આશ્વાસ્યાપ્યથ તાન્ સર્વાનાગમિષ્યામ્યહં પુનઃ ॥ ૫૮॥

ઇત્યુક્તસ્તેન સ વ્યાધો વિસ્મિતોઽતીવ ચેતસિ ।
મનાક્ શુદ્ધમના નષ્ટપાપપુઞ્જો વચોઽબ્રવીત્ ॥ ૫૯॥

વ્યાધ ઉવાચ ।
યે યે સમાગતાશ્ચાત્ર તે તે સર્વે ત્વયા યથા ।
કથયિત્વા ગતા હ્યત્ર નાયાન્ત્યદ્યાપિ વઞ્ચકાઃ ॥ ૬૦॥

ત્વં ચાપિ સઙ્કટે પ્રાપ્તો વ્યલીકં ચ ગમિષ્યસિ ।
મમ સઞ્જીવનં ચાદ્ય ભવિષ્યતિ કથં મૃગ ॥ ૬૧॥

મૃગ ઉવાચ ।
શ‍ૃણુ વ્યાધ પ્રવક્ષ્યામિ નાનૃતં વિદ્યતે મયિ ।
સત્યેન સર્વં બ્રહ્માણ્ડં તિષ્ઠત્યેવ ચરાચરમ્ ॥ ૬૨॥

યસ્ય વાણી વ્યલીકા હિ તત્પુણ્યં ગલિતં ક્ષણાત્ ।
તથાપિ શ‍ૃણુ વૈ સત્યાં પ્રતિજ્ઞાં મમ ભિલ્લક ॥ ૬૩॥

સન્ધ્યાયાં મૈથુને ઘસ્રે શિવરાત્ર્યાં ચ ભોજને ।

કૂટસાક્ષ્યે ન્યાસહારે સન્ધ્યાહીને દ્વિજે તથા ॥ ૬૪॥

શિવહીનં મુખં યસ્ય નોપકર્તા ક્ષમોઽપિ સન્ ।
પર્વણિ શ્રીફલસ્યૈવ ત્રોટનેઽભક્ષ્યભક્ષણે ॥ ૬૫॥

અસમ્પૂજ્ય શિવં ભસ્મરહિતશ્ચાન્નભુક્ ચ યઃ ।
એતેષાં પાતકં મે સ્યાન્નાગચ્છેયં પુનર્યદિ ॥ ૬૬॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય ગચ્છ શીઘ્રં સમાવ્રજ ।
સ વ્યાધેનૈવમુક્તસ્તુ જલં પીત્વા ગતો મૃગઃ ॥ ૬૭॥

તે સર્વે મિલિતાસ્તત્ર સ્વાશ્રમે કૃતસુપ્રણાઃ ।
વૃત્તાન્તં ચૈવ તં સર્વં શ્રુત્વા સમ્યક્ પરસ્પરમ્ ॥ ૬૮॥

ગન્તવ્યં નિશ્ચયેનેતિ સત્યપાશેન યન્ત્રિતાઃ ।
આશ્વાસ્ય બાલકાંસ્તત્ર ગન્તુમુત્કણ્ઠિતાસ્તદા ॥ ૬૯॥

મૃગી જ્યેષ્ઠા ચ યા તત્ર સ્વામિનં વાક્યમબ્રવીત્ ।
ત્વાં વિના બાલકા હ્યત્ર કથં સ્થાસ્યન્તિ વૈ મૃગ ॥ ૭૦॥

પ્રથમં તુ મયા તત્ર પ્રતિજ્ઞા ચ કૃતા પ્રભો ।
તસ્માન્મયા ચ ગન્તવ્યં ભવદ્ભ્યાં સ્થીયતામિહ ॥ ૭૧॥

ઇતિ તદ્વચનં શ્રુત્વા કનિષ્ઠા વાક્યમબ્રવીત્ ।
અહં ત્વત્સેવિકા ચાદ્ય ગચ્છામિ સ્થીયતાં ત્વયા ॥ ૭૨॥

તચ્છ્રુત્વા ચ મૃગઃ પ્રાહ ગમ્યતે તત્ર વૈ મયા ।
ભવત્યૌ તિષ્ઠતાં ચાત્ર માતૃતઃ શિશુરક્ષણમ્ ॥ ૭૩॥

તત્સ્વામિવચનં શ્રુત્વા મેનાતે તન્ન ધર્મતઃ ।
પ્રોચુઃ પ્રીત્યા સ્વભર્તારં વૈધવ્યે જીવિતં ચ ધિક્ ॥ ૭૪॥

બાલાનાશ્વાસ્ય તાંસ્તત્ર સમર્પ્ય સહવાસિનઃ ।
ગતાસ્તે સર્વ એવાશુ યત્રાસ્તે વ્યાધસત્તમઃ ॥ ૭૫॥

તે બાલા અપિ સર્વે વૈ વિલોક્યાનુસમાગતાઃ ।
એતેષાં યા ગતિઃ સ્યાદ્વૈ હ્યસ્માકં સા ભવત્વિતિ ॥ ૭૬॥

તાન્ દૃષ્ટ્વા હર્ષિતો વ્યાધો બાણં ધનુષિ સન્દધે ।
પુનશ્ચ જલપત્રાણિ પતિતાનિ શિવોપરિ ॥ ૭૭॥

તેન જાતા ચતુર્થસ્ય પૂજા યામસ્ય વૈ શુભા ।
તસ્ય પાપં તદા સર્વં ભસ્મસાદભવત્ ક્ષણાત્ ॥ ૭૮॥

મૃગી મૃગી મૃગશ્ચોચુઃ શીઘ્રં વૈ વ્યાધસત્તમ ।
અસ્માકં સાર્થકં દેહં કુરુ ત્વં હિ કૃપાં કુરુ ॥ ૭૯॥

ઇતિ તેષાં વચઃ શ્રુત્વા વ્યાધો વિસ્મયમાગતઃ ।
શિવપૂજાપ્રભાવેણ જ્ઞાનં દુર્લભમાપ્તવાન્ ॥ ૮૦॥

એતે ધન્યા મૃગાશ્ચૈવ જ્ઞાનહીનાઃ સુસમ્મતાઃ ।
સ્વીયેનૈવ શરીરેણ પરોપકરણે રતાઃ ॥ ૮૧॥

માનુષ્યં જન્મ સમ્પ્રાપ્ય સાધિતં કિં મયાધુના ।
પરકાયં ચ સમ્પીડ્ય શરીરં પોષિતં મયા ॥ ૮૨॥

કુટુમ્બં પોષિતં નિત્યં કૃત્વા પાપાન્યનેકશઃ ।
એવં પાપાનિ હા કૃત્વા કા ગતિર્મે ભવિષ્યતિ ॥ ૮૩॥

કાં વા ગતિં ગમિષ્યામિ પાતકં જન્મતઃ કૃતમ્ ।
ઇદાનીં ચિન્તયામ્યેવં ધિગ્ ધિક્ ચ જીવનં મમ ॥ ૮૪॥

ઇતિ જ્ઞાનં સમાપન્નો બાણં સંવારયંસ્તદા ।
ગમ્યતાં ચ મૃગશ્રેષ્ઠા ધન્યાઃ સ્થ ઇતિ ચાબ્રવીત્ ॥ ૮૫॥

ઇત્યુક્તે ચ તદા તેન પ્રસન્નઃ શઙ્કરસ્તદા ।
પૂજિતં ચ સ્વરૂપં હિ દર્શયામાસ સમ્મતમ્ ॥ ૮૬॥

સંસ્પૃશ્ય કૃપયા શમ્ભુસ્તં વ્યાધં પ્રીતિતોઽબ્રવીત્ ।
વરં બ્રૂહિ પ્રસન્નોઽસ્મિ વ્રતેનાનેન ભિલ્લક ॥ ૮૭॥

વ્યાધોઽપિ શિવરૂપં ચ દૃષ્ટ્વા મુક્તોઽભવત્ક્ષણાત્ ।
પપાત શિવપાદાગ્રે સર્વં પ્રાપ્તમિતિ બ્રુવન્ ॥ ૮૮॥

શિવોઽપિ સુપ્રસન્નાત્મા નામ દત્વા ગુહેતિ ચ ।
વિલોક્ય તં કૃપાદૃષ્ટ્યા તસ્મૈ દિવ્યાન્વરાનદાત્ ॥ ૮૯॥

શિવ ઉવાચ ।
શૃણુ વ્યાધાદ્ય ભોગાંસ્ત્વં ભુઙ્ક્ષ્વ દિવ્યાન્યથેપ્સિતાન્ ।
રાજધાનીં સમાશ્રિત્ય શૃઙ્ગવેરપુરે પરામ્ ॥ ૯૦॥

અનપાયા વંશવૃદ્ધિઃ શ્લાઘનીયઃ સુરૈરપિ ।
ગૃહે રામસ્તવ વ્યાધ સમાયાસ્યતિ નિશ્ચિતમ્ ॥ ૯૧॥

કરિષ્યતિ ત્વયા મૈત્રીં મદ્ભક્તસ્નેહકારકઃ ।
મત્સેવાસક્તચેતાસ્ત્વં મુક્તિં યાસ્યસિ દુર્લભામ્ ॥ ૯૨॥

સૂત ઉવાચ ।
એતસ્મિન્નન્તરે તે તુ કૃત્વા શઙ્કરદર્શનમ્ ।
સર્વે પ્રણમ્ય સન્મુક્તિં મૃગયોનેઃ પ્રપેદિરે ॥ ૯૩॥

વિમાનં ચ સમારુહ્ય દિવ્યદેહા ગતાસ્તદા ।
શિવદર્શનમાત્રેણ શાપાન્મુક્તા દિવં ગતાઃ ॥ ૯૪॥

વ્યાધેશ્વરઃ શિવો જાતઃ પર્વતે હ્યર્બુદાચલે ।
દર્શનાત્પૂજનાત્સદ્યો ભુક્તિમુક્તિપ્રદાયકઃ ॥ ૯૫॥

વ્યાધોઽપિ તદ્દિનાન્નૂનં ભોગાન્સ ભૂસુરસત્તમાઃ ।
ભુક્ત્વા રામકૃપાં પ્રાપ્ય શિવસાયુજ્યમાપ્તવાન્ ॥ ૯૬॥

અજ્ઞાનાત્સ વ્રતં ચૈતત્ કૃત્વા સાયુજ્યમાપ્તવાન્ ।
કિં પુનર્ભક્તિસમ્પન્ના યાન્તિ તન્મયતાં શુભામ્ ॥ ૯૭॥

વિચાર્ય સર્વશાસ્ત્રાણિ ધર્માંશ્ચૈવાપ્યનેકશઃ ।
શિવરાત્રિવ્રતમિદં સર્વોત્કૃષ્ટં પ્રકીર્તિતમ્ ॥ ૯૮॥

વ્રતાનિ વિવિધાન્યત્ર તીર્થાનિ વિવિધાનિ ચ ।
દાનાનિ ચ વિચિત્રાણિ મખાશ્ચ વિવિધાસ્તથા ॥ ૯૯॥

તપાંસિ વિવિધાન્યેવ જપાશ્ચૈવાપ્યનેકશઃ ।
નૈતેન સમતાં યાન્તિ શિવરાત્રિવ્રતેન ચ ॥ ૧૦૦॥

તસ્માચ્છુભતરં ચૈતત્કર્તવ્યં હિતમીપ્સુભિઃ ।
શિવરાત્રિવ્રતં દિવ્યં ભુક્તિમુક્તિપ્રદં સદા ॥ ૧૦૧॥

એતત્સર્વં સમાખ્યાતં શિવરાત્રિવ્રતં શુભમ્ ।
વ્રતરાજેતિ વિખ્યાતં કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૧૦૨॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં વ્યાધેશ્વરમાહાત્મ્યે શિવરાત્રિવ્રતમાહાત્મ્યવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૦॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૪૧. એકચત્વારિંશોઽધ્યાયઃ । મુક્તિનિરૂપણમ્ ।

ઋષય ઊચુઃ ।
મુક્તિર્નામ ત્વયા પ્રોક્તા તસ્યાં કિં નુ ભવેદિહ ।
અવસ્થા કીદૃશી તત્ર ભવેદિતિ વદસ્વ નઃ ॥ ૧॥

સૂત ઉવાચ ।
મુક્તિશ્ચતુર્વિધા પ્રોક્તા શ્રૂયતાં કથયામિ વઃ ।
સંસારક્લેશસંહર્ત્રી પરમાનન્દદાયિની ॥ ૨॥

સારૂપ્યા ચૈવ સાલોક્યા સાન્નિધ્યા ચ તથા પરા ।
સાયુજ્યા ચ ચતુર્થી સા વ્રતેનાનેન યા ભવેત્ ॥ ૩॥

મુક્તેર્દાતા મુનિશ્રેષ્ઠાઃ કેવલં શિવ ઉચ્યતે ।
બ્રહ્માદ્યા ન હિ તે જ્ઞેયાઃ કેવલં ચ ત્રિવર્ગદાઃ ॥ ૪॥

બ્રહ્માદ્યાસ્ત્રિગુણાધીશાઃ શિવસ્ત્રિગુણતઃ પરઃ ।
નિર્વિકારી પરબ્રહ્મ તુર્યઃ પ્રકૃતિતઃ પરઃ ॥ ૫॥

જ્ઞાનરૂપોઽવ્યયઃ સાક્ષી જ્ઞાનગમ્યોઽદ્વયઃ સ્વયમ્ ।
કૈવલ્યમુક્તિદઃ સોઽત્ર ત્રિવર્ગસ્ય પ્રદોઽપિ હિ ॥ ૬॥

કૈવલ્યાખ્યા પઞ્ચમી ચ દુર્લભા સર્વથા નૃણામ્ ।
તલ્લક્ષણં પ્રવક્ષ્યામિ શ્રૂયતામૃષિસત્તમાઃ ॥ ૭॥

ઉત્પદ્યતે યતઃ સર્વં યેનૈતત્પાલ્યતે જગત્ ।
યસ્મિંશ્ચ લીયતે તદ્ધિ યેન સર્વમિદં તતમ્ ॥ ૮॥

તદેવ શિવરૂપં હિ પઠ્યતે ચ મુનીશ્વરાઃ ।
સકલં નિષ્કલં ચેતિ દ્વિવિધં વેદવર્ણિતમ્ ॥ ૯॥

વિષ્ણુના તચ્ચ ન જ્ઞાતં બ્રહ્મણા ન ચ તત્તથા ।
કુમારાદ્યૈશ્ચ ન જ્ઞાતં ન જ્ઞાતં નારદેન વૈ ॥ ૧૦॥

શુકેન વ્યાસપુત્રેણ વ્યાસેન ચ મુનીશ્વરૈઃ ।

તત્પૂર્વૈશ્ચાખિલૈર્દેવૈર્વેદૈઃ શાસ્ત્રૈસ્તથા ન હિ ॥ ૧૧॥

સત્યં જ્ઞાનમનન્તં ચ સચ્ચિદાનન્દસંજ્ઞિતમ્ ।
નિર્ગુણો નિરુપાધિશ્ચાવ્યયઃ શુદ્ધો નિરઞ્જનઃ ॥ ૧૨॥

ન રક્તો નૈવ પીતશ્ચ ન શ્વેતો નીલ એવ ચ ।
ન હ્રસ્વો ન ચ દીર્ઘશ્ચ ન સ્થૂલઃ સૂક્ષ્મ એવ ચ ॥ ૧૩॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
તદેવ પરમં પ્રોક્તં બ્રહ્મૈવ શિવસંજ્ઞકમ્ ॥ ૧૪॥

આકાશં વ્યાપકં યદ્વત્તથૈવ વ્યાપકં ત્વિદમ્ ।
માયાતીતં પરાત્માનં દ્વન્દ્વાતીતં વિમત્સરમ્ ॥ ૧૫॥

તત્પ્રાપ્તિશ્ચ ભવેદત્ર શિવજ્ઞાનોદયાદ્ ધ્રુવમ્ ।
ભજનાદ્વા શિવસ્યૈવ સૂક્ષ્મમત્યા સતાં દ્વિજાઃ ॥ ૧૬॥

જ્ઞાનં તુ દુષ્કરં લોકે ભજનં સુકરં મતમ્ ।
તસ્માચ્છિવં ચ ભજત મુક્ત્યર્થમપિ સત્તમાઃ ॥ ૧૭॥

શિવો હિ ભજનાધીનો જ્ઞાનાત્મા મોક્ષદઃ પરઃ ।
ભક્ત્યૈવ બહવઃ સિદ્ધા મુક્તિં પ્રાપુઃ પરાં મુદા ॥ ૧૮॥

જ્ઞાનમાતા શમ્ભુભક્તિર્મુક્તિભુક્તિપ્રદા સદા ।
સુલભા યત્પ્રસાદાદ્ધિ સત્પ્રેમાઙ્કુરલક્ષણા ॥ ૧૯॥

સા ભક્તિર્વિવિધા જ્ઞેયા સગુણા નિર્ગુણા દ્વિજાઃ ।
વૈધી સ્વાભાવિકી યા યા વરા સા સા સ્મૃતા પરા ॥ ૨૦॥

નૈષ્ઠિક્યનૈષ્ઠિકીભેદાદ્ દ્વિવિધૈવ હિ કીર્તિતા ।
ષડ્વિધા નૈષ્ઠિકી જ્ઞેયા દ્વિતીયૈકવિધા સ્મૃતા ॥ ૨૧॥

વિહિતાવિહિતાભેદાત્તામનેકાં વિદુર્બુધાઃ ।
તયોર્બહુવિધત્વાચ્ચ વિસ્તારો ન હિ વર્ણ્યતે ॥ ૨૨॥

તે નવાઙ્ગે ઉભે જ્ઞેયે શ્રવણાદિકભેદતઃ ।
સુદુષ્કરે તત્પ્રસાદં વિના ચ સુકરે તતઃ ॥ ૨૩॥

ભક્તિજ્ઞાને ન ભિન્ને હિ શમ્ભુના વર્ણિતે દ્વિજાઃ ।
તસ્માદ્ભેદો ન કર્તવ્યઃ તત્કર્તુઃ સર્વદા સુખમ્ ॥ ૨૪॥

વિજ્ઞાનં ન ભવત્યેવ દ્વિજા ભક્તિવિરોધિનઃ ।
શમ્ભુભક્તિકરસ્યૈવ ભવેજ્જ્ઞાનોદયો દ્રુતમ્ ॥ ૨૫॥

તસ્માદ્ભક્તિર્મહેશસ્ય સાધનીયા મુનીશ્વરાઃ ।
તયૈવ નિખિલં સિદ્ધં ભવિષ્યતિ ન સંશયઃ ॥ ૨૬॥

ઇતિ પૃષ્ટં ભવદ્ભિર્યત્તદેવ કથિતં મયા ।
તચ્છુત્વા સર્વપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૨૭॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં મુક્તિનિરૂપણં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૪૨. દ્વિચત્વારિંશોઽધ્યાયઃ । સગુણનિર્ગુણભેદવર્ણનમ્ ।

ઋષય ઊચુઃ ।
શિવઃ કો વા હરિઃ કો વા રુદ્રઃ કો વા વિધિશ્ચ કઃ ।
એતેષુ નિર્ગુણઃ કો વા હ્યેતં નશ્છિન્ધિ સંશયમ્ ॥ ૧॥

સૂત ઉવાચ ।
યચ્ચાદૌ હિ સમુત્પન્નં નિર્ગુણાત્પરમાત્મનઃ ।
તદેવ શિવસંજ્ઞં હિ વેદવેદાન્તિનો વિદુઃ ॥ ૨॥

તસ્માત્પ્રકૃતિરુત્પન્ના પુરુષેણ સમન્વિતા ।
તાભ્યાં તપઃ કૃતં તત્ર મૂલસ્થે ચ જલે સુધીઃ ॥ ૩॥

પઞ્ચક્રોશીતિ વિખ્યાતા કાશી સર્વાતિવલ્લભા ।
વ્યાપ્તં ચ સકલં હ્યેતત્તજ્જલં વિશ્વતો ગતમ્ ॥ ૪॥

સમ્ભાવ્ય માયયા યુક્તસ્તત્ર સુપ્તો હરિઃ સ વૈ ।
નારાયણેતિ વિખ્યાતો માયા નારાયણી મતા ॥ ૫॥

તન્નાભિકમલે યો વૈ જાતઃ સ ચ પિતામહઃ ।
તેનૈવ તપસા દૃષ્ટઃ સ વૈ વિષ્ણુરુદાહૃતઃ ॥ ૬॥

ઉભયોર્વાદશમને યદ્રૂપં સ દર્શિતં બુધાઃ ।

મહાદેવેતિ વિખ્યાતં નિર્ગુણેન શિવેન હિ ॥ ૭॥

તેન પ્રોક્તમહં શમ્ભુર્ભવિષ્યામિ કભાલતઃ ।
રુદ્રો નામ સ વિખ્યાતો લોકાનુગ્રહકારકઃ ॥ ૮॥

ધ્યાનાર્થં ચૈવ સર્વેષામરૂપો રૂપવાનભૂત્ ।
સ એવ ચ શિવઃ સાક્ષાદ્ભક્તવાત્સલ્યકારકઃ ॥ ૯॥

શિવે ત્રિગુણસમ્ભિન્ને રુદ્રે તુ ગુણધામનિ ।
વસ્તુતો ન હિ ભેદોઽસ્તિ સ્વર્ણે તદ્ભૂષણે યથા ॥ ૧૦॥

સમાનરૂપકર્માણૌ સમભક્તગતિપ્રદૌ ।
સમાનાખિલસંસેવ્યૌ નાનાલીલાવિહારિણૌ ॥ ૧૧॥

સર્વથા શિવરૂપો હિ રુદ્રો રૌદ્રપરાક્રમઃ ।
ઉત્પન્નો ભક્તકાર્યાર્થં હરિબ્રહ્મસહાયકૃત્ ॥ ૧૨॥

અન્યે ચ યે સમુત્પન્ના યથાનુક્રમતો લયમ્ ।
યાન્તિ નૈવ તથા રુદ્રઃ શિવે રુદ્રો વિલીયતે ॥ ૪૩॥

તે વૈ રુદ્રં મિલિત્વા તુ પ્રયાન્તિ પ્રકૃતા ઇમે ।
ઇમાન્ રુદ્રો મિલિત્વા તુ ન યાતિ શ્રુતિશાસનમ્ ॥ ૧૪॥

સર્વે રુદ્રં ભજન્ત્યેવ રુદ્રઃ કઞ્ચિદ્ભજેન્ન હિ ।
સ્વાત્મના ભક્તવાત્સલ્યાદ્ભજત્યેવ કદાચન ॥ ૧૫॥

અન્યં ભજન્તિ યે નિત્યં તસ્મિંસ્તે લીનતાં ગતાઃ ।
તેનૈવ રુદ્રં તે પ્રાપ્તાઃ કાલેન મહતા બુધાઃ ॥ ૧૬॥

રુદ્રભક્તાસ્તુ યે કેચિત્તત્ક્ષણં શિવતાં ગતાઃ ।
અન્યાપેક્ષા ન વૈ તેષાં શ્રુતિરેષા સનાતની ॥ ૧૭॥

અજ્ઞાનં વિવિધં હ્યેતદ્વિજ્ઞાનં વિવિધં ન હિ ।
તત્પ્રકારમહં વક્ષ્યે શ◌ૃણુતાદરતો દ્વિજાઃ ॥ ૧૮॥

બ્રહ્માદિતૃણપર્યન્તં યત્કિઞ્ચિદ્ દૃશ્યતે ત્વિહ ।
તત્સર્વં શિવ એવાસ્તિ મિથ્યા નાનાત્વકલ્પના ॥ ૧૯॥

સૃષ્ટેઃ પૂર્વં શિવઃ પ્રોક્તઃ સૃષ્ટેર્મધ્યે શિવસ્તથા ।
સૃષ્ટેરન્તે શિવઃ પ્રોક્તઃ સર્વશૂન્યે સદાશિવઃ ॥ ૨૦॥

તસ્માચ્ચતુર્ગુણઃ પ્રોક્તઃ શિવ એવ મુનીશ્વરાઃ ।
સ એવ સગુણો જ્ઞેયઃ શક્તિમત્ત્વાદ્ દ્વિધાપિ સઃ ॥ ૨૧॥

યેનૈવ વિષ્ણવે દત્તાઃ સર્વે વેદાઃ સનાતનાઃ ।
વર્ણા માત્રા હ્યનેકાશ્ચ ધ્યાનં સ્વસ્ય ચ પૂજનમ્ ॥ ૨૨॥

ઈશાનઃ સર્વવિદ્યાનાં શ્રુતિરેષા સનાતની ।
વેદકર્તા વેદપતિસ્તસ્માચ્છમ્ભુરુદાહૃતઃ ॥ ૨૩॥

સ એવ શઙ્કરઃ સાક્ષાત્સર્વાનુગ્રહકારકઃ ।
કર્તા ભર્તા ચ હર્તા ચ સાક્ષી નિર્ગુણ એવ સઃ ॥ ૨૪॥

અન્યેષાં કાલમાનં ચ કાલસ્ય કલના ન હિ ।
મહાકાલઃ સ્વયં સાક્ષાન્મહાકાલીસમાશ્રિતઃ ॥ ૨૫॥

તથા ચ બ્રાહ્મણા રુદ્રં તથા કાલીં પ્રચક્ષતે ।
સર્વં તાભ્યાં તતઃ પ્રાપ્તમિચ્છયા સત્યલીલયા ॥ ૨૬॥

ન તસ્યોત્પાદકઃ કશ્ચિદ્ભર્તા હર્તા ન તસ્ય હિ ।
સ્વયં સર્વસ્ય હેતુસ્તે કાર્યભૂતાચ્યુતાદયઃ ॥ ૨૭॥

સ્વયં ચ કારણં કાર્યં સ્વસ્ય નૈવ કદાચન ।
એકોઽપ્યનેકતાં યાતોઽપ્યનેકોઽપ્યેકતાં વ્રજેત્ ॥ ૨૮॥

એકં બીજં બહિર્ભૂત્વા પુનર્બીજં ચ જાયતે ।
બહુત્વે ચ સ્વયં સર્વં શિવરૂપી મહેશ્વરઃ ॥ ૨૯॥

એતત્પરં શિવજ્ઞાનં તત્ત્વતસ્તદુદાહૃતમ્ ।
જાનાતિ જ્ઞાનવાનેવ નાન્યઃ કશ્ચિદૃષીશ્વરાઃ ॥ ૩૦॥

મુનય ઊચુઃ ।
જ્ઞાનં સલક્ષણં બ્રૂહિ યજ્જ્ઞાત્વા શિવતાં વ્રજેત્ ।
કથં શિવશ્ચ તત્સર્વં સર્વં વા શિવ એવ ચ ॥ ૩૧॥

વ્યાસ ઉવાચ ।
એતદાકર્ણ્ય વચનં સૂતઃ પૌરાણિકોત્તમઃ ।
સ્મૃત્વા શિવપદામ્ભોજં મુનીંસ્તાનબ્રવીદ્વચઃ ॥ ૩૨॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં સગુણનિર્ગુણભેદવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
ચતુર્થી કોટિરુદ્રસંહિતા

## ૪.૪૩. ત્રિચત્વારિંશોઽધ્યાયઃ । જ્ઞાનનિરૂપણમ્ ।

સૂત ઉવાચ ।
શ્રૂયતામૃષયઃ સર્વે શિવજ્ઞાનં યથા શ્રુતમ્ ।
કથયામિ મહાગુહ્યં પરમુક્તિસ્વરૂપકમ્ ॥ ૧॥

કનારદકુમારાણાં વ્યાસસ્ય કપિલસ્ય ચ ।
એતેષાં ચ સમાજે તૈર્નિશ્ચિત્ય સમુદાહૃતમ્ ॥ ૨॥

ઇતિ જ્ઞાનં સદા જ્ઞેયં સર્વં શિવમયં જગત્ ।
શિવઃ સર્વમયો જ્ઞેયઃ સર્વજ્ઞેન વિપશ્ચિતા ॥ ૩॥

આબ્રહ્મતૃણપર્યન્તં યત્કિઞ્ચિદ્ દૃશ્યતે જગત્ ।
તત્સર્વં શિવ એવાસ્તિ સ દેવઃ શિવ ઉચ્યતે ॥ ૪॥

યદેચ્છા તસ્ય જાયેત તદા ચ ક્રિયતે ત્વિદમ્ ।
સર્વં સ એવ જાનાતિ તં ન જાનાતિ કશ્ચન ॥ ૫॥

રચયિત્વા સ્વયં તચ્ચ પ્રવિશ્ય દૂરતઃ સ્થિતઃ ।
ન તત્ર ચ પ્રવિષ્ટોઽસૌ નિર્લિપ્તશ્ચિત્સ્વરૂપવાન્ ॥ ૬॥

યથા ચ જ્યોતિષશ્ચૈવ જલાદૌ પ્રતિબિમ્બતા ।
વસ્તુતો ન પ્રવેશો વૈ તથૈવ ચ શિવઃ સ્વયમ્ ॥ ૭॥

વસ્તુતસ્તુ સ્વયં સર્વં ક્રમો હિ ભાસતે શુભઃ ।
અજ્ઞાનં ચ મતેર્ભેદો નાસ્ત્યન્યચ્ચ દ્વયં પુનઃ ॥ ૮॥

દર્શનેષુ ચ સર્વેષુ મતિભેદઃ પ્રદર્શ્યતે ।
પરં વેદાન્તિનો નિત્યમદ્વૈતં પ્રતિચક્ષતે ॥ ૯॥

સ્વસ્યાપ્યંશસ્ય જીવાંઽશો હ્યવિદ્યામોહિતોઽવશઃ ।
અન્યોઽહમિતિ જાનાતિ તયા મુક્તો ભવેચ્છિવઃ ॥ ૧૦॥

સર્વં વ્યાપ્ય શિવઃ સાક્ષાદ્ વ્યાપકઃ સર્વજન્તુષુ ।
ચેતનાચેતનેશોઽપિ સર્વત્ર શઙ્કરઃ સ્વયમ્ ॥ ૧૧॥

ઉપાયં યઃ કરોત્યસ્ય દર્શનાર્થં વિચક્ષણઃ ।
વેદાન્તમાર્ગમાશ્રિત્ય તદ્દર્શનફલં લભેત્ ॥ ૧૨॥

યથાગ્નિર્વ્યાપકશ્ચૈવ કાષ્ઠે કાષ્ઠે ચ તિષ્ઠતિ ।
યો વૈ મન્થતિ તત્કાષ્ઠં સ વૈ પશ્યત્યસંશયમ્ ॥ ૧૩॥

ભક્ત્યાદિસાધનાનીહ યઃ કરોતિ વિચક્ષણઃ ।
સ વૈ પશ્યત્યવશ્યં હિ તં શિવં નાત્ર સંશયઃ ॥ ૧૪॥

શિવઃશિવઃશિવશ્ચૈવ નાન્યદસ્તીતિ કિઞ્ચન ।
ભ્રાન્ત્યા નાનાસ્વરૂપો હિ ભાસતે શઙ્કરઃ સદા ॥ ૧૫॥

યથા સમુદ્રો મૃચ્ચૈવ સુવર્ણમથવા પુનઃ ।
ઉપાધિતો હિ નાનાત્વં લભતે શઙ્કરસ્તથા ॥ ૧૬॥

કાર્યકારણયોર્ભેદો વસ્તુતો ન પ્રવર્તતે ।
કેવલં ભ્રાન્તિબુદ્ધ્યૈવ તદભાવે સ નશ્યતિ ॥ ૧૭॥

યદા બીજાત્પ્રરોહશ્ચ નાનાત્વં હિ પ્રકાશયેત્ ।
અન્તે ચ બીજમેવ સ્યાત્તત્પ્રરોહશ્ચ નશ્યતિ ॥ ૧૮॥

જ્ઞાની ચ બીજમેવ સ્યાત્પ્રરોહો વિકૃતીર્મતા ।
તન્નિવૃત્તૌ પુનર્જ્ઞાની નાત્ર કાર્યા વિચારણા ॥ ૧૯॥

સર્વં શિવઃ શિવઃ સર્વો નાસ્તિ ભેદશ્ચ કશ્ચન ।
કથં ચ વિવિધં પશ્યત્યેકત્વં ચ કથં પુનઃ ॥ ૨૦॥

યથૈકં ચૈવ સૂર્યાખ્યં જ્યોતિર્નાનાવિધં જનૈઃ ।
જલાદૌ ચ વિશેષેણ દૃશ્યતે તત્તથૈવ સઃ ॥ ૨૧॥

સર્વત્ર વ્યાપકશ્ચૈવ સ્પર્શત્વં ન વિબધ્યતે ।
તથૈવ વ્યાપકો દેવો બધ્યતે ન ક્વચિત્સ વૈ ॥ ૨૨॥

સાહઙ્કારસ્તથા જીવસ્તન્મુક્તઃ શઙ્કરઃ સ્વયમ્ ।
જીવસ્તુચ્છઃ કર્મભોગી નિર્લિપ્તઃ શઙ્કરો મહાન્ ॥ ૨૩॥

યથૈકં ચ સુવર્ણાદિ મિલિતં રજતાદિના ।
અલ્પમૂલ્યં પ્રજાયેત તથા જીવોઽપ્યહંયુતઃ ॥ ૨૪॥

યથૈવ હિ સુવર્ણાદિ ક્ષારાદૈઃ શોધિતં શુભમ્ ।
પૂર્વવન્મૂલ્યતાં યાતિ તથા જીવોઽપિ સંસ્કૃતઃ ॥ ૨૫॥

પ્રથમં સદ્ગુરું પ્રાપ્ય ભક્તિભાવસમન્વિતઃ ।
શિવબુદ્ધ્યા કરોત્યુચ્ચૈઃ પૂજનં સ્મરણાદિકમ્ ॥ ૨૬॥

તદ્બુધ્યા દેહતો યાતિ સર્વપાપાદિકો મલઃ ।
તદાજ્ઞાનં ચ નશ્યેત જ્ઞાનવાઞ્જાયતે યદા ॥ ૨૭॥

તદાહઙ્કારનિર્મુક્તો જીવો નિર્મલબુદ્ધિમાન્ ।
શઙ્કરસ્ય પ્રસાદેન યાતિ શઙ્કરતાં પુનઃ ॥ ૨૮॥

યથાદર્શસ્વરૂપે ચ સ્વીયરૂપં પ્રદૃશ્યતે ।
તથા સર્વત્રગં શમ્ભું પશ્યતીતિ સુનિશ્ચિતમ્ ॥ ૨૯॥

જીવન્મુક્તઃ સ એવાસૌ દેહઃ શિર્ણઃ શિવે મિલેત્ ।
પ્રારબ્ધવશગો દેહસ્તદ્ભિન્નો જ્ઞાનવાન્ મતઃ ॥ ૩૦॥

શુભં લબ્ધ્વા ન હૃષ્યેત કુપ્યેલ્લબ્ધ્વાશુભં ન હિ ।
દ્વન્દ્વેષુ સમતા યસ્ય જ્ઞાનવાનુચ્યતે હિ સઃ ॥ ૩૧॥

આત્મયોગેન તત્ત્વાનામથવા ચ વિવેકતઃ ।
યથા શરીરતો યાયાચ્છરીરં મુક્તિમિચ્છતા ॥ ૩૨॥

સદાશિવો વિલીયેત મુક્તો વિરહમેવ ચ ।
જ્ઞાનમૂલં તથાધ્યાત્મ્યં તસ્ય ભક્તિઃ શિવસ્ય ચ ॥ ૩૩॥

ભક્તેશ્ચ પ્રેમ સમ્પ્રોક્તં પ્રેમ્ણશ્ચ શ્રવણં તથા ।
શ્રવણાચ્ચાપિ સત્સઙ્ગઃ સત્સઙ્ગાચ્ચ ગુરુર્બુધઃ ॥ ૩૪॥

સમ્પન્ને ચ તથા જ્ઞાને મુક્તો ભવતિ નિશ્ચિતમ્ ।
ઇતિ ચેજ્જ્ઞાનવાન્યો વૈ શમ્ભુમેવ સદા ભજેત્ ॥ ૩૫॥

અનન્યયા ચ ભક્ત્યા વૈ યુક્તઃ શમ્ભું ભજેત્પુનઃ ।
અન્તે ચ મુક્તિમાયાતિ નાત્ર કાર્યા વિચારણા ॥ ૩૬॥

અતોઽધિકો ન દેવોઽસ્તિ મુક્તિપ્રાપ્ત્યૈ ચ શઙ્કરાત્ ।
શરણં પ્રાપ્ય યં ચૈવ સંસારાદ્વિનિવર્તતે ॥ ૩૭॥

ઇતિ મે વિવિધં વાક્યમૃષીણાં ચ સમાગતૈઃ ।
નિશ્ચિત્ય કથિતં વિપ્રા ધિયા ધાર્યં પ્રયત્નતઃ ॥ ૩૮॥

પ્રથમં વિષ્ણવે દત્તં શમ્ભુના લિઙ્ગસમ્મુખે ।

વિષ્ણુના બ્રહ્મણે દત્તં બ્રહ્મણા સનકાદિષુ ॥ ૩૯॥

નારદાય તતઃ પ્રોક્તં તજ્જ્ઞાનં સનકાદિભિઃ ।
વ્યાસાય નારદેનોક્તં તેન મહ્યં કૃપાલુના ॥ ૪૦॥

મયા ચૈવ ભવદ્ભ્યશ્ચ ભવદ્ભિર્લોકહેતવે ।
સ્થાપનીયં પ્રયત્નેન શિવપ્રાપ્તિકરં ચ તત્ ॥ ૪૧॥

ઇતિ વશ્ચ સમાખ્યાતં યત્પૃષ્ટોઽહં મુનીશ્વરાઃ ।
ગોપનીયં પ્રયત્નેન કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૪૨॥

વ્યાસ ઉવાચ ।
એતચ્છ્રુત્વા તુ ઋષય આનન્દં પરમં ગતાઃ ।
હર્ષગદ્ગદયા વાચા નત્વા તે તુષ્ટુવુર્મુહુઃ ॥ ૪૩॥

ઋષય ઊચુઃ ।
વ્યાસશિષ્ય નમસ્તેઽસ્તુ ધન્યસ્ત્વં શૈવસત્તમ ।
શ્રાવિતં નઃ પરં વસ્તુ શૈવં જ્ઞાનમનુત્તમમ્ ॥ ૪૪॥

અસ્માકં ચેતસો ભ્રાન્તિર્ગતા હિ કૃપયા તવ ।
સન્તુષ્ટાઃ શિવસજ્જ્ઞાનં પ્રાપ્ય ત્વત્તો વિમુક્તિદમ્ ॥ ૪૫॥

સૂત ઉવાચ ।
નાસ્તિકાય ન વક્તવ્યમશ્રદ્ધાય શઠાય ચ ।
અભક્તાય મહેશસ્ય ન ચાશુશ્રુષવે દ્વિજાઃ ॥ ૪૬॥

ઇતિહાસપુરાણાનિ વેદાચ્છાસ્ત્રાણિ ચાસકૃત્ ।
વિચાર્યોદ્ધૃત્ય તત્સારં મહ્યં વ્યાસેન ભાષિતમ્ ॥ ૪૭॥

એતચ્છ્રુત્વા હ્યેકવારં ભવેત્પાપં હિ ભસ્મસાત્ ।
અભક્તો ભક્તિમાપ્નોતિ ભક્તસ્ય ભક્તિવર્ધનમ્ ॥ ૪૮॥

પુનઃ શ્રુતે ચ સદ્ભક્તિર્મુક્તિઃ સ્યાચ્ચ શ્રુતેઃ પુનઃ ।
તસ્માત્પુનઃ પુનઃ શ્રાવ્યં ભુક્તિમુક્તિફલેપ્સુભિઃ ॥ ૪૯॥

આવૃત્તયઃ પઞ્ચ કાર્યાઃ સમુદ્દિશ્ય ફલં પરમ્ ।
તત્પ્રાપ્નોતિ ન સન્દેહો વ્યાસસ્ય વચનં ત્વિદમ્ ॥ ૫૦॥

ન દુર્લભં હિ તસ્યૈવ યેનેદં શ્રુતમુત્તમમ્ ।
પઞ્ચકૃત્વસ્તદાવૃત્ત્યા લભ્યતે શિવદર્શનમ્ ॥ ૫૧॥

પુરાતનાશ્ચ રાજાનો વિપ્રા વૈશ્યાશ્ચ સત્તમાઃ ।
ઇદં શ્રુત્વા પઞ્ચકૃત્વો ધિયા સિદ્ધિં પરાં ગતાઃ ॥ ૫૨॥

શ્રોષ્યત્યદ્યાપિ યશ્ચેદં માનવો ભક્તિતત્પરઃ ।
વિજ્ઞાનં શિવસંજ્ઞં વૈ ભુક્તિં મુક્તિં લભેચ્ચ સઃ ॥ ૫૩॥

વ્યાસ ઉવાચ ।
ઇતિ તદ્વચનં શ્રુત્વા પરમાનન્દમાગતાઃ ।
સમાનર્ચુશ્ચ તે સૂતં નાનાવસ્તુભિરાદરાત્ ॥ ૫૪॥

નમસ્કારૈઃ સ્તવૈશ્ચૈવ સ્વસ્તિવાચનપૂર્વકમ્ ।
આશીર્ભિર્વર્ધયામાસુઃ સન્તુષ્ટાશ્છિન્નસંશયાઃ ॥ ૫૫॥

પરસ્પરં ચ સન્તુષ્ટાઃ સૂતસ્તે ચ સુબુદ્ધયઃ ।
શમ્ભું દેવં પરં મત્વા નમન્તિ સ્મ ભજન્તિ ચ ॥ ૫૬॥

એતચ્છિવસુવિજ્ઞાનં શિવસ્યાતિપ્રિયં મહત્ ।
ભુક્તિમુક્તિપ્રદં દિવ્યં શિવભક્તિવિવર્ધનમ્ ॥ ૫૭॥

ઇયં હિ સંહિતા પુણ્યા કોટિરુદ્રાહ્વયા પરા ।
ચતુર્થી શિવપુરાણસ્ય કથિતા મે મુદાવહા ॥ ૫૮॥

એતાં યઃ શ‍ૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વા સમાહિતઃ ।
સ ભુક્ત્વેહાખિલાન્ભોગાનન્તે પરગતિં લભેત્ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે ચતુર્થ્યાં કોટિરુદ્રસંહિતાયાં જ્ઞાનનિરૂપણં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૩॥

॥ સમાપ્તેયં શિવમહાપુરાણાન્તર્ગતકોટિરુદ્રસંહિતા ચતુર્થી ॥

---

*Shri Shiva Mahapuranam 4 Kotirudra Samhita*

pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*